ग्रंथ सं० विषय धर्मशास्त्रम् ग्रंथ सं०

नाम प्रायश्चित्तमुक्तावली प्रकाश: ग्रन्थकार दिवाकरभट्ट:

लेखनाम: अज्ञातम्:

पत्र सं० १-८१

श्लोक सं० अक्षर सं० (पंक्तौ) ३१ पंक्ति सं० (पृष्ठे) ११

आकार: ९.६ × ३.९ 13318 लिपि दे. ना. आधार का.

वि० विवरणम् पू. प्रकाशान्तकोऽपूर्णम् अ. २६१ २६२

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५०,०००

Indira Gandhi National Centre for the Arts

१२५

प्रायश्चित्तमुक्तावली
पत्रसंख्या
८१

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली श्रीगणेशाय नमः ॥ श्रीसांबाय नमः ॥ श्रीमार्त्तंडभैरवाय नमः ॥ श्रीमहालक्ष्म्यै नमः ॥ ॥ श्रीः ॥
१ यस्योदये मखभुजां प्रचरंति शेषाः पुण्याः क्रियाः प्रतिदिनं हवनार्चनाद्याः ॥ सोयं तमिस्रदल
नोदिनमादमीष्टं भानुस्त्रयीमयतनुः परिपूर्णरूपः ॥ १ ॥ श्रीरामेश्वरसूरिसूनुरभवन्नारायणाख्यो
महान्येनाकार्यविमुक्तकेसु विधिना विश्वेश्वरस्थापना ॥ तत्पुत्रो विबुधाधिपः क्षितितले श्रीशंक
रस्तत्सुताजातो भाट्टनयेऽतुलः पृथुयशाः श्रीनीलकंठो बुधः ॥ २ ॥ तत्पुत्रीतनयो दिवाकरकृती शा
स्त्रेष्वधीती पितुर्मीमांसानयकोविदः पुरभिदः क्षेत्राधिवासी सुधीः ॥ प्रायश्चित्तविनिर्णयामल
महामुक्तावलीसन्मुदे विस्पष्टं तनुते प्रणम्य महसां राशिं जगद्बोधकं ॥ ३ ॥ तत्र प्रायश्चित्तशब्दा
र्थमाहांगिराः ॥ प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ॥ तपोनिश्चयसंयुक्तं प्रायश्चित्तं तदु
च्यते ॥ प्रायशश्च समं चित्तं चारयित्वा प्रदीयते ॥ पर्षदा कार्यते यत्तु प्रायश्चित्तमिति स्मृतिः ॥ अं तमिश्र
स्यार्थः । पापिनां चित्तमतिव्याकुलं भवति तच्च परिषदा व्रताद्यनुष्ठानेन प्रायशो बहुशः समस्तस्थ १
कार्यतेन कृतं प्रायश्चित्तपदवाच्यमिति । तथाच धर्मोपराधजनितव्याकुलितानिवर्तकं कर्म प्रा

याश्चत्तं । तच्च । नैमित्तविधानान्नैमि । त्तकं पापनाशकत्वेन काम्यं च । अतएव जाबालः ॥ काम्यं नैमित्ति
कं चैव प्रायश्चित्तमिति स्थितिरित्याह । याज्ञवल्क्योप्याह । विहितस्याननुष्ठानान्निंदितस्य च सेवनात् ॥
अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति ॥ तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ॥ एवमस्यां तरा
त्माच्च लोकश्चैव प्रसीदतीति ॥ दुरितोपशमाद्भयं लोकपंक्तिनिरोधश्च निवर्तते तदुभयार्थः । स एव । प्रायश्चि
त्तेरपेक्षा न यज्ञदानकृतं भवति ॥ कर्मणो व्यवहार्यत्वं वचनादिह जायते ॥ अत्रेदमभिधित्सितं । पाप
स्य व्यवहारनिरोधिका नरकजनिका च द्वे शक्ती । तत्राज्ञानकृतपापस्य प्रायश्चित्तैः शक्तिद्वयमपि नश्य
ति । ज्ञानकृतस्य तु व्यवहारनिरोधिकैव न तु नरकजनिकापि । व्यवहारनिरोधश्च न सर्वपापेषु किंतु
गोलमेधवं ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसंबंधागस्तेननास्तिकनिंदितकर्माभ्यासि पं
तितत्यागिनः पतिताः पातकसंयोजकाश्चेति पापेषु भवति । यथाह श्रीविबुध्याः सुवर्णा
पहारोऽज्ञानकृतं । कामतः सुवर्णबुद्ध्यैव हृतस्य सुवर्णस्य कामतः पापं । आचार्यस्तु याज्ञवल्क्यव
चनेऽकारश्लेषण कामकृतपापेषु व्यवहारनिरोधिकाशक्तिर्नापि नरकजनिकात्वपि तीव्रत्वात् ॥
अथ तंत्रप्रसंगो ॥ सजातीयानां प्रायश्चित्तानां देशकालकर्त्रैक्ये नैकनिमित्तेषु तंत्रं । एकनिमित्तप्रा

Indira Gandhi National
Centre for the Arts

प्रा०ली जाप त्यहृयं त्रयं चाम्नातं न त्रत्रयमेयकार्यं। इतरस्य प्रसंगसिद्धेः। तथाहि। गौतमः। द्वे परदारे त्रीणि
२ श्रोत्रियस्येति। अत्र सामान्यतः परदारमात्रगमने द्वैवार्षिकं व्रतमुक्तं श्रोत्रियपत्नीगमने त्रैवा
र्षिकं तदभिहितं। तत्र श्रोत्रियपत्नीगमने उभयप्राप्तौ त्रैवार्षिकमेव व्रतं कार्यं। तेनैव द्वैवार्षिकस्य
द्धिरिति प्रसंगसिद्धिः॥ अथ पापभेदानाह विष्णुः॥ अतिपातकमहापातकानुपातकोपपातके
षु प्रवर्त्तते जातिभ्रंशकरेषु संकरीकरणेष्वपात्रीकरणेषु मलिनीकरणेषु प्रकीर्णकेषु पीति। तत्राति
च६ पातकान्याह कात्यायनः॥ जनन्यां भगिन्यां च स्वसुतायां तथैव च। स्नुषायां गमने चैव विज्ञेयम
तिपातकं॥ महापातकान्याह मनुः॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः। महान्ति पातकान्याहुः
संगमं चैव तैः सह इति॥ याज्ञवल्क्योपि। ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः। महापातकिनस्त्वेते
यश्चैतैः सह संवसेत्॥ ब्रह्महा बुद्धिपूर्वकं ब्राह्मणहंता। मद्यपो निषिद्धसुरापः। स्तेनो ब्राह्मणह
महारी। ब्राह्मणसुवर्णहरणं महापातकमिति विज्ञानेश्वर धनापरार्कौ। गुरुतल्पगः पितृ २
दारगामी। स्वबंद तत्संसर्गीचि पंचमस्तद्वत्। एभिस्तु संविन्योद्यो वै वत्सरं सोपि तत्सम इति याज्ञव
ल्क्यस्मरणात्॥ अथानुपातकानि। तत्र ब्रह्महत्यासमान्याह याज्ञवल्क्यः। गुरूणामध्यधिक्षे

पो वेदनिंदा सुहृद्वधः। ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनं। गुरूणामध्यधिक्षेपो गुरुविषये मिथ्याभिशं
सनं। मनुरपि। अनृतं च समुत्कर्षे राजगामि च पैशुनं। गुरोश्चालीकनिर्बंधः समानि ब्रह्महत्यया। पैशुनं स
तोऽसतो वा परदोषस्य ख्यापनं। राजनीति यत्कृत्स्नं राजगामी। निवचनं परंपर्येणापि राजानं गच्छति तदपि व
र्ज्यमित्येवमर्थं। प्रचेता अपि। गोगर्भिणीबालवधो ब्रह्महत्यासमानि चेति॥ ॥अथ सुरापानानि॥ याज्ञव
ल्क्यः। निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतं। रजस्वलामुखास्वादः सुरापानसमानि तु। निषिद्धस्य लशु
नादेर्मत्याभक्षणं। मनुरपि। छत्राकं विड्वराहं च लशुनं ग्राम[redacted]कुक्कुटं। पलांडुं गृंजनं चैव मत्या जग्ध्वा पत
त्यरहति। स्मृत्यर्थसारे। गुरुविषये मिथ्याभिशंसने नान्यवादित्वमन्यकर्त्तृत्वं च। आत्मोत्कर्षार्थं राजकुलादा
वनृतो क्तिर्मित्रवधः। कूटसाक्ष्यं वेदत्यागो वेदनिंदा तयोरन्नभुक्तिरिति॥ ॥अथ सुवर्णस्तेयसमा[redacted]नि॥
मनुः। निक्षेपस्यापहरणं नरा[redacted]श्वरजतस्य च। भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतं। याज्ञवल्क्यो
पि। अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा। निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितमिति॥ ॥अथ गुरु
तल्पगमनसमानि॥ मनुः। रेतःसेकः स्वयोनीषु कुमारीष्वंत्यजासु च। सख्युः पुत्रस्य च स्त्रीषु गुरुतल्प
समं विदुः। याज्ञवल्क्योपि। सखिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च। सगोत्रासु सुतस्त्रीषु गुरुत

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली ल्पसमंस्मृतं। स्वयोनिर्भगिनी। पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि। मातुःसपत्नीभगिनीमाचार्यत
३ नयांतथा। आचार्यपत्नीतनयांगच्छंस्तुगुरुतल्पगइति। नारदः। मातामातृष्वसाश्वश्रूर्मातुलानीपितृष्व
सा। पितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नुषा। दुहिताचार्यभार्याचसगोत्राशरणागता। राज्ञीप्र
व्रजिताधात्रीसाध्वीवर्णोत्तमाचया। आसामन्यतमांगच्छन्गुरुतल्पगउच्यते॥ इ॥ स्वनुपातकानि॥ ॥
अथोपपातकान्याह॥ याज्ञवल्क्यः। गोवधोव्रात्यतास्तेयमृणानांचानपाक्रिया। अनाहिताग्नितापण्य
विक्रयःपरिवेदनं। भृताद्ध्ययनादानंभृतकाध्यापनंतथा। पारदार्यंपारिवित्त्यंवार्द्धुष्यंलवणक्रिया। स्त्री
शूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनं। नास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः। धान्यकुप्यपशुस्तेय
मयाज्यानांचयाजनं। पितृमातृसुतत्यागस्तडागारामविक्रयः। कन्यासंदूषणंचैवपरिवेदकयाजनं।
कन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनं। आत्मनोर्थेक्रियारंभोमद्यपस्त्रीनिषेवणं। स्वाध्यायाग्निसु
तत्यागोबांधवत्यागएवच। इंधनार्थंद्रुमच्छेदःस्त्रीहिंसौषधिजीवनं। हिंस्रयंत्रविधानंचव्यसनान्या २
त्मविक्रयः। शूद्रप्रेष्यंहीनसख्यंहीनयोनिनिषेवणं। तथैवानाश्रमेवासःपरान्नपरिपुष्टता। असच्छा
स्त्राधिगमनमाकरेष्वधिकारिता। भार्यायाविक्रयश्चैषामेकैकमुपपातकमिति। व्रात्यतापतितसावि

त्रीकत्वं। स्तेयंब्राह्मणसुवर्णतत्समानभिन्नपरद्रव्यचौर्यं। अनपाक्रियाउत्तमर्णगृहीतानांधनानांपराहृ
त्यासमर्पणं। अनाहिताग्नितासत्यधिकारेऽग्निहोत्रराहित्यं। आपण्यविक्रयःआपण्यानांलवणाना
दीनांविक्रयः। परिवेदनंसोदरेज्येष्ठेऽविवाहितेऽनग्निकेचसतिकनीयसोदाराग्निहोत्रसंयोगः। भृताद
ध्ययनंपणपूर्वाध्यापकात्स्वाध्यायग्रहः। भृतकाध्यापनंपणपूर्वमध्यापनं। पारिवित्त्यंकनिष्ठे
विवाहितेऽग्रजस्यविवाहराहित्यं। वार्द्धुष्यंगर्हितवृत्त्युपजीविता। निंदितार्थोपजीवनंप्रतिषिद्धार्थोप
जीवनं। नास्तिक्यंदेवादिषुभक्त्यभावः। व्रतलोपोब्रह्मचर्येकामिनीप्रसंगः। माघमासमिमंपूर्णंस्नास्यद्रत्या
दिगृहीत[redacted]व्रतापरिपालनंच। कुप्यंमसारत्रपुसीसादि। अयाज्ययाजनंशूद्रादीनांयाजनं।
निसर्गदुष्टक्रियादुष्टव्रात्यादीनांचयाजनं। स्मृत्यर्थसारेतुचकारादुभयत्रभोजनसंग्रहइतिव्याख्या।
प४ कन्यासंदूषणमंगुल्यादिनायोनिविदारणमितिस्मृत्यर्थसारेतुद्विज्ञानेश्वरप्रभृतयः। अहंतुब्रुवे। यावन्न
लज्जयायातिकन्यापुरुषसन्निधौ। योन्यादीन्नावगूहेततावद्भवतिकन्यकेतिलक्षणोक्तकन्यायांहृ
ठाद्वीर्यनिक्षेपःकन्यासंदूषणशब्दार्थइति। [redacted] कौटिल्यंपितरिकु
टिलता। क्रियारंभःपाकारंभः। स्वकीयायाअपिमद्यपः ( ) स्त्रियाःसेवनं॥ अग्निस्त्यागोद्विविधाग्निसा

Indira Gandhi National
Centre for the Arts

प्रा०मु०टी० गः। व्यसनानि मृगयादीन्यष्टादश। शूद्रप्रेष्यं शूद्रसेवनं। असच्छास्त्राधिगमनं बौद्धादिशास्त्ररुचिः। अवशि
४ ष्टं स्पष्टं॥ ॥अथ जातिभ्रंशकराण्याह मनुः॥ ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुंसि च
मैथुन्यं जातिभ्रंशकरं स्मृतमिति॥ अथ संकरीकरणान्याह मनुः॥ खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा।
संकरीकरणं ज्ञेयं मीनाहिमहिषस्य चेति॥ अथापात्रीकरणान्याह स एव॥ निंदितेभ्यो धनादानं वाणिज्यं नी५
शूद्रसेवनं। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं॥ अथ मलिनीकरणान्याह स एव॥ कृमिकीटवयोहत्या च६
मद्यानुगतभोजनं। फलैधःकुसुमस्तेयमधैर्यं मलावहमिति॥ प्रकीर्णकान्याह नारदः॥ राज्ञामाज्ञा
प्रतीघातस्तत्कर्माकरणं तथा। पुनः प्रदानं संभेदः प्रकृतीनां तथैव च। पाखंडिनैगमश्रेणिगणधर्मविपर्ययाः।
पितापुत्रविवादश्च प्रायश्चित्तविपर्ययः। प्रतिग्रहविलोपश्च कोप आश्रमिणामपि। वर्णसंकरदोषश्च तद्वृ
त्तिनियमस्तथा। न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकमिति। पुनः प्रदानं दत्तैवदानं। संभेदो वैमत्यं। पा सै४
खंडिनो वेदस्य प्रामाण्यमेव न मन्यमानाः सौगतादयः। नैगमा वेदस्याप्रामाण्यवादिनः।
श्रेणयः एकशिल्पोपजीविनः। गणो व्रातं। धर्मविपर्ययोऽधर्मः। प्रायश्चित्तविपर्ययो व्यत्ययेन चान्द्रकृच्छ्रा ४
करणं कृच्छ्रे तप्तकृच्छ्रमित्यादिः। प्रतिग्रहविलोपो गृहीतप्रतिग्रहसंगोपनं। तद्वृत्तिनियमो वर्णसंकरवृत्तिः

कृत्रियादिस्तया। नापद्यपि जीवने॥ ॥अथेदानीं वक्ष्यमाणप्रायश्चित्तोपयोगितया सांतपनव्रतकृच्छ्रातिकृ
च्छ्रादीनां लक्षणान्यभिधीयंते॥ तत्र सांतपनाख्यं व्रतं तावदाह याज्ञवल्क्यः। गोमूत्रं गोमयं क्षीरं दधि सर्पिः
कुशोदकं। जग्ध्वापरेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरन्॥ ब्रह्मकूर्चे पराशरः। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कु मा६३
शोदकं। निर्दिष्टं पंचगव्यं तु पवित्रं कायशोधनं। गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयं। पयः कांचनव
र्णायानीलायश्च तथा दधि। घृतं च कृष्णवर्णायाः सर्वं कापिलमेव वा। अभावे सर्ववर्णानां पंचगव्येष्वयं विधिः।
गोमूत्रवद्गृतस्येष्टा
त्रे६ गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता दधस्तु दशकीर्तिताः। गोमूत्रवद्घृतस्येष्टा
स्तदर्धं तु कुशोदकं। गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि।
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं। पंचगव्यमृचापूतं होमयेदग्निसन्निधौ। सप्तपत्रास्तु ये द
र्भा अछिन्नाग्राः शुकत्विषः। एतैरुद्धृत्य होतव्यं पंचगव्यं यथाविधि। इरावती इदं विष्णुर्मानस्तोके च शंव
ती। एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः। प्रणवेन समालोड्य प्रणवेनाभिमंत्र्य च। प्रणवेन समुद्धृत्य
पिबेच्च प्रणवेन तत्। मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत्। स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः।
यत्त्वगस्थिगतं पापं देहे तिष्ठति मानवे। ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेन्धनमिति। पंचगव्यहोमेऽन्या

प्रा०मु०ली० न्मंत्रान्प्रजापतिराह। अग्नये चैव सोमाय सावित्र्यां तथैव च। प्रणवेन तथा कृत्वा स्विष्टकृच्च तथैव चेति। यद्
त्विनदेव पंचगव्यं त्र्यहं पीयते तदायति सांतपन मुक्तं मिताक्षरायां शंखेन। एतदेव त्रिरभ्यस्तं यथाति सांतप
५ नं स्मृतमिति॥ ॥ महासांतपनमाह याज्ञवल्क्यः। पृथक्सांतपनद्रव्यैः षडहः सोपवासकः। सप्ताहे
न तु कृच्छ्रोयं महासांतपनः स्मृत इति। अस्यार्थः। पृथग्भूतैः षड्भिर्गोमूत्रादिभिरेकैकेनैकैकमहरतिबा
ह्य सप्तमं चोपवसेदिति। यमस्तु पंचदशदिनसाध्यं माहासांतपनमाह। त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं
पिबेत्। त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः। माहासांतपनं ह्येतत्सर्वपापप्रणाशनमिति। जा
बालिनात्त्वेकविंशत्यहोरात्रसाध्यः सांतपन उक्तः। षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत्। त्र्यहं
नं५ चोपवसेदंत्यं महासांतपनं विदुरिति॥ ॥ अतिसां तपनमाह यमः॥ एतान्येव तथा पेयान्येकैकं तु द्व्य
हं द्व्यहं। अतिसांतपनं नाम श्वपाकमपि शोधयेदिति॥ ॥ पर्णकृच्छ्रमाह याज्ञवल्क्यः॥ पर्णोदुंब
रराजीवबिल्वपत्रकुशोदकैः। प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः। पर्णः पलाशः। शेषाः प्र
सिद्धाः। एतेषां क्रमेणैकैकस्य क्वथितं जलं पिबेत्। पंचमे ह्नि कुशोदकं पिबे दिति पंचाहसा ५
ध्यः। विष्णुस्तु पर्णकृच्छ्रमन्यथा आह। कुशपलाशोदुंबरपद्मशंखपुष्पीवाटब्रह्मसुवर्च

ला पत्रैः क्वथितस्यांभसः प्रत्यहं पाने पर्णकृच्छ्र इति। समस्तान्येतानि त्रिरात्रेणोपभुक्तानि तदा पर्णकूर्चं
इत्याह यमः। एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः। क्वथयित्वा पिबेदद्भिः पर्णकूर्चो विधीयत इति।
फलादिकृच्छ्रानाह मार्कंडेयः॥ फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः। श्रीकृच्छ्रः श्रीफलैः प्रोक्तः
पद्माक्षैरपरस्तथा। मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतं। पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तु पुष्पकृच्छ्रकः।
• मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन त्विति॥ ॥ तप्तकृच्छ्रमाह याज्ञव ल्क्यः॥ तप्तक्षीरघृतांबु
नामेकैकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः। तप्तपदं सर्वत्रान्वेति। असौ तप्तकृच्छ्र
क६ लघुपातकविषयः। गुरुपातकविषये त्वाह पराशरः। त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत्। त्र्यहमु
ष्णं पिबेत्सर्पिर्वायुभक्षो दिनत्रयमिति। वायुभक्षो निरशनः। एतेषां प्रमाणमाह स एव। षट्पलं तु पिबे
दंभ स्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते। मनुस्त्वत्रापरं विशेषं दर्शितवान्।
तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहित इति। उष्णोदका
न्निर्गच्छतो बाष्पस्य पानमुष्णानिलपानमित्यपरार्कविज्ञानेश्वरौ। शीतकृच्छ्रस्वरूपमाह यमः। त्र्यहमुष्णं
पिबेदंभः त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पीत्वा वायुभक्षः परं त्र्यहं। तप्तकृच्छ्रं विजानीयाच्छीतैः शीतमु

Indira Gandhi National
Centre for the Arts

प्रा० मु० ली० मुदाहृतमिति। अत्र पलशब्देन सुवर्णचतुष्टयं पंचकं बोध्यं। पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितमि
तियाज्ञवल्क्योक्तेः॥ ॥पादकृच्छ्रमाह याज्ञवल्क्यः॥ एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन
६ चैकेन पादकृच्छ्रः प्रकीर्तित इति। अयाचितेनेत्यस्यायमर्थो विज्ञानेश्वरेण प्रकटीकृतः। अयाचितमिति
न केवलं परकीयान्नयाचनप्रतिषेधः। अपि तु स्वीयमपि परिचारकभार्यादिभ्यो न याचितव्यं। प्रेषणा
ध्येषणयोः साधारणत्वाद्याञ्चायाः। अतः स्वगृहेपि भृत्यभार्यादयो नाज्ञप्ता एव। यदि भोजनमु
पहरंति तर्हि भोक्तव्यं नान्यथेति। एकभक्तादिषु ग्राससंख्यामाह पराशरः। सायं तु द्वादश ग्रासाः प्रातः
पंचदश स्मृताः। चतुर्विंशतिरायाच्याः परं निरशनं स्मृतमिति। यस्तु द्वादश पंचदशभिर्ग्रासैः संपूर्णदि
नमतिवाहयितुमसमर्थस्तं प्रति विशेषमाहापस्तंबः। सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रय इति। अपरार्के तु परं निरशनं स्मृतमिति चतुर्थः पादः पठि
तः। श्रीमातामहचरणकमलैरपरार्कपाठ एवादृतः। ग्रासप्रमाणमप्याह स एव। कुक्कुटांडप्रमाणा
स्युर्यथा वास्यं विशेत्सुखमिति॥ पादकृच्छ्रस्वरूपं प्रकारांतरेणादर्शितवानापस्तंबः॥ त्र्यहं निरशनं
पादः पादश्चायाचितं त्र्यहं। सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यहमिति। एतेषामधिकारिणो

---

स्याह स एव। प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत्। अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतमिति।
अर्द्धकृच्छ्रमाह स एव। सायंप्रातस्तथैकैकं दिनद्वयमयाचितं। दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीय
त इति॥ ॥प्राजापत्यकृच्छ्रमाह याज्ञवल्क्यः॥ यथाकथंचित्त्रिगुणः प्राजापत्योयमुच्यते। अयं चतु
रात्मकः पादकृच्छ्रः। यथाकथंचिद्दंडकलितवदावृत्त्या स्वस्थानविवृद्ध्या वा तत्राप्यानुलोम्येन प्रातिलो
म्येन वा त्रिरभ्यस्तः प्राजापत्य उच्यते। तत्र दंडकलितवदावृत्तिमाह वसिष्ठः। अहः प्रातरहर्नक्तमह
रेकमयाचितं। अहः पराकं तत्रैवमेवं चतुरहोपरौ। पराकमुपवासः अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां
वरः। बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुदाहृतमिति। पादकृच्छ्रापरनाम शिशुकृच्छ्रमिति। आनुलो
म्येन स्वस्थानवृद्धिपक्षोऽदर्शि मनुना। त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं। त्र्यहं परं च नाश्नी
यात्प्राजापत्यं चरन्द्विज इति। प्रातिलोम्यावृत्तिस्तु वसिष्ठेन प्रदर्शिता। प्रातिलोम्यं चरेद्युक्तो कृच्छ्रं चां
द्रायणोत्तरमिति॥ ॥अतिकृच्छ्रमाह याज्ञवल्क्यः॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनं इति॥
अयमर्थः। अतिकृच्छ्रे आद्ये त्र्यहत्रये ग्राससंख्याकं भोजनं न किं तु पाणिपूर्णान्नभोजनमन्यत्सर्वं प्रा
जापत्यादिधर्मवदिति। एतदसमर्थस्य यस्त्वेकैकं ग्रासं भुक्त्वा त्रीणि त्र्यहाण्यतिवाहयितुं शक्तस्तं प्रति

Indira Gandhi National
Centre for the Arts

कृच्छ्र २

प्रा०मु०ली कृच्छ्रांतरमाह मनुः। एकैकं ग्रासमश्नीयात्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन्द्विज
७ इति॥ ॥अथ तप्तकृच्छ्रमाह याज्ञवल्क्यः॥ कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिं। पयः क्षीरं। अपरा
र्के विज्ञानेश्वरयोरप्येष एवाभिप्रायः। श्रीमातामहगुरवस्तु पयोजलमिति मा च रव्युः। पराकमाह
स एव। द्वादशाहोपवासेन पराकः परिकीर्तित इति॥ यावककृच्छ्रमाह शंखः। गोपुरीषाद्यवानश्नन्मा
समेकं समाहितः। व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये॥ मासोपवासकृच्छ्रमाह जाबालिः॥ अनश्नन्मासमेकं तु
महापातकनाशनमिति॥ सौम्यकृच्छ्रमाह याज्ञवल्क्यः॥ पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरं। ए
कैकमुपवासश्च कृच्छ्रः सौम्योयमुच्यत इति। पिण्याकोदनमिस्त्रावो दस्विदुदकसक्तूनां भक्षणं पंचस्व
हःसु षष्ठे उपवास इति। तुलापुरुषकृच्छ्रमाह याज्ञवल्क्यः॥ एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमं।
तुलापुरुष इत्येष ज्ञेयः पंचदशाहिक इति। एषां पिण्याकादीनां। अत्र पंचदशाहिकत्वोक्तेरुपवासनि
वृत्तिः प्रतीयते। मार्कंडेयः। कृच्छ्राण्येतानि कार्याणि सदा वर्णत्रयेण तु। कृच्छ्रेष्वेतेषु शूद्रस्य नाधिका
रो विधीयत इति। नाधिकारो गोमयप्राशनादिपानविधिना नाधिकार इत्यर्थः। गोप्रदानाद्यनुकल्पविधि
नाशूद्रस्य सिध्यत्यधिकारः। तस्माच्छूद्रसमासाद्य सदा धर्मपथे स्थितं। प्रायश्चित्तं प्रदातव्यं जपहोम

विवर्जितमित्यंगिरोक्तेः। स्त्रीणामपि तथैव निर्णयः। स्त्रीशूद्राश्च सधर्माण इति शास्त्रात्॥ ॥अथ चांद्रायण
स्वरूपं विहाणोति स एव। तिथिवृद्ध्याचरेत्पिंडान्शुक्ले शिख्यंडसंमितान्। एकैकं ह्रासयेत्कृष्णे पिंडं चांद्रायणं
चरन्। शिखी मयूरः। वसिष्ठोपि। एकैकं वर्द्धयेत्पिंडं शुक्ले कृष्णे च ह्रासयेत्। इंदुक्षयेन भुंजीत एष चांद्रायणो वि
धिरिति। एतस्य यवमध्य संज्ञामाह। वर्द्धयेत्पिंडमेकैकं शुक्ले कृष्णे च ह्रासयेत्। एतच्चांद्रायणं नाम यवम
ध्यं प्रकीर्तितमिति। यदा ह्यस्मप्रतिपदमारभ्यामुनैव प्रकारेणानुष्ठीयते तदा पिपीलिका चांद्रायणमित्याह स
एव। एकैकं ह्रासयेत्पिंडं कृष्णे शुक्ले च वर्द्धयेत्। एतत्पिपीलिकामध्यं चांद्रायणमुदाहृतमिति। अत्र चांद्राय
णव्रते तिथिवृद्धौ ह्रासे वा हविर्भुजः। ग्रासानाश्नाधिकारमश्नीयात्। ताश्च द्विकलाभिवृद्धौ क्रमेण वर्द्धयेत्तद्धा
नौ च ह्रासयेदमावास्यायां चनाश्नीयादिति। अत्र चरुभैक्षसक्तुकणयावकपयोदधिघृतमूलफलोद
कानि हवींष्युत्तरोत्तरं प्रशस्तानि॥ ॥सामान्यचांद्रायणमाह याज्ञवल्क्यः॥ यथाकथंचित्पिंडानां चत्वारिं
शतद्वयं। मासेनैवोपभुंजीत चांद्रायणमथापरमिति। चत्वारिंशदधिकं शतद्वयं चत्वारिंशतद्वयं॥२४०॥ छत
विसुरपि। यथाकथंचित्पिंडानां तिस्रोशीतीर्यश्नीयात्स सामान्यचांद्रायण इति। पुनरपि प्रकांतरेण त्रि
विधं चांद्रायणमाह यमः। त्रीन्त्रीन्पिंडान्समश्नीयान्नियतात्मा दृढव्रतः। हविष्या न्नस्य वै मासमृषिचां

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰

८

द्रायणं स्मृतं । चतुरः प्रातरश्नीयाच्चतुरः सायमेव च । पिंडानेतद्धि बालानां शिशुचांद्रायणं स्मृतं । पिंडा
नष्टौ समश्नीयान्मासं मध्यंदिने रवौ । यतिचांद्रायणं ह्येतत्सर्वकल्मषनाशनमिति ।। चांद्रायणे विहितग्रास
स्य परिमाणं शंखोप्याह । आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृता इति । पराशरोप्याह । कुक्कुटांडप्रमाणं तु
ग्रासं वै परिकल्पयेत् । अन्यथा भावदोषेण न धर्मो न च शुध्यतीति । उक्तपरिमाणादधिकन्यूनपरिमाण
त्वमन्यथाभावः । स चासौ दोषश्चेति कर्मधारयः । एतेषां याज्ञवल्क्यशंखपराशरोदाहृतानां ग्रासपरि
माणानामिच्छया विकल्प इति सर्वग्रंथकृतः । पिपीलिकायवमध्यचांद्रायणयोः प्रतिपद्येवारंभः । इत
रेषां तु प्रतिपदि दिनांतरेपीति ।। अत्र श्रीमातामहगुरवः ।। पिपीलिकायवमध्यचांद्रायणयोरेकादश्या
दिनित्योपवासप्राप्तिस्तावच्चांद्रायणविधिना बाध्यते । एतस्य धर्मार्थं चचरेदेनश्चंद्रस्येति सलोकतामिति
काम्यत्वाल्लशुनभक्षणादिनिमित्ते विहितत्वेन नैमित्तिकत्वाच्चेति मञ्जुलमाहुः । अपरार्कमते पूर्वप्रक्रा
तमेकादश्यादिव्रतं न लुप्यते । तद्विखिलप्रपंचस्तु विस्तरभियानोदाहृतः ।। ।। अथ कृच्छ्रचांद्रायणादिवि ८
धिः प्रदर्श्यते ।। पराशरीये यमः । पौर्णमास्यामुपवसेत्ब्राह्मणः सुसमाहितः । केशान्श्मश्रूणि लोमानि
कक्षोपस्थं चो न वपेत् । प्रयतो विधिवत्स्नात्वा गृह्णीयात्सुसमाहितः । मधुमांसं च लवणं शुल्कानि प

३ साधारणो

रिवर्जयेत् । स्त्रीशूद्रौ नाभिभाषेत सत्यवादी समंततः । पालाशं धारयेद्दंडं शुचिर्मौंजीं च मेखलां । यज्ञो
पवीती करकं धारयेन्नियतः शुचिः । शाणीवल्कलधारी वा मार्गविवास उच्यते । सर्वाण्यहानि संतिष्ठेत्तुला
नमौनधृतव्रतः । स्थानासनाभ्यां विहरेद्ब्रह्मचारी क्षपाशनः । व्रतपालयेद्व्रतं सत्यं प्रजापतिं मित्रमग्नीषोमौ
बृहस्पतिं यजेत् । एतानेवमर्चयित्वा महाव्याहृतयस्तथा । ॐकारपूर्वा व्याख्यातास्तथा सर्वाः पृथक्पृ
थक् । ऋतं सत्यं च गायत्रीमित्येतानि सदा जपेत् । दशसाहस्रिकं वापि गायत्रीमाह्निकं जपेत् । वृक्षमूल
निकेतः स्याद्रात्रौ वीरासनी भवेत् । आर्द्रवासाश्चरेत्कृच्छ्रं स्नात्वा वस्त्रं न पीडयेत् । चरुं वा श्रपयेन्नित्यं गोभ्या
निष्क्रीतया वकैः । पायसं शाकमन्नं वा भैक्षं वा वाग्यतश्चरेत् । आयसं तैजसं पात्रं चक्रोत्पन्नं विवर्जयेत् । अ
सुराणां हि तत्पात्रं मयस्तैजसं च कृजं । चक्रजं मृन्मयं । तथैवान्यतमालाभे मद्दं कुर्वीत वैदिकीं । यज्ञियानां तु
वृक्षाणां तेषां पर्णैः स्वयं च्युतैः । हसनं तु निरीहेत नाभिभाषेत्परस्त्रियं । गोदोहमात्रं तिष्ठेत न स्वपेत्तानां पर
व्रजेत् । तद्विधेषु चरेद्भैक्षं नियतेषु द्विजातिषु । अग्नयो यत्र हूयन्ते ब्रह्म वा यत्र पठ्यते । ब्रह्मवेदः । प्रयतः कृ
तशौचस्तु भैक्षमभ्युक्षयेत्ततः । आदित्याभिमुखो भूत्वा गुरवे तन्निवेदयेत् । अनुज्ञातस्ततः कुर्याद्देवर्षिपि
तृपूजनं । शाकं वा यदि वा पत्रं मूलं वा यदि वा फलं । संपादयेद्यदाहारं तेनाग्नौ जुहुयात्सदा । अशौनोर्थं हारा १

Indira Gandhi National Centre for the Arts

प्रा॰मु॰ली॰
९

द्विजेदत्वाततन्नन्नियमंश्रितः।ग्रासंशेषेणकुर्वीतयोस्यास्येप्रविशेत्सुखं।कुक्कुटांडप्रमाणंवाग्रासं
कुर्यात्समाहितः।अंगुल्यग्रस्थितंवापिगायत्र्याचाभिमंत्रयेत्।प्राशयित्वाउपस्पृश्यपुनरेवाभिमंत्रये
त्।स्काप्रत्ययोत्तरमप्रभृतिशेषःपूरणीयः।नतुविख्यापयेत्पिंडरसान्नास्वादयेत्पुनः।ननिंदेन्नप्रश
सेतस्वादस्वादुचभक्षयेत्।प्राङ्मुखोनित्यमश्नीयाद्ब्राह्मणोन्नमकुत्सयन्।ह्रासोवृद्धिर्यथासोमेमा
सिमासिप्रदृश्यते।अमावास्यापौर्णमास्यांव्रतंचांद्रायणंचरेदिति॥ ॥अत्रग्रासेरेवप्राणाग्नि
होत्रंदर्शितवान्बौधायनोमुनिः॥अश्नीयात्प्राणायेतिप्रथमं।अपानायेतिद्वितीयं।व्यानायेतितृतीयं।
उदानायेतिचतुर्थं।समानायेतिपंचमं।यदाचत्वारस्तदाद्वाभ्यांपूर्वं।यदात्रयस्तदाद्वाभ्यांद्वाभ्यांपूर्वं।यदा
द्वौतदाद्वाभ्यामेवोत्तरमेकंसर्वैरिति।चांद्रायणफलमाहसएव।यत्किंचित्दुष्कृतपापंकर्मणामनसा
गिरा।द्विजश्चांद्रायणंकृत्वातस्मात्पापात्प्रमुच्यतइति।अपरमाह।एतानिविधिवत्कृत्वाषड्भिर्मा
सैर्हविष्यभुक्।व्यपेतकल्मषोविप्रश्चांद्रस्येतिसलोकतामिति।अतोनंतरंकर्तव्यमाहपराशरः।
प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनं।गोद्वयंवस्त्रयुग्मंचदद्याद्विप्रेषुदक्षिणामिति।गोतमः।
अथातश्चांद्रायणस्याकोविधिः।कृच्छ्रवपनंचरेद्व्रतंपौर्णमासीमुपवसेदाप्यायस्वसंतेपयांसिनवो

यनापरपक्षमश्नीयात्।अमावास्यामुपोष्यैकेकोपचये ५ महः जनः २

नवोइतिचैताभिस्तर्पणमाज्यहोमोहविषश्चानुमंत्रणमुपस्थानंचंद्रमसोयद्देवादेवहेडनमितिचतस्र
भिराज्यंजुहुयाद्देवकृतस्येतिसमिद्भिः।ॐभूःभुवःस्वःतपःसत्यंयशःश्रीःऊर्क्इट्ओजःतेजःपुरुषः
धर्मःशिवःइत्येतैर्ग्रासानुमंत्रणंमनसानमःस्वाहेतिवासर्वान्ग्रासप्रमाणमास्याविकारेणचरुभैक्षसक्तु
कणयावकशाकदधिघृतमूलफलोदकान्युत्तरोत्तरप्रशस्तानिपौर्णमास्यांपंचदशग्रासान्भुक्त्वाएकैका
पचयेनपूर्वपक्षमिति॥ ॥अथचांद्रायणव्रतप्रयोगः॥ ॥चतुर्दश्यांकृतनित्यक्रियःकृताह्निकःप्राणाया
मंकृत्वाप्राङ्मुखउदङ्मुखोवाकर्तातिथ्यादिसंकीर्त्यममामुककर्मणोमुकगोत्रस्यामुककामनासि
द्धिद्वारापापक्षयसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थममुकचांद्रायणव्रतंकरिष्यइतिसंकल्पंकृत्वानि
र्विघ्नप्रसिद्ध्यैविनायकमिष्टदेवांश्चरंपूज्यनत्वाअग्नयेव्रतपतयेव्रतंचरिष्यामीत्यादिमंत्रैश्चममादित्यायनि
...यदिपो
अ४ वेधकेशादीन्वापयित्वाद्विउपवासंविधायपरदिनेअमावास्यायांचेत्तदातदहन्युपवासंकुर्यात्।यदिपौ
र्णमासीचेत्तदापंचदशग्रासानश्नीयात्।ततःप्रत्यहंचंद्रोदयोत्तरं।आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं
भवावाजस्यसंगथेसोमंतर्पयामि।संतेपयांसिसमुयंतुवाजाःसंवृष्ण्यान्यभिमातिषाहः।आप्यायमानोअ
मृतायसोमदिविश्रवांस्युत्तमानिधिष्वसोमंतर्पयामि।नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्य

प्र०मु०ली गं। भागं देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरते दीर्घमायुः चंद्रमसं तर्पयामीत्येवं त्रिस्तर्पयित्वा ।। ज्यमेतैरे
वमंत्रैर्लौकिकाग्नौ कृत्वा तेनैव पात्रस्थं हविर् भिमंत्रैस्तैरेव चंद्रमुपस्थाय यद्देवा देवहेलनं देवासश्च कृमा
१० वयं। आदित्यास्तस्मान्मा मुंचतर्तस्यर्तेन मामित। देवा जीवनकाम्या यद्वाचानृतमूदिम। तस्मान्न इह
मुंचत विश्वेदेवाः सजोषसः। ऋतेन द्यावापृथिवी ऋतेन त्वं सरस्वति। कृतान्नः पाह्येनसो यत्किंचा
नृतमूदिम। इंद्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः। ते नो मुंचंत्वेनसो यदन्यकृतमारिम इति चतु
र्मंत्रैः प्रत्यृचमाज्यं कृत्वा ।। अनयैव मम मह त्यजेत्। ततो देवकृतस्यैनसोवयजनम सि स्वाहा। मनुष्य
कृतस्यैनसोवयजनमसि स्वाहा। पितृकृतस्यैनसोवयजनमसि स्वाहेति स मित्रयं कृत्वा ।। अनयैन
ममेत्युक्त्वा ग्रासानुमंत्रणं कुर्यात् ।। तद्यथा ।। ॐ भूः भुवः स्वः तपः सत्यं यशः श्रीः ऊर्क् इड् ओजः तेजः (मह०।ज० नः ८)
पुरुषः धर्मः शिवः इत्येतैः पंचदशभिर्मंत्रैः प्रतिदिनं क्रमेणैकैकं ग्रासभाजनगतमभिमंत्र्य मनस्तानमः
स्वाहेति वा रावीनुमंत्र्यैकैकं गृहीत्वा भक्षयेत्। तत्राद्यदिने एकग्रासभक्षणे प्राणाय स्वाहे [redacted] त्या दयः पंचापि मंत्रा भवेयुः। द्वयोर्ग्रासयोस्त्रिभिर्मंत्रैरेकं द्वाभ्यामपरं। १०
त्रिषु ग्रासेषु द्वाभ्यां द्वाभ्यां द्वाएकेन तृतीयः। चतुर्षु द्वाभ्यामाद्यमेकैकेनापरान्। पंचसु तु सुगमं। पंचभ्यो

धिकाग्रासाः तूष्णीं भक्षयितव्याः। अत्र नियमाः मूलवाक्येभ्यः प्रतीतव्याः। समाप्तौ यथाशक्ति ब्राह्म
णान्भोजयित्वा गोद्वयं वस्त्रयुग्मं च दक्षिणां दत्वा ।। शक्तौ यथाशक्ति द्रव्यादि दत्वा यस्य स्मृत्या च नामो
क्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमिति पठन्कर्मेश्वरार्पणं कुर्यादित्येष चां
द्रायणव्रतप्रयोगः।। ।।अथ सोमायनमाह मार्कंडेयः।। गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्।
स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्वयात्। स्तनेनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेत्। एतत्सोमायनं नाम
व्रतं कल्मषनाशनमिति। इदमपि चांद्रायणधर्मकमेवेति विज्ञानेश्वरः। अत्र सर्वत्र व्रतकल्पो विस्तरो
ग्रंथबाहुल्यभियानोपात्तः।। ।।इति श्रीविद्वन्मुकुटमहामणिश्रीभारद्वाजमहादेवभट्टात्मजदिवाकरवि
रचिते धर्मशास्त्रसुधानिधौ प्रायश्चित्तमुक्तावलीप्रकाशे कृच्छ्रादिस्वरूपं।। ।।अथोक्तप्रकारेण प्रा
जापत्यादिक्रियाशक्तानां तत्प्रत्याम्नायाः प्रदर्श्यंते। अपरार्के। अथातोनुग्रहान्वक्ष्ये दुर्बलस्या[illegible]
लिनः। यत्कृत्वा मुच्यते पापात् उरगः कंचुकाद्यथा। पराशरः। कृच्छ्रः सुतं तु गायत्र्या उदवासस्तथैव च। धेनु
प्रदानं विप्राय सममेतच्चतुष्टयं। उदवासो होरात्रमिति। महार्णवे चतुर्विंशतिमते। कृच्छ्रो दशसुतं चैव प्राणा यु २
यामशतद्वयं। तिलहोमसहस्रं तु वेदपारायणं तथा। विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च। अन्या

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली वापावनीकाचित्समान्या दुर्मनी विषादृति। अपरार्के। समिद्धुतंहविर्धान्यं तिलान्यामारुताशनः। कृत्वाद्वा
११ दशसाहस्त्रं गायत्र्या कृच्छ्रमाप्नुयात्। द्वादशभिरधिकं सहस्त्रं द्वादशसहस्त्रं। द्वादशसहस्त्रमेव द्वादशसा
हस्त्रं। पराशरः। कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयं। पुण्यतीर्थेऽनार्द्रशिरः स्नानं द्वादशसंख्यया।
पुण्यतीर्थे स्नात्वा केशांश्शोषयित्वा पुनः स्नायात्। एवं द्वादशवारं कृते प्राजापत्यः संजायत इत्यर्थः।
मार्कंडेयः। प्राजापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीं। धेनोरभावे दातव्यं तुल्यं मूल्यं न संशय इति। तुल्य
शास्त्रोक्तं। संवर्त्तोपि। गवामभावे दातव्यं मूल्यं तुल्यं न संशय इति। मूल्यमुक्तं माधवीये ब्रह्मपुराणे। ग
वामभावे निष्कं वा तदर्धं पाद एव वेति। माषमारभ्य निष्कांतं रूप्यसंज्ञामाह योगी। द्वे कृष्णले रूप्यमाषो
धरणं षोडशैव ते। शतमानं तु दशभिर्धरणैः पलमेव तु। शतमानं पलशब्दो पर्यायो। निष्कं सुवर्णाश्च
त्वार इति।। अस्यार्थमाह विज्ञानेश्वरः।। पूर्वोक्ताः सुवर्णाश्चत्वारः सुवर्णा रूप्यनिष्क इति। तथा च सु
वर्णचतुष्टयसमानं रजतं निष्कमित्यर्थः। ज्योतिःशास्त्रे प्रकारांतरेण निष्कमुक्तं। वराटकानां दशक
द्वयं यत्सा काकिणी ताश्च पणाश्चतस्त्रः। ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्क इति। ११
मूलपाणौ तु मूल्यांतरमभिहितं षट्त्रिंशन्मते। धेनुः पंचभिराढ्यानां मध्यानां त्रिपुराणिका। कार्षा

पणो कमल्याहि पवित्राणां प्रकीर्तितेति। दरिद्राणामित्यपि क्वचित्पाठः। पुराणान्नाम द्वात्रिंशत्कृष्णलैसमतो ल१
लितं रूप्यं। द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः। ते षोडश स्याद्धरणं पुराणश्चैव राजतमिति विज्ञानेश्व
रपरि धृतस्मृतेः। कर्षकृतः आपणोमवहारः कर्षापणः अन्येषामपि तिदीर्घतायां कार्षापणः। कर्षः षो
डशमाषकाः। ते षोडश स्युः कर्ष इति कोशात्। तथा च धरणपुराणकार्षापणशब्दा अन्योन्यपर्याया भावे
ते। यत्तु हेमाद्र्यादिलिखितं नारदवचनं कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्त्तते। पणैर्निबद्धः पूर्व
स्यां षोडशैव पणाः स्त्रियामिति। तत्राप्येतावदेव रजतं बोध्यं। मत्स्याध्याये कात्यायनः। द्वात्रिंशत्पणिकाग
वश्चतुःकार्षापणो वरः। वृषषट्कार्षापणका अष्टावनडुहि स्मृताः। दश कार्षापणा धेनोरश्वे पंचदशैव त्विति।
अपरार्के। उपोष्य श्रद्दध्यायुक्तस्तिलपात्राणि धर्मतः। द्वादश ब्रह्मवादिभ्यः प्राजापत्येन तत्समं। तिलपात्र
परिमाणं कूर्मपुराणे। तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं। ताम्रपात्रं दशपलं जघन्यं परिकीर्तितं। द्वि
गुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतमिति। गोमूत्रेण समायुक्तं यावकं चोपभोजयेत्। कृच्छ्रमेकाहिकं
प्रोक्तं दृष्टमंगिरसा स्वयं। वसिष्ठः। अपि चेत्स्वरतेकर्तुं दिवसं मारुताशनः। रात्रौ स्थित्वा जले जपुषः प्राजा
पत्येन तत्समं। पत्येनतत्सममिति। अपरार्के चतुर्विंशतिमते। प्राजापत्ये तु गामेकां दद्यात्सांतपने द्वयं। पराके तत्सकृच्छ्र

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ तुतिस्त्रस्तिस्त्र गुगास्तथेति। सांतपने प्रकांतरे षट्त्रिंशन्मते। परौति [redacted] कृच्छ्रस्थाने कृच्छ्रत्रयं कतमा १
चरेत्। सांतपनस्य चाप्यर्द्धमशक्तो व्रतमाचरेत्। स्मृत्यर्थसारे तु तप्तकृच्छ्रे तु मार्कंडेयः। प्राजापत्य
१२ समाधेनुस्तद्वयं तप्तकृच्छ्रक इति। पराकेपि विशेषमाह स एव। पराके तु सुवर्णं स्याद्धेमशृंगी तथैव वेमिति।
पराके तु सुवर्णं धेनुद्वयमूल्यसममिति श्रीमातामहचरणाः। सुवर्णं धेनुं लक्षयतीत्यपराकैः। चांद्रा
यणं मृगारेष्टिः पवित्रेष्टिस्तथैव च। मित्रविंदा पशुश्चैव कृच्छ्रो मासत्रयं तथा। तिलहोमायुतं चैव पराक
द्वयमेव च। गायत्र्यास्तु लक्षमेकं तु सामान्याकृच्छ्रस्येति स्मृतिरिति। षट्त्रिंशन्मते। उपवासस्तु गायत्र्याः सह
स्रं विप्रभोजनं। प्राणायाम द्वादशौ च सममेतच्चतुष्टयं। पिपीलिकायवमध्यचांद्रायणविषये चतुर्विंश
तिमते। अशेषे चांद्रायणे देयाः प्रत्याम्नायविधौ सदेति। धेनवद्वति विशेषः। यतिचांद्रायणे द्व हद्विसुः। चां विषय ८
चांद्रायणमकुर्वाणाः कुर्युः कृच्छ्रचतुष्टयमिति। ऋषिचांद्रायणविषयेपि स एवाह। चांद्रायणपराकाभ्यां
निष्क्रीतिं यो न शक्नुयात्। स करोत्यात्मशुद्ध्यर्थं प्राजापत्यं पंचकमिति। शिशुचांद्रायणविषये मदन स्य३
तु२ रत्ने स्मृतौ। प्राजापत्यं गामेकामतिकृच्छ्रद्वयं स्मृतं। चांद्रायणे पराके च तिस्रो गा दक्षिणा तथेति। १२
अपरार्के। अतिकृच्छ्रे पराके च तप्तकृच्छ्रे तथैव च। प्राजापत्यत्रयं कुर्यात्कृच्छ्रे गोमिथुनं भवेत्। स्मृत्यर्थ

सारे। मासोपवासस्थाने पंचदश प्राजापत्या इति। चतुर्विंशतिमते। धर्मनिष्ठास्तपोनिष्ठाः कदाचित्पाप
मागताः। जपहोमादिकं तेभ्यो विशेषेणाभिधीयते। नामधारकविप्राये मूर्खा धर्मविवर्जिताः। कृच्छ्रचां
द्रायणादीनि तेभ्यो देयानि दोषतः। धनिना दक्षिणा देया यथ त्वविहितानुया। एवं नरविशेषेण प्रायश्चि
त्तानि दापयेदिति। व्यासः। श्रीकामः पुष्टिकामश्च स्वर्गकामस्तथैव च। देवताराधनपरस्तथा कृच्छ्रं समा
चरेत्। रसायनानि मंत्रांश्च तथा चैवौषधानि च। तस्य सर्वाणि सिध्यंति यो नरः कृच्छ्रकृद्भवेत्। वैदिकानि
च सर्वाणि यानि काम्यानि कानिचित्। सिध्यंति सर्वदानानि कृच्छ्रकर्तुर्न संशय इति॥ ॥ अथ कृच्छ्रा
दिस्थाने तीर्थप्रत्याम्नायाः॥ स्मृत्यर्थसारे। वेदे तीर्थे च देवे च दैवज्ञे चौषधे गुरौ। यादृशी भावना यस्य
सिद्धिर्भवति तादृशी। क्षेत्राण्यापः सुरा विप्रा गौर्गुरुस्तीर्थमुच्यते। निवासहोमस्नानार्चा तोषपोषैः पु
नाति तत्। ननु तीर्थानां पापनाशकत्वे किं मानमिति मूर्खप्रलपितनिवृत्त्ये विद्वज्जनमनःसंतोष
हेतवे च स्मृत्यर्थसारे लिखितं तीर्थप्रत्याम्नाये किंचिन्मूलमुच्यते। ब्रह्मविष्णुशिवादेवा इंद्रोग्निर्यमनि
र्ऋती। वरुणः पवनो यक्षः सोमः सूर्यो ग्रहोगणः। एते स्वयं तीर्थभूतास्तीर्थैः शुद्धीरदर्शयन्। मनवो वसवो रु
द्रा आदित्या मरुतोनलाः। विश्वेदेवास्तथा साध्या नागा यक्षाश्च राक्षसाः। इत्याद्यनेक देवाश्च तीर्थैः सिद्धि

Indira Gandhi National Centre for the Arts

प्रा॰मु॰ली॰ मवाप्नुवन्। हरिश्चंद्रो नलो वैन्यः पुरुकुत्सः पुरूरवाः। सगरः कार्त्तवीर्यश्चास्तीर्थै राज्यमवाप्नुवन्। इंद्र
भैरवरामाद्या योगेनमाद्यामहर्षयः। ब्रह्महत्यादिपापानि तीर्थैरेवव्यपोहयन्। विश्वामित्रः सपुत्रस्तु महा
१३ पापं व्यपोहयत्। सुतीर्थतपसो ब्राह्मण्यमाप्यवासिष्ठशापतः। त्रिशंकुमपि चांडालं विप्रं कृत्वाप्ययाजयत्।
तं तु तेनैव देहेन स्वर्गलोकमवेशयत्। अनुपोष्य त्रिरात्रादि तीर्थान्यनुपगम्य या। अदत्वा कांचनं गां च द
रिद्रो नाम जायते। तताप वासकृच्छ्रादीन् कृत्वा तीर्थसेवनं। अदत्वा चाश्ववस्त्रादि दरिद्रो जायते ध्रुवं।
आदित्यपुराणे। पांडवै राज्यलाभाय दुरितोपशमाय च। श्रीकृष्णनारदव्याससश्रीकंठद्विजरोमशैः। मार्कं
डेयपुलस्त्याजसप्तर्षिप्रमुखैस्तथा। द्वादशाद्वादशाब्दानि कृच्छ्राण्यादाय भक्तितः। तीर्थैः कुर्वन्नित्यादि
पुराणेश्रूयते कथा। विश्वनाथेन पतितानि व्योजेन महात्मना। विमुक्त्यब्दाश्च तावंतं सर्वदा तीर्थसे
विना। ब्रह्मस्मृतिपुराणज्ञैर्ब्रह्मभिः सहशौरिणा। कृत्स्नं तीर्थफलं प्रोक्तं गोदानं कलुसाम्यतः। द्वापरांते
पुराणानि व्याससत्वल्पायुषां नृणां। हिमवद्दक्षिणे देशे संकोच्यैवव्यचारयत्। भक्तप्रेतपिशाचाश्चपित
रो ब्रह्मराक्षसाः। अद्यापि प्रचरंत्येव कृष्णार्थं तीर्थमथैवतु। सूतः श्रद्धः पुराणज्ञस्तीर्थैर्विप्रो भवत्ततः। १३
शिष्यान्स्वेक्षरां कानि तीर्थानि कुरुते तिवे। ते विश्वकर्मणः प्राचुर्विश्वकर्मा सर्ववित्। शिष्यैः स्वस्माक्ष
चे॰

क्षरां कानि सर्वतीर्थान्यकारयत्। अद्यापि कृष्णवर्णाकार दृश्यंते तत्रतत्र च। लिप्यंकानामविज्ञानेप्र
कारांतरमुच्यतइति॥ अत्र स्मृतिसंग्रहस्मृत्यर्थसाराद्युक्तप्रकारानुसारी प्रकारः प्रदर्शते॥ तत्र
५३ संकल्पपूर्वकं प्रोषषष्टियोजनागतस्य भागीरथ्यां स्नानं षडब्दसमं। अत्र यात्रायां योजनद्वयं योजन
स्यार्द्धकृच्छ्रवृद्धिः परिकल्पनीया। षष्टियोजनागतस्य प्रयागस्नानं द्वादशाब्दसमं। गंगाद्वारे गंगासा
गरे चैवतत्। गंगास्नानार्थं षष्टियोजनागतस्य षडब्दत्वाद् दशयोजनागतस्याब्दप्रायश्चित्तं भवति। [redacted] त्यादि वद्
कल्पनीयं। त्रिंशतियोजनागतस्य यामुनं स्नानं त्र्यब्दकृच्छ्रतुल्यं। तदैव मथुरायां द्विगुणं। चत्वारिंशद्योजना
गतस्य सरस्वतीमज्जनं चतुरब्दतुल्यं। प्रभासे द्वारावत्यां च द्विगुणं। यमुनासरस्वत्योर्यात्रायोजनद्वयो
पादकृच्छ्रवृद्धिः परिकल्पनीया। दृषद्वती शुतुद्री विपाशा वितस्ता त्रावती मरुद्वृधा मधुमती पयस्वि
नी घृतवत्यादि देवनदीषु पंचदशयोजनागतस्य त्रिंशत्कृच्छ्रतुल्यं। चंद्रभागा वेत्रवती सरयू गोमती देविका
५३ कौशिकी नित्यजला मंदाकिनी सहस्रैका पौनःपुन्या पूर्णा पुण्या बाहुदा गंडकी वारुण्यादि देवनदीषु षोडश
दश२ उपाकृच्छ्रसमं पंचयोजनागतस्य। एतासु महानदीष्वन्योन्यसंगमे त्रिगुणं। अन्यासमुद्रगासु योजनागतस्य ३०
कृच्छ्रपादतुल्यं। अनुक्तस्थलेषु यात्रायोजनसंख्यया कृच्छ्रसंख्या ध्येया। महानदेषु महानद्यर्द्धफलं विज्ञे

Indira Gandhi National Centre for the Arts

प्र०मु०ली० यं। शोणाख्यमहानदे गंगादिफलं। चतुर्विंशतियोजनागतस्य नर्मदावगाहनं चतुर्विंशतिकृच्छ्रतुल्यं। कु
१४ शिकासंगमे द्विगुणं। शुक्लतीर्थे चतुर्गुणमित्यादि ग्रंथांतरतोवगंतव्यं नात्र विस्तरः। देवलः। अभिग
म्यच तीर्थानि पुण्यान्यायतनानि च। नरः पापात्प्रमुच्येत ब्राह्मणानां तपस्विनां। सर्वा समुद्रगाः पुण्याः
सर्वे पुण्या नगोत्तमाः। सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रयाः। जमदग्निः। तीर्थे तु पादकृच्छ्रः स्यान
द्यां त्वर्द्धफलं लभेत्। द्विगुणं तु महानद्यां संगमे त्रिगुणं भवेदिति॥ ॥इति कृच्छ्रादि प्रत्याम्नायानि रू
पिताः॥ ॥अथ परिषत्॥ तत्रादौ परिषदनुपयुक्तान्द्विजानाह पराशरः। अव्रतानाममंत्राणां जाति
मात्रोपजीविनां। सहस्रशः समेतानां परिषत्त्वं न विद्यते। प्राजापत्यादि व्रतहीना अव्रताः। अनधी
तवेदा अमंत्राः। चतुर्विंशतिमते। वेदपारमनीता ये धर्मशास्त्रविवर्जिताः। परिषत्त्वं न तेषां स्यान्नाहि
कानां विशेषतः। अनाहिताग्नयो ज्ञानाः केवलावेदपारगाः। पिशुनाः क्रूरकर्माणः परिषत्त्वं न विद्य
म३ ते। पराशरः। यद्वदंति तमोमूढा मूर्खा धर्ममतद्विदः। तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति। अज्ञात्वा ध २४
र्मशास्त्राणि प्रायश्चित्तं ददाति यः। प्रायश्चित्ती भवेत्पूतः किल्बिषं परिषद्व्रजेदिति। अंगिरा अपि। यस्तु
दत्तमजानद्भिः प्रायश्चित्तं समागतैः। तत्पापं शतधा भूत्वा दातॄनेवोपतिष्ठतीति। पराशरः। प्रायश्चित्तं

प्रयच्छंति ये द्विजा नामधारकाः। ते द्विजाः पापकर्माणः समेता नरकं ययुरिति। ययुः यांतीत्यर्थः। नामधार
कस्वरूपमाह स एव। यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। ब्राह्मणस्त्वनधीयानस्त्रयस्ते नामधारका
इति। उपयुक्तानाह मनुः। त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे पर्षदेषा दशा
वरा। हैतुको मीमांसकः। अंगिराः। एकविंशतिसंख्यातैर्मीमांसान्यायपारगैः। वेदांगकुशलैरेव पर्ष य४
त्तु प्रकल्पयेत्। यमः। एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्मपाठकाः। स धर्म इति विज्ञेयो नेतरेषां सहस्र
शः। परिषदुपसंपत्तिमाहांगिराः। अतऊर्ध्वं प्रवक्ष्यामि उपस्थानस्य लक्षणं। उपस्थितो हि न्यायेन व्रता
देशनमर्हति। सद्यो निःसंशयपापेन भुंजीतानुसंस्थितः। भुंजानो वर्द्धयेत्पापं पर्षद्यत्र न विद्यते। संशये तु न पं५
भोक्तव्यं यावत्कार्यविनिश्चयः। प्रमादश्च न कर्तव्यो यथैवासंशयस्तथा। कृत्वा पापं न गूहेत गूह्यमानं वि
वर्द्धते। स्वल्पं वाथ प्रभूतं वा धर्मविद्भ्यो निवेदयेत्। ते हि पापकृते वैद्या हंतारश्चैव पाप्मनां। व्याधितस्य
यथा वैद्या बुद्धिमंतो रुजापहाः। प्रायश्चित्ते समुत्पन्ने ह्रीमान्सत्यपरायणः। मृदुरार्जवसंपन्नः शुद्धिं
याचेत मानवः। सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। क्षत्रियो वाथ वैश्यो वा पर्षदं ह्युपतिष्ठति।
उपस्थाय ततः शीघ्रमार्तिमान्धरणीं गतः। गात्रैश्च शिरसा चैव न च किंचिदुदाहरेदिति। क्षत्रिय वै

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ द्वयग्रहणमधिकारमात्रोपलक्षणं। पराशरः। पापं प्रख्यापयेत्पापी दत्वा धेनुं तथा वृषमिति। इदं गो

९५ वृषदानं प्राजापत्यार्धप्रायश्चित्ते। प्राजापत्यवधिके विष्णुराह। पादप्रत्नेनवस्त्रदानं कृच्छ्रार्द्धे तिलकांच

नं। पादहीनेतु गामेकां कृच्छ्रे गोमिथुनं स्मृतमिति। अंगिराः। वचः पूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः।

पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्रहं। नहि तेषामतिक्रम्य वचनानि महात्मनां। प्रज्ञानैर्विवि

दृग्भिः शक्यमन्यत्प्रभाषितुमिति। सएव। ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितं। वृद्धाः पृच्छन्ति किं का

र्यमुपविश्याग्रतः स्थितं। किं ते कार्यं वदास्माभिः किं वा मृगयसे द्विज। तत्वतो ब्रूहि तत्सर्वं सत्यं हि गति

रात्मनः। यदि चेद्रक्षसे सत्यं नियतं प्राप्स्यसे शुभं। यथागतोस्य सत्येन न त्वं शुध्यसि कर्हिचित। एवं तैः

समनुज्ञातः सर्वं ब्रूयाद्दोषतइति। उपदेष्टा स्मृतः पर्षदंतर्गतेन केनैव कार्यः। आहूय श्रावयेदेकः पर्षदायो

नियोजितः। शृण्वंतु भोइदं विप्रयच्च आदिशयति व्रतं। तत्तश्चलेन कर्त्तव्यमन्यथा तेवथा भवेदित्यंगिरोव

चनात। देवलः। प्रायश्चित्तं यथोद्दिष्टमशक्त्या तदशक्तात्पुनः। दुष्यलेनुग्रहश्चापि द्विजानुग्रहकारणात्।

पूजाऽनुग्राह्यस्य प्रज्यतं। अनुग्रहो दया। एकोनार्हति तत्कर्तुं मन्त्र्यानोप्यनुग्रहं। धर्मज्ञा बहवो विप्राः ९५

कर्त्तुमर्हत्यनुग्रहं। स्नेहाद्वाथ दिना लोभाद्भयादज्ञानतोपि वा। कुर्वंत्यनुग्रहं येतु तत्पापं तेषु गच्छतीति।

१ तस्मादार्त्तं समासाद्य ब्राह्मणं च विशेषतः। ज्ञानद्भिर्दुर्ग्रंथानेनभाव्यं तु पराङ्मुखैः। अनार्चितैरनाहूतैरपृष्टैश्चैव संसदि। प्रायश्चित्तं नदातव्यं

अंगिराः। आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानंतोन प्रयच्छंति ते त्वेषां सम भागिनइति।

प्रायश्चित्तं च देशकालादिज्ञात्वा देयमित्याह बौधायनः। शरीरबलमायुश्च वयः कालं च कर्म च। समीक्ष्य ध

र्मविद्बुध्या प्रायश्चित्तं प्रकल्पयेदिति। प्रायश्चित्तदेशमादिशति पराशरः। प्रायश्चित्तं सदा दद्याद्देवतायतना

ग्रतइति। इदं च पुण्यक्षेत्रतीर्थादेरुपलक्षणं। प्रायश्चित्तदानोत्तरं प्रायश्चित्तिनि दृष्टिपूर्णां जप्यमाह हारीतः। प्रा

यश्चित्तं तु निर्दिश्य कथं पापात्प्रमुच्यते। यत्पवित्रं विजानीयाज्जपेद्वा वेदमातरं। वेदमाता गायत्री॥ ॥अथ

निकर्त्तव्यतामाह विष्णुः। सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकं। ग्रहणं संप्रवक्ष्यामि प्रायश्चित्तं चिकीर्षितं।

दिनांते नखरोमादीन्प्रवाप्य स्नानमाचरेत्। भस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः। मलापकर्षणं कार्यं

बाह्यशौचविशुद्धये। दंतधावनपूर्वेण पंचगव्येन संयुतं। व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने। आचम्य

ततः परं मौनी ध्यायन्दुष्कृतमात्मनः। मनः संतापनं तीव्रमुद्वहेच्छोकमंततइति। व्रतहोमश्चोषरूपं पंचगव्यप्राश

मिति महार्णवे। व्रतनाम प्रायश्चित्तसंकल्पइति माधवः। जाबालिः। आरंभे सर्वकृच्छ्राणां समाप्तौ च वि

शेषतः। आज्येनैव हिरण्यागतेनो जुहुयाद्व्याहृतीः पृथक्। श्राद्धं कुर्याद्व्रतांते च गोहिरण्यादिदक्षिणामिति।

अत्र हिरण्यादिग्रहणाद्दशदानान्येव दक्षिणा। अत्र च कारो व्रतादावनुक्तं श्राद्धं समुच्चिनोति। अस्मिन्प्र

२ग्रा

...कृत्यतः

३ ...त्तः। ...र्य... ...ति। ...

प्रा०मु०ली० उद्देवतामाह विष्णुः। विधायवैष्णवं श्राद्धं सांकल्प्यं निजकाम्यया। धेनुं दद्यात् द्विजेभ्योथ दक्षिणां च यथा
१६ शक्ति तद्गतिश्रातातपवचनात्। सांकल्पश्राद्धं तु केषांचित्पुरोनाम्नि हृत्तिकृत्का श्राद्धचंद्रिकाप्रका थ०२
शोऽस्माभिः। वसिष्ठः। कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशादि वापयेत्। अक्षिरोमशिखावर्जमिति। व्रतरू
पाणां प्रायश्चित्तरूपाणां केवलं पुण्यार्थं कृच्छ्रादिकरणे वपनं नास्तीति भावः। अत्र कृच्छ्रग्रहणाद् द्वादशा
हसाध्य प्रायश्चित्ताधिकारिण्येव वपनं भवति न तु न्यूने पादकृच्छ्राधिकारिणि। हारीतः। राजा वा
राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्। केशानां रक्षणार्थं तु द्विगुणं
व्रतमाचरेत्। द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेदिति। अत्र राजादयउपलक्षणार्थाः। यत्र रा
ना८ जादीनामप्येवमन्येषां किमु वक्तव्यमिति कैमुतिकन्यायात्। एतच्च द्विगुणव्रतादिकं महापातक्यादिव्यति
रिक्तस्थले वपनानिषेधः। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनं। ऋते महापातकिनो गोहंतुश्चावकीर्णि
तइति विशेषस्मरणात्। गवादिवधकर्तुः सभर्तृकायाश्च वपनमग्रे तत्प्रायश्चित्ते वक्ष्यते। प्रायश्चित्तां
गवपनं निषिद्धाहेपि कार्यं। क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवं। पित्रादिमृतियात्रासु प्रायश्चित्ते १६
पितीर्थकद्भुतिस्मृत्यंतरात्। क्षौरनिषिद्धकालाः तिथ्यर्कप्रकाशे। [redacted] एवं कृतमस्मस्नानेतिक
१प्रदर्शिता

प०१

र्तव्यता लिंगपुराणे। ईशानेन शिरो देशो मुखं तत्पुरुषेण तु। हृदोदेशमघोरेण गुह्यं वामेन सुव्रत। सद्येन
पादौ सर्वांगं प्रणवेन तु शोधयेदिति। अत्रेशानपदेन ईशानः सर्वविद्यानामित्यादयो मंत्रा ग्राह्याः।
ते च यजुः शाखायां प्रसिद्धाः। कश्चित्तु ईशानाय नम इति प्रयोज्यमिति ब्रुवते। गोमयस्नानस्याह विष्णुः।
अग्रमग्रमिति स्मृत्वा मानस्तोके नवा पुनः। गोमयेन लेपयेत्प्राज्ञः सोदके नानुदर्शितेरिति कूर्मपुराणे।
गोमयस्य प्रमाणं तु येनांगं लेपयेत्ततः इति। अथ मृत्स्नानविधिः॥ शिवपुराणे। अश्वक्रांते इति स्मृत्वा मं
त्रेणानेन मृत्तिकां। उद्धृतासि वराहेणेति मंत्रेण सुसमाहितः। नमो मित्रस्येति ऋचा दर्शयित्वा च भानवे।
आरोहन्निति गात्राणि समालभ्य द्विराचमेत्। जमदग्निरपि। अश्वक्रांते इति वै शुद्धां मृत्तिकामाहरेच्छ
नैः। नमो मित्रस्येत्या [redacted] दित्याय दर्शयेत् समदौकरौ। गंधद्वारामिति जप्त्वा स्वान्यंगान्यनुलेपये
त्। मृत्तिकापरिमाणं कूर्मपुराणे। मृत्तिका च समुद्दिष्टा सार्द्रामलकमात्रिकेति। मृत्स्नानं गात्रक्रममा न२
ह याज्ञवल्क्यः। मृद्भिरद्भिश्च गात्राणि क्रमशस्त्ववनेजयेत्। शीर्षाद्यानाभि सर्वाणि स्मरंविष्णुमना
मयं। कटिं वस्तिमूरू जंघे च चरणौ च त्रिभिस्त्रिभिः। तथैव हस्तावाचम्य नमस्कृत्य जलं ततः। यत्किंचे
दमिति मंत्रेण नमस्यत्स्वयमांजलिरिति। अथ वारिस्नानप्रकारो ब्रह्मांडपुराणे। आपो अस्मानिति सु

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ त्वा भास्कराभिमुखस्थितः। इदं विष्णुर्जपित्वा च प्रतिस्रोतो निमज्जतीति। पंचगव्यस्नानमंत्रा
१७ ब्रह्मकूर्चलक्षणे वक्ष्यमाणास्त एव बोध्याः। अपरार्के पुराणे। आपो हि ष्ठेति सूक्तं तु शुद्धवत्यो घमर्षणं।
शंवत्यः स्वस्तिवत्यश्च पावमान्यो घमर्षणं। सर्वत्रैवं प्रयुंजीत कृच्छ्रादि व्रतमाचरन्। पराशरः। प्रायश्चि
त्तेषु सर्वेषु कुर्याद्ब्राह्मणभोजनं। शक्त्या वित्तानुसारेण प्रायश्चित्तानुरूपतः। आसहस्राद्द्वादश
द्वादशान्तं तमथ याजयेत्। ओंकाराद्यं तथा व्याहृत्या गायत्रीमथवा पुनः। यमः। प्रायश्चित्ते व्यवसिते कर्ता
यदि विपद्यते। शुद्धस्तदहरेवासाविह लोके परत्र चेति। व्यवसिते आरब्धे। विपद्यते म्रियते। छाग
लेयः। सर्वव्रतं गृहीत्वा तु नाचरेत्काममोहितः। जीवन्भवति चांडालो मृतः श्वा चाभिजायत इति। भ
द्राह त्याद्यंतरेण सर्वपापमपनिनीषुः षडब्दं प्रायश्चित्तं कुर्यात्। तथा च चतुर्विंशतिमते। जन्मप्रभृ
ति पापानि बहूनि विविधानि च। अर्वाक् तु भ्रूणहत्यायाः षडब्दं कृच्छ्रमाचरेत्। प्रत्याम्नायगर्वाद्यंसा
गरीति धनिनां त्रीन्। तथाष्टादशलक्षाणि गायत्र्या वा जपेद्बुध इति॥ ॥अथ सर्वसाधारणप्रायश्चित्त
प्रयोगः॥ ॥कर्ता सर्वा प्रायश्चित्तसामग्रीं संपाद्य रिक्तायां तिथौ वन्यस्मिन्वा पुण्ये क्वचिद्दिने ऽस्य प्रा
ह्ने वा पूर्वोक्तलक्षणयुक्तान्विप्रान्पर्षत्त्वे नोपवेश्य समाहितमना भूत्वा क्लिन्नवासा अभुंजानः पर्षद ११८

पदाक्षिणीकृत्य मासपक्षाद्युल्लिख्य करिष्यमाणप्रायश्चित्तांगत्वेन इदं गोनिष्क्रयीभूतं द्रव्यं सभ्येभ्यो दातु
महमुत्सृजे इति संकल्प्य यथाशास्त्रोक्तगोवृषमूल्यं पर्षदे दत्वा साष्टांगं मौनं नमस्कुर्यात्। ततस्ते विप्राः
किं ते कार्यं यदस्माभिः किं वा मृग्यसे द्विज। तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः। यदि चेदृक्षसंस
त्वं नियतं प्राप्स्यसे शुभं। यथागतोऽस्य सत्येन त्वं शुभोऽसि क्वचिदिति पृष्टः मुकशर्मशर्मणो मे जन्म
प्रभृत्यद्य यावज्ज्ञानाज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टा
स्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्री
करणजातिभ्रंशकरप्रकीर्णकपातकानां मध्ये संभावितानां पापानां निरासार्थमनुग्रहं कृत्वा प्राय
श्चित्तमुपदिशंतु भवंत इत्युक्त्वा प्रणमेत्प्रार्थयेच्च। तत्र मंत्राः। सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः।
श्चित्तमुपदिशंतु भवंत इत्युक्त्वा प्रणमेत्प्रार्थयेच्च। तत्र मंत्राः। सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः।
मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं। प्रसादः क्रियतां म
ह्यं शुभानुज्ञां प्रयच्छत। पूज्यैः कृतः पवित्रोऽहं भवेयं द्विजसत्तमा इति। अनंतरं मामनुगृह्णंतु भवंत
इति प्रणमेत्। ततः कर्ता मासपक्षाद्युल्लिख्य करिष्यमाणप्रायश्चित्तांगत्वेन निबंधप्रज्ञासभ्यानुवा
दकप्रज्ञां करिष्य इति संकल्प्य चंदनादिना संपूज्य निबंधप्रज्ञात्वेन यथाशक्ति द्रव्यं संकल्प्यानुवादका
२ ततस्ते उत्तममध्यमाधमपक्षान्विचार्य यथासामर्थ्यं पापानुसारेण प्रायश्चित्तमुपदिशेयुः।

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ यापापानुसारेण भक्तिरूपां दक्षिणां दद्यात्। ततोनुवादकः कथयेत्। कर्त्तास्वस्थचित्तः सन् शृणुया
१८ त्। तव अमुकशर्मणः जन्मप्रभृत्यद्ययावत् ज्ञानाज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमान
सिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरी
करणमलिनीकरणापात्रीकरण जातिभ्रंशकरप्रकीर्णकपातकानां मध्ये संभावितानां पातकानां नाशा
र्थं त्वं षडब्दप्रायश्चित्तं गोनिष्क्रयद्रव्यदानप्रत्याम्नायद्वारा उपदिश्यते तस्मिन्यथाशक्तिप्राच्यो
दीच्यांगसहिते आचीर्णे तव शुद्धिर्भविष्यति तेन त्वं कृतार्थो भविष्यसीति। कर्त्ता च भवदनुग्रहादि
दीच्यांगसहिते आचीर्णे तव शुद्धिर्भविष्यति तेन त्वं कृतार्थो भविष्यति ते तं पुनः प्रपितामहचरणाः। अथ ब्रह्मदोस्य
वदेत्। अयं चोपदेशस्त्रिवारं कार्य इति भंत्योषिपदुलावस्मन्मातुः प्रपितामहचरणाः। अथ ब्रह्मदोस्मि
ब्दमित्याद्युक्तं। प्रत्याम्नायांतरे पि तथा। गोनिष्क्रयः प्रदर्शितो वा कः। तत्र सुवर्णमन्त्रास्को रूप्यं बोध्यं।
नतः कर्त्ता देशकालौ निर्दिश्य अमुकशर्मणो मम जन्मप्रभृत्यद्ययावत् ज्ञानाज्ञानकामाकामसकृदस १८
कृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपा
तकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरण जातिभ्रंशकरप्रकीर्णकपातकानां
मध्ये संभावितानां पातकानां निरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सभ्योपदिष्टममुकप्रायश्चित्तं प्राच्यो
२२

दीच्यांगसहितममुकप्रत्याम्नायेनाचरिष्य इति संकल्प्य। शिरसि हस्तं निधापयन्यानि कानि च पापा
नि ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहमिति मंत्रं पठन्। शिखाकक्षोपस्थ
रहितं केशादीन्वापयित्वा आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि
वनस्पते इति मंत्रेणाभिमंत्रितेन द्वादशांगुलप्रमाणेनापामार्गादिदंतकाष्ठेन प्राङ्मुखो मुखदुर्ग
धिनाशाय दंतानां च विशुद्धये। ष्ठीवनाय च गात्राणां कुर्वेहं दंतधावनमिति मंत्रेण दंतान्धावयित्वा
प्रायश्चित्तांगत्वेन भस्मस्नानं करिष्य इति संकल्प्य भ
अप्सु निमज्ज्य भस्मादिस्नानं कुर्यात्। तत्रोक्तं। प्रायश्चित्तांगत्वेन भस्मस्नानं करिष्य इति संकल्प्य भ
स्मादाय ईशानः सर्वविद्यानामित्यादिमंत्रैरथवा ईशानाय नमः तत्पुरुषाय नमः अघोराय नमः
वामदेवाय नमः सद्योजाताय नम इति प्रणवेन शिरोमुखहृदयगुह्यपादसर्वांगेषु विलिप्य स्नात्वा।
प्रायश्चि॰ गोमयस्नानं॰ संकल्प्य गोमयमादाय त्वा हत्यास्त्रिधा विभज्य आदित्याय प्रदर्श्याग्रमग्रं
चरंतीनामोषधीनां वने वने। तासामृषभपत्नीनां पवित्रं कायशोधनं। तन्मे रोगांश्च शोकांश्च नुद गोम
य सर्वदेति मंत्रेण गंधद्वारामिति मंत्रेण वा शिरःप्रभृति पादांतमनुलिप्य स्नात्वाचम्य। प्रा॰ मृत्ति
कास्नानं॰ संकल्प्य। बलिश्चेति भूमिं प्रार्थ्य मावो रिषत्खनिता इति खनित्वा स्योना पृथिवी निगृही

Indira Gandhi National Centre for the Arts

ग्रीवायां॥ आंत्रेभ्यस्वाहेति ४

प्रा०मु०ली० त्वा आयने ते ति दूर्वामादाय गायत्र्या भूमौ मृदं निधाय त्रातारमिंद्रमिति मंत्रेण पूर्वस्यां यमा
यसोमेमिति दक्षिणस्यां तत्वायामीति पश्चिमायां वयंसोमव्रते तवेत्युत्तरस्यां तत्सूर्यमित्यूर्ध्वा
यां अधः प्रत्युयस्त्वमो पशीति अधरायां दिशि मृदं निक्षिप्य। ततः सहस्रशीर्षेति शिरसि अक्षीभ्यामि
१२ ति मुखं ग्रीवाभ्यस्वाहेति हृदि नाभानाभिन्नेति नाभौ त्वमिंद्र सओषसमिति बाह्वोः सोमानंस्वरण
मिति कक्ष्योः यः कुक्षिः सोमपातमहृति कुक्ष्योः बद्धीनापितेति पृष्ठे ऊरुभ्यामित्यूर्वोः मेहनाद्धन
मिति आन्त्योः एताजनस्येति पादयो र्यस्य विश्वानीति हस्तयोरंगादंगादित्यनेन पुरुषसूक्तेन
च सर्वांगेष्वभिलिंपेत्। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा। शिरसा धारयिष्यामि रक्षस्व
मां पदे पदे। भूमिर्धेनुर्धरणी लोकधारिणी। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हन मे पापं
यन्मया दुष्कृतं कृतं। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं।
मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके। त्वया हतेन पापेन गच्छामि परमां गतिं। एवमादिभिः सर्वां
गेष्वभिलिप्य सतिलदूर्वा मृदं शिरसि निधाय मृत्तिकास्नानं प्रक्षाल्य गायत्र्या गोमूत्रेण गंधद्वारे १२
ति गोमयेन आप्यायस्वेति क्षीरेण दधिक्राव्ण इति दध्ना तेजोसि शुक्रमस्यमृतमसि धाम नाम
घृतंमिमिक्षे इति घृतेन।२

सि प्रियं देवानामनाधृष्टं देवयजनमित्याज्येन देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम
ग्नेस्तेजसा सूर्यस्य वर्चसेंद्रियेणाभिषिंचामीति कुशोदकेन स्नात्वा तीर्थं प्रार्थयेदनेन मंत्रेः। हिरण्यशृंगं व
रुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा
दुष्कृतं कृतं। तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनरिति। ततो यथोक्तप्रकारेण स्नात्वा गृहं ग
च्छेत्। स्त्रीशूद्रयोरमंत्रकं स्नानं। तत आचम्य अधिकान्युग्मान् द्विजान् संपूज्य पूर्ववत् भोजये दामान्नं वा दद्यात्
द्विजेषु विष्णोरेव पूजनं। एतद्विष्णुश्राद्धं। तत्र शिष्टाः एवं कुर्वंति। स्नानोत्तरं मंगलीकृतं प्रायश्चित्तांगत्वेन वि
ष्णुश्राद्धं करिष्य इति संकल्प्य न्यग्रोधाश्वत्थ शिलायां श्वेतचंदनादिभि र्विष्णुं संपूज्य कृसरेण यथाशक्ति द्रव्यमास
यामचतुष्टयनिष्क्रयीभूतं द्रव्यं यथानामगोत्रेभ्यो ब्राह्मणेभ्यः दातुमहमुत्सृजे तेन पापहा महाविष्णुः प्री
यतामिति। तत एकां गां तन्निष्क्रयं वा ग्रामे गोदानत्वेन कुटुंबिने द्विजाय दत्वा गवामंगेषु तिष्ठति भुवनानि च
तुर्दश। यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च इति मंत्रं पठेत्। ततोग्निं संस्थाप्य पापहा महाविष्णुर्देवो
नाष्टाविंशत्यादिसंख्ययाज्यमग्निवायुसूर्यप्रजापतिदेवत्यं जुहुयाच्छिष्टाचारानुरोधेन ब्रह्मकूर्चहो
मम्पि कुर्यात्। स यथा। तिला पितमाज्यं पलाशादिपर्णेन गृहीत्वा। ॐ भूः स्वाहा अग्नय इदं न मम। ॐ

Indira Gandhi National
Centre for the Arts

ग्रा०मु०ली० भुवः स्वा० वायवइदं०।ॐ स्वः० सूर्यायेदं।ॐ भूर्भुवः स्वः स्वा० प्रजापतयइदं।एवं सहस्रवारं कृते ऽ
ष्टाविंशतिरा कृतयो भवंति। ततो ब्रह्मकूर्चहोमार्थं पंचगव्यं कार्यं। सुवर्णताम्रपलाशपद्मान्यतमे पात्रे
२० यताम्राया गोमूत्रं त्रिपलं गायत्र्या प्रणवेनादाय। ततो गुष्टार्द्धपरिमितं गोमयं श्वेताया गंधद्वारामि
त्यादाय। ततः कपिलायाः पयः सप्तपलमाप्यायस्वेत्यादाय। ततो नीलाया सप्तपलमेव दधि दधिक्रा
व्णाइत्यादाय। ततः कृष्णायाः घृतमेकपलं घृतं मिमिक्ष इत्यादाय। तत एकपलं कुशोदकं देवस्य त्वेत्याद
यप्रणवेनालोड्य यज्ञियकाष्ठखंडेन प्रणवेनैव निर्मथ्य प्रणवेनाभिमंत्र्य सप्तपत्रैः कुशैः पलाशदले र्वाजु
हुयात्। तत्र मंत्राः। इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या। व्यस्तभ्ना रोदसी विष्णवेते दा
धर्थ पृथिवीमभितो मयूखैः स्वाहा। पृथिव्या इदं न ममेति त्यागः। इदं विष्णुर्विचक्रमे० विष्णवे स्वाहा विष्ण
व इदं०। मानस्तोके० महते स्वाहा रुद्रायेदं०। शन्नो देवी० त्वमग्नेः स्वाहा अग्नय इदं०। अत्र ब्रह्मकूर्चहोमम
न्त्रा य स्त्वेवं। इरावती इदं विष्णुर्मानस्तोके च शंवती। एताभिश्चैव होतव्यं कुतदोषं पिबेद्द्विजः इति। तत्र २०
शंवती स्थाने स्मन्मातुः प्रपितामह भद नारायणपदपाथाजैरंत्येष्टिपद्धतौ ब्रह्मजज्ञानमिति मंत्रः
इति। शंनो देवीरित्यनंतरं अग्नये स्वाहा अग्नय इदं०। सोमाय० सोमायेदं०। गायत्र्या सूर्याय स्वा०
सवित्रे० सवित्र इदं०।

सूर्यायेदं०।ॐ स्वाहा प्रजापतय इदं०।ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं०। अग्नये स्विष्टकृते स्वाहा अग्न
ये स्विष्टकृत इदं०। ततो नक्षत्रदर्शने व्रतग्रहणं करिष्य इति द्विजान्पृष्ट्वा कुरुष्वेत्यनुज्ञातः प्रणवेन होममन्त्रो
षमशेषं प्राश्नीयात्। [redacted] एतच्चैव प्राशनं ग्रामाद्बहिः कार्यमिति
मातामहचरणाः। प्रायश्चित्ताहनि श्रीकृष्णं उपवसेदशक्तो हविष्यान्नमश्नीयात्। ततः प्रायश्चित्तं चरित्वा प्रा
गव्याहृतिहोमविष्णुश्राद्धगोदाना [redacted] निकृत्वा दशदानानि दद्यात्। तानि च महार्णवसंग्रहे। गोभूतिलहि
ग६ रण्याज्यवासो धान्यगुडानि च। रूप्यं लवणमित्याहुर्दशदानानि पंडिताः इति। तेषां परिमाणमुक्तं शातातपीये
कर्मविपाके। निवर्तनमिता भूमिर्द्रोणत्रयमिता तिलाः। कर्षमात्रं हिरण्यं स्यादाज्यं सप्रस्थमाढकं। वाससां
त्रितयं दद्यात् गुडं च पलषष्टिकं। निष्कत्रयमितं रूप्यं लवणं सार्द्धखारिका। सार्द्धखारीमितं धान्यं परिमाणं प्र
कीर्तितमिति। अथ दानमंत्राः। गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादिह लोके प
रत्र च। सर्वभूताश्रया भूमिर्वराहेण समुद्धृता। अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे इति भूमेः।
महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः। तस्मादेषां प्रदानेन मम पापं व्यपोहतु इति तिलानां। हिर
ण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफ। लदमतः शांतिं प्रयच्छ मे इति हिरण्यस्य। कामधेनोः ६९

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ भुवः स्वा॰ वायवइदं॰। ॐ स्वः॰ सूर्यायेदं॰। ॐ
प्राविंशतिग

प्रा॰मु॰ली॰ समुद्भूतं सर्वक्रतुषु संस्थितं। देवानामाज्यमाधारम् ? त॰ प्रा॰ आज्यस्य। शरणं सर्वलोकानां लज्जाया रक्षणं परं। सुवेषधारि वस्त्र त्वमतः॰ वस्त्रस्य। सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत्। प्राणिनां जी
२१ वनोपायमतः॰ धान्यस्य। यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः। सामवेदस्तु वेदानां महादेवस्तु यो
गिनां। प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा। तथा रसानां प्रवरः सदैवेक्षुरसोत्तमः। ममतस्मात्प
रां लक्ष्मीं ददस्व गुड सर्वदेति गुडस्य। प्रीतिर्यतः पितॄणां च विष्णुशंकरयोः सदा। शिवनेत्रोद्भवं रूप्य
मतः॰ रूप्यस्य। रसानामग्रजं श्रेष्ठं लवणं बलवर्द्धनं। ब्रह्मणा निर्मितं साक्षादतः॰ लव णस्य। एवं स
६६ मंत्रसपरिमाणं दशदानानि [redacted] त्वा परिमाणासामर्थ्ये दक्षिणां च स्वशक्तितश्च लिशातातपवचना
त्स्वशक्त्या निष्क्रयेण वा दत्वा ब्राह्मणान्भोजयेत्। प्रायश्चित्ते तलस्थी पर्कुर्याद्ब्राह्मणभोजनमिति व
चनात्। इह संख्याविशेषानुपादानाच्छक्त्यनुसारेणानां ब्राह्मणभोजनं वेदितव्यं। अंगिराः। तस्मात् ?
द्ध समासाद्य सदा धर्मपथे स्थितं। प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति। एवं स्त्रीणामपि। होम २१
पंचगव्यादानेनस्तः। स्त्रीणां होमो न दातव्यः पंचगव्यं तथैव चेति वचनादि संक्षेपः॥ ॥इति श्रीमन्नारद्भाज
महादेवभट्टात्मज सकलविद्यानिधानश्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ प्रायश्चित्तमुक्तावलीप्रकाश

॥ वस्तुतस्तु कलियुगे प्रायश्चित्तविधानं च विप्राणां मरणांतिकमिति वचनाद्विप्राणां मरणांतिकं निषिद्धमतो द्वादशाब्दमेव कार्यं। कामकृते विप्रब्रह्महत्यादि
पापे। ६

अथ प्रायश्चित्तान्यभिधीयंते॥ तत्रादौ महापापप्रायश्चित्तान्युच्यंते॥ द्विविधं हि महापापं। कामकृतमकाम
कृतं च। तथा च बृहस्पतिः। कामाकामकृते तेषां महापापं द्विधा स्मृतमिति। कामकृते महापापे देहांतप्राय
श्चित्तं विना प्रायश्चित्तांतरं नास्ति। तथा च पाराशरीये। यः कामतो नरः कुर्यान्महापापं कथंचन। न तस्य नि
ष्कृतिर्दृष्टा भृग्वग्निपतनादृ तइति। मनुः। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयतइति। शातातपो
पि। अकामावाप्तो प्रायश्चित्तं कामकृते त्वात्मानमवसादयेदिति। यत्त्वांगिरोवचनं विहितं यदकामानां
कामान्तु द्विगुणं भवेदिति तन्मरणात्मकविषयं ज्ञेयं। अज्ञानाद्ब्राह्मणवधे प्रायश्चित्तमाह याज्ञव
ल्क्यः। शिरः कपाली ध्वजवान् भिक्षाशी कर्म वेदयन्। ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयादिति। शि
रः कपाली [redacted] निहतब्राह्मणकपालधारी ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरः कपालमादाय तीर्थान्य
नुसंचरेदिति शातातपोक्तेः ध्वजवान्। कृतशववशिरोध्वजः। कृत्वा शवशिरोध्वजमिति मनुवचनात्। भि
क्षाशी भिक्षाभुक्। कर्म वेदयन्। स्वकर्म प्रख्यापयन् कृत्वा पापं न गूहेत गूह्यमानं विवर्द्धतइत्यंगिरोवचना
त्। एतावदत्रास्य निवासस्थानान्याह मनुः। ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। भिक्षाशो कार्या
र्थमाह। कृतवापनो वा निवसेद्ग्रामांते गोव्रजेपि वा। आश्रमे वृक्षमूले वा सर्वभूतहिते रतइति। वपनं वै

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ कल्पिकं वाग्ब्रह्म ग्रहणात्। वपनाभावे जटासंवर्द्धनं। ब्रह्महा द्वादशाब्दानि बालवासा जटी ध्वजी तिसं
वर्तोक्तेः॥ भिक्षापात्रमाहापस्तंबः। लोहितकेन मृन्मयखंडेन शरावेण भिक्षार्थं ग्रामं प्रविशेदिति। भि
२२ क्षार्थं वर्णानाह संवर्त्तः। चातुर्वर्ण्यं चरेद्भैक्ष्यं खट्वांगी संयतः पुमानिति। तत्र गृहसंख्यामाह वसिष्ठः।
सप्तागाराण्यसंकल्पितानि चरेद्भैक्षमेककालाहार इति। भिक्षायाचनवाक्यमाह पराशरः। अहं दुः
कृतकर्मा वै महापातककारकः। गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातक इति। एतस्मादेव वचना
द्वारि स्थित्वा भिक्षा याचयित व्या भिक्षायाचनं वन्यैर्जीवनाशक्तौ बोध्यं। भिक्षायै प्रविशेद्ग्रामं वन्यै
र्यदि न जीवतीति संवर्त्तस्मरणात्। नियमांतराण्याह शंखः। स्थानवीरासनो मौंजीधृतदंडकमंडलुः।
भिक्षाचर्याग्निकार्यं च कुष्मांडीभिः सदा जपः। तस्य भवेदिति शेषः। द्वितीये ब्रह्मवधे द्विगुणं प्रायश्चित्तं।
तृतीये त्रिगुणं। चतुर्थे न निस्तारः। तथा च मनुः। विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत्। तृतीये त्रिगु -ये४
णं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति। इदं प्रायश्चित्तं अज्ञानात्साक्षाद्धंतुरेव। बालस्त्रीवृद्धादीनां साक्षा २२
द्धंतृत्वेप्यर्द्धं प्रायश्चित्तं। अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हति स्त्रियो
रोगिण एव चेत्यंगिरस्मृतेः। अर्वाक्तु द्वादशाद्वर्षादशीतेरूर्ध्वमेव वा। अर्द्धमेव भवेत्तुं सातुरीयं तत्र

योषितामिति विष्णूक्तेश्च। यत्तु शंखवचः। ऊनैकादशवर्षस्य पंचवर्षात्परस्य च। प्रायश्चित्तं चरेद्भ्राता पिता वा
न्यः सुहृज्जनः। अतो बालतरस्यास्य नापराधो न पातकं। राजदंडो न तस्यास्ति प्रायश्चित्तं न विद्यत इति तत्तं स
पूर्णप्रायश्चित्ताभावपरं। न पुनः सर्वात्मना तदभावप्रतिपादनपरमिति विज्ञानेश्वरः। यत्तु मध्यमांगिराः।
गवां सहस्रं विधिवत्पात्रेभ्यः प्रतिपादयन्। ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव चेत्याह तत्तु द्विगुणसधनेस्थे
गवां सहस्रं विधिवत्पात्रेभ्यः प्रतिपादयन्। ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव चेत्याह तत्तु द्विगुणसधनस्थे
तु ब्राह्मणे व्रतमादिशेदित्येतद्वाक्यविहितद्विगुणव्रतचरणासमर्थस्य बोध्यं। अनुग्राहकप्रयोजकादी
नां तत्तद्दोषानुसारेण प्रायश्चित्तकल्पना विधेया। यत्कृतेन साक्षाद्ब्राह्मणो हंति किंतु तिरस्कारादिद्वारा तन्नि
मित्तता मात्रमिति तत्र त्वाह सुमंतुः। तिरस्कृतो यदा विप्रो ऽक्षममाणो म्रियेत यदि। निर्गुणः सहसाक्रो
धाद्गृहक्षेत्रादिकारणात्। त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीं। गच्छेद्वापि विशुध्यर्थं तत्पापस्येति नि
श्चितमिति। निर्निमित्तं भर्त्सने स एवाह। अत्यर्थं निर्गुणो विप्रोप्यत्यर्थं निर्गुणोपरि। क्रोधाद्धे म्रियते यस्तु
निर्निमित्तं तु भर्त्सितः। वत्सरत्रितयं कुर्यान्नरः कृच्छ्रं विशुद्धय इति। यदा तु गुणवान्निर्निमित्तं निर्गुणो ब्र
ह्मघाती तदा प्रायश्चित्तमाह स एव। केशश्मश्रुनखादीनामकृत्वा वपनं वने। ब्रह्मचर्यं चरेद्द्विः प्रा वर्षेण
कृतेन शुध्यतीति। अनुमंत्रादीनां प्रायश्चित्तमाह पैठीनसिः। हंता मंत्रोपदेष्टा च तथा संप्रतिपादकः।
Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ प्रोत्साहकः सहायाश्च तथा मार्गानुदेशकः। आश्रयः शस्त्रदाता च भक्तदाता विकर्मिणां। उपेक्षकः शक्ति
मांश्च दोषवक्तानुमोदकः। अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत्। यथाशक्त्यनुरूपं च दंडं तेषां प्रक
२३ ल्पयेदिति॥ गुर्वादिवधप्रायश्चित्तं मदनरत्ने भविष्ये॥ मातरं पितरं हत्वा सोदर्यं भ्रातरं तथा। गुरुं हत्वा
श्रोत्रियं वा आहिताग्निमथापि वा। अनेन विधिना पापी कीर्तयन्पापमात्मनः। व्रतं चरेदुत्तमानुत्त
ष्ठासान्नियलव्रतमिति। इदं सर्ववर्णपरं। पितृत्वादेः सर्वत्र सत्त्वात्। उत्तमो द्वासो मरणं। यत्तु शंखः।
प्रमाप्य द्वादश संवत्सरान् कृच्छ्रं नसार्द्धसंवत्सरं च व्रतान्यादिशेत्तेषामंते गोसहस्रं तदर्द्धं तस्याप्य
र्द्धं तदर्द्धं च दद्यात्सर्वेषां वर्णानामानुपूर्व्येणेति ब्रह्मगोसहस्रादेः समुच्चयपरं बोध्यं। दक्षस्तु स्प
ष्टमाह। सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। आचार्ये शतसाहस्रं सोदर्ये दत्तमक्षयं। सम द्विगुण
साहस्रमानंत्यं च यथाक्रमं। दानफलविशेषः स्याद्धिंसायां तद्वदेव हि। इति। युगपत्कामतोऽकामतो वाऽ
नेकब्राह्मणवधे पराशरे भविष्ये। एककाले यदा हन्याद्युगपत्तु रनंदन। निमित्तमेकमाश्रित्य हत्वानेके २३
ब्राह्मणं २ नवा विभो। ब्राह्मणो वीर ब्राह्मणान्सुबहूनपि। निहत्य युगपद्वीर एकं प्रायश्चित्तं चरेदिति॥ अथ यदि क्ष
त्रियादिर्ब्राह्मणं घातयति तदा क्रमेण द्विगुणं त्रिगुणं चतुर्गुणं प्रायश्चित्तं कुर्यात्। तथा च पाराशरीये।

रा ३ अंगिरस्मृति भविष्यत्पुराणयोः। पर्षद्या ब्राह्मणानां तु सा राज्ञां द्विगुणा भवेत्। वैश्यानां त्रिगुणा प्रोक्ता पर्षद्व
च्च व्रतं स्मृतं। तथा। शूद्रो वा ब्राह्मणं हत्वा प्रायश्चित्तं चतुष्टयमिति। प्रजापतिरपि। द्विगुणं त्रिगुणं चैव चतु
र्गुणमथापि वा। क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे व्रतम्। अत्र सर्वत्र हंतृहन्यमानगुणविशेषाद्गमनप्रा
यश्चित्तविशेषो बोध्यः। जातिपसगुणापेक्षं सकृद्बुद्धिकृतं तथा। अनुबंधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेदिति
देवलस्मृतेः॥ अथ प्रारब्धे द्वादशाब्दव्रते तन्तराने मितिकीसमाप्तिमाह मनुः। ब्राह्मणार्थे गवार्थे वा सद्यः प्रा
णान्परित्यजन्। मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य चेति। असंपूर्णद्वादशाब्द एव शुध्यतीति भावः।
अन्यावभृथे यजमानेन सह स्वपापमृत्विजा रव्याप्य तैरनुज्ञातः स्नातिस्तर्हि मुक्तो भवति। शिष्टा वा भूमिदे
वानां नरदेवसमागमे। स्वमेनो वभृथे स्नात्वा हयमेधे विमुच्यत इति मनूक्तेः। स्वमेनं शिष्टेत्यन्वयः। हयमेध
ग्रहणं अग्निष्टुत्समाप्तिकानां क्रतूनां राणामुपलक्षणं। अन्यथाग्निष्टुत्श्रुतिगोतमस्मरणात्।
यत्तु निर्गुणो निर्गुणं हंति तस्य प्रायश्चित्तमाह याज्ञवल्क्यः। पात्रे धनं वा पर्याप्तं दत्वा शुद्धिमवाप्नुयात्। आ
दातुश्च विशुध्यर्थमिष्टिर्वैश्वानरी स्मृतेति। मनुरपि। सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्। धनं वाजी
वनायालं गृहं वा सपरिच्छदमिति। अपुत्रस्य सर्वस्वदानं सपुत्रस्य सोपस्करगृहदानमिति व्यवस्था। विज्ञेया।
अस्मिन्विषये प्रायश्चित्तमाह पराशरः। चतुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमनं प्राय

Indira Gandhi National Centre for the Arts

प्रा०मु०ली० श्चित्तं विनिर्दिशेदिति। आरब्ध प्रायश्चित्तस्य पुंसोंतरा मरणे विपापत्वमेव भवतीत्याह हारीतः। प्रायश्चि
२४ त्ते व्यवसिते कर्त्तर्यदि विपद्यते। पूतस्तदहरेवासौ इहलोके परत्र च॥ व्यासोप्याह। धर्मार्थं यतमानस्तु न
चेच्छक्नोति मानवः। प्राप्नो भवति तत्पुण्यमत्र मे नास्ति संशय इति। अत्रान्यदपि वक्तव्यं विस्तरादिकं ग्रंथवि
स्तरभियानोच्यते। तत्तु नमिताक्षरापरार्कपराशरमाधवस्मृत्यर्थसारप्रभृति निबंधेषु द्रष्टव्यं मनी
षिभिः॥ अथातिदेशमाह याज्ञवल्क्यः॥ यागस्थः क्षत्रविड्घाती चरेद्ब्रह्महणि व्रतं। गर्भहा च यथावर्णं
तथात्रेयीनिषूदक इति। यागस्थ सोमयागस्थः यत्सिद्धेनतथैव निर्दिष्टत्वात्। अत्रव्रतग्रहणान्मरणांतिकं
नातिदिश्यते। अतः कामकृते यागस्थक्षत्रादिवधे व्रतमेव द्विगुणं चरेदिति। गर्भश्चाविज्ञातो जातएव। जा
रजेषु प्रायश्चित्तांतरविधानात्। आत्रेयी ऋतुस्नाता रजस्वलाम् गुस्नातामात्रेयीमाहुरिति वसिष्ठो
क्तेः। अंगिराः। आहिताग्निर्द्विजाग्र्यस्य हत्वा पत्नीमनिंदितां। ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव
चेति। वधोद्यमेपि संपूर्णवधप्रायश्चित्तमाह याज्ञवल्क्यः। चरेद्व्रतमहत्वापि घातार्थं चेत्समागत इति।
यथावर्णमित्यनुवर्त्तते। किंच। द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेदिति॥ ॥अथ सुरापानप्रायश्चित्तं॥
तत्र मत्या सुरापाने प्रायश्चित्तमाह याज्ञवल्क्यः॥ सुरांबुघृतगोमूत्रपयसामग्निसंनिभं। सुरापोन्यत २५
मं पीत्वा मरणाच्छुद्धिमृच्छतीति। अत्र गोमूत्रसाहचर्यात्पयः सर्पिषी गव्ये। पराशरोपि। सुरापः स्नानं स कृ

त्वा त्वग्निवर्णां सुरां पिबेत्। स पावयेदथात्मानमिह लोके परत्र च॥ इति। पिष्टादिजन्यो द्रवविशे
२ तथा माध्वी षः सुरा। गौडी पैष्टी माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथैवान्या न पातव्या द्विजोत्तमैरि
ति मनुस्मरणात्। तत्र [redacted] पैष्ट्यां सुराशब्दो मुख्यः। इतरयोर्गौण इति सर्वनिबंधकृतः। एतत्प्राया ५२
यश्चित्तमाईयास्व्रताकार्यं। सुरापः आर्द्रवासा अग्निवर्णां सुरां पिबेदिति षष्ठीनसिव चेनात्। तथा लो
हपात्रेणापि सुरापोग्निवर्णमायसेन पात्रेण ताम्रेण वा पिबेदिति प्रचेतसः स्मृतेः। एतत्प्रायश्चित्तं स कृ
त्वान एव। तदाहांगिराः। सुरापानं सकृत्कृत्वाप्यग्निवर्णां सुरां पिबेदिति। अकामकृते प्रायश्चित्तमाह
याज्ञवल्क्यः। बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत्। पिण्याकं वा कणान्वापि भक्षयेत्तु समा निशी
ति। एतत्पिण्याकादिभक्षणं सुरापानोत्तरं छर्दिते सति बोद्धव्यं। तथा च षट्त्रय व्रतं प्रकृत्याह व्यासः। एत
नृ ४ देव व्रतं कुर्यान्मद्यपश्छर्दने कृते। पंचगव्यं च तस्योक्तं प्रत्यहं कायशोधनमिति। यत्तु मनुराह। कणान्वा भ
क्षयेदब्दं पिण्याकं वा सकृन्निशि। सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी॥ इति तदज्ञानेन सुरायास्ता
माघ २ लुमूलसंयोगविषयमिति निबंधकर्त्तारः। यानि तु गौडीं माध्वींस्तु पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृ
च्छ्रं पराकं च चांद्रायणमनुक्रमादित्यादीन्यल्पप्रायश्चित्तप्रतिपादकवचनानि तानि त्वसाध्यव्याध्युपश

Indira Gandhi National
Centre for the Arts

मतिमित्तसुरापानविषयाणि। अयमेवरा द्धांतो विज्ञानेश्वरादीनां। बालानामियांस्तुविशेषः। पादोबाले
षुद्दातव्यः सर्वपापेष्वयं विधिरिति पुलस्त्यवचनात्कामकृतेपिनमरणांतिकोदंडः किंतुविहितं यदकामा

नांकामात्तद्विगुणंचरेदित्यंगिरोवचनाद्विगुणंषड्वार्षिकंज्ञेयं। एषएवपंथावृद्धानुसारादिषु बोध्यः।
नचमद्यमूत्रपुरीषाणां भक्षणेनास्तिकश्चन। दोषस्त्वापंचमाद्वर्षादूर्ध्वंपित्रोः सुहृद्गुरोरिति कुमा
रवचनाद्बालानान्नास्त्येव दोषः कुतः पुनः प्रायश्चित्तमिति भ्रमितव्यं। सुरापाननिषेधस्तुजात्याश्रय
स्थिति लिखित इतिस्मृत्यंतराज्जातिमात्रस्यविवक्षितत्वात्। कुमारवचस्तु दोषाल्पत्वप्रतिपादनपरंबोध्यं। रा
जन्यविशोस्तु पैष्ट्येवनिषिद्धा नतुगौडी माध्वी। नतुक्तं बृहद्याज्ञवल्क्येन। कामादपि हि राजन्यो वैश्यो
वापि कथंचन। मद्यमेवसुरांपीत्वान दोषंप्रतिपद्यतइति। व्यासेनापि। उभौमध्वासवंपीत्वाउभौचंदन
चर्चितौ। एकपर्यंकमारूढौ दृष्टौमेकेशवार्जुनाविति। ब्राह्मणानांतुसर्वासांनिषेधः। यक्षरक्षः
पिशाचान्नंमद्यंमांसंसुरासवं। तद्ब्राह्मणेननात्तव्यंदेवानामश्नताहविरिति मनूक्तेः॥ ॥अथ २५
कामतः सुराभांडस्थितोदकपाने आह हारीतः। सुराभांडस्थितंतोयं यदिकश्चित्पिबेद्द्विजः। सद्वा
दशाहं क्षीरेणपिबेद्ब्राह्मीसुवर्चलामिति। अकामतस्त्वाह मनुः। अपः सुराभाजनस्था मद्यभांड

स्थितास्तथा। पंचरात्रंपिबेत्पीत्वाशंखपुष्पीश्रृतंपयइति। बौधायनः। सुरापानस्ययोभांडे अपःप
र्युषिताः पिबेत्। शंखपुष्पीविपक्वंतुक्षीरंसतुपिबेत्त्र्यहमिति। अत्रसर्वत्रभांडमतिशुष्कंबोध्यं। सुरा
पमुखगंधाघ्राणेमनुराह। ब्राह्मणस्तुसुरापस्यगंधमाघ्रायसोमपः। प्राणानप्सुत्रिरायम्यघृतंप्रा
श्यविशुध्यतीति। इदंचसोमयाजिद्विजस्यैवामतिपूर्वं। मतिपूर्वंद्विगुणं॥ ॥अथमद्यपानप्रायश्चि
त्तमाहपराशरः। मद्यपश्चद्विजः कुर्यान्नदींगत्वासमुद्रगां। चांद्रायणेततश्चीर्णेकुर्याद्ब्राह्मणभो
जनं। अनडुत्सहितांगांचदद्याद्विप्रेषुदक्षिणामिति। तदेतत्कामकारविषयमितिमाधवः। अज्ञा
नात्पानेयाज्ञवल्क्यआह। अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेवच। पुनःसंस्कारमर्हंतित्रयोवर्णा
द्विजातयइति। अत्रातिकृच्छ्रपूर्वकंपुनःसंस्काररूपंप्रायश्चित्तंबोद्धव्यं। तदाहबृहस्पतिः। पीत्वा
प्रमादतोमद्यमतिकृच्छ्रंचरेद्द्विजः। कारयेत्तस्यसंस्कारंद्वाभ्यांविप्रांस्तुभोजयेदिति। मिताक्षरायां
तप्तकृच्छ्रपूर्वकमुक्तं। अत्रयद्यपियाज्ञवल्क्यवचसित्रयोवर्णाइत्युक्तं तथापिमद्यनिषेधोब्राह्मण
स्यैव। पूर्वोक्तवचनात्। मधूकमैक्षवंसौरंतालखार्जूरपानसं। मध्वसंचैवमाध्वीकमैरेयंनालिके
रजं। अमेध्यानिदशैतानिमद्यानिब्राह्मणस्यत्विति बृहद्विष्णूक्तेश्च। पनसादिसमुद्भूतंमदजनकं

Indira Gandhi National
Centre for the Arts

मा॰मु॰ली॰ विज्ञानीयं द्रवद्रव्यं मद्यं। तदेकादशधेत्याह पुलस्त्यः। पानसं द्राक्षं माधूकं खार्जूरं तालमैक्षवं।
माधूत्थं सैरमारिष्टं मैरेयं नारिकेलजं। समानानि विजानीयान्मद्यान्येकादशानीति। अनुपनी-
२६ तेन मद्यपाने कृते तत्प्रायश्चित्तं पित्रादिः कुर्यात्। अनुपेतस्तु यो बालो मद्यं मोहात्पिबेद्यदि। तस्य
कृच्छ्रत्रयं कुर्यान्माता भ्राता तथा पिता। इति जातूकर्ण्यस्मृतेः। तालादिमद्यभांडोदकपाने तु प्रायश्चि-
त्तं प्रकल्पनीयं॥ ॥अथ ब्राह्मण्या अपि सुरापानं प्रतिषेधति याज्ञवल्क्यः। पतिलोकं न सा या-
ति ब्राह्मणी या सुरां पिबेत्। इहैव सा शुनी गृध्री सूकरी चोपजायत इति। ब्राह्मणीग्रहणं क्षत्रिया-
दिस्त्रीणां व्यावृत्त्यर्थं न केवलं ब्राह्मण्याः सुरापाने कृते सैव दोषभागिन्यपि तु तद्भर्तापि दोषभागी-
त्याह मनुः। पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्। पतितार्द्धशरीरस्य निष्कृतिर्न विधीयत इ-
ति। शूद्रस्य तद्भार्यायाश्च न सुरामद्ययोः प्रतिषेधः। सुरापानसमेषु त्वर्द्धं प्रायश्चित्तं बोध्यमिति सं-
क्षेपः॥ ॥अथ सुवर्णस्तेयप्रायश्चित्तमाह याज्ञवल्क्यः॥ ॥ब्राह्मणः स्वर्णहारी तु राज्ञे मुस-
लमर्पयेत्। स्वकर्म ख्यापयंस्तेन हतो मुक्तोपि वा शुचिरिति। ब्राह्मणस्वर्णहारीत्यत्र षष्ठीतत्पुरु- २६
षः समासो न तु कर्मधारयः। अपहृत्य सुवर्णं तु ब्राह्मणस्य ततः स्वयं। गच्छेन्मुसलमादाय राजानं स्व- स्व॰

वधाय तु। ततः शुद्धिमवाप्नोति राज्ञा सो मुक्त एव च। इति पराशरवाक्यैकवाक्यत्वात्। अत्र सुवर्णशब्दः परि-
माणविशेषवाची न तु जांबूनदवाची। स च परिमाणविशेषो दर्शितो याज्ञवल्क्येन महर्षिणा। जालसूर्यमरी-
चिस्थं त्रसरेणू रजः स्मृतं। तेऽष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते
त्रयः। कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडशेति। राज्ञा प्रहारः सकृत्सकृत्कार्यः। ततो मुसलमादाय स-
कृद्धन्यात्तु तं स्वयं। यदि जीवति स स्तेनस्ततः स्तेयाद्विमुच्यत इति संवर्तोक्तेः। एतत्प्रायश्चित्तं मतिपूर्वकचौर्य-
विषयं। मरणांतं हि यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः। तत्तु कामकृते पापे विज्ञेयं नात्र संशय इति मध्यमांगिरोक्तेः।
इदं च मरणांतिकं सार्ववर्णिकस्यापहर्तुर्न ब्राह्मणस्यैव। यत्तु सुवर्णस्तेयकृद्विप्र इति मनुवाक्ये विप्रग्रहणं तन्न-
रमात्रोपलक्षणमिति विज्ञानेश्वरः। अत्र महापातकित्वं षोडशमाषात्मकपरिमाणप्रभृति हेमहरण एव बो-
ध्यं। न्यूने प्रायश्चित्तस्याल्पत्वात्। तथा हि षट्त्रिंशन्मते। सुवर्णस्यापहरणे माषकेऽप्यपि पातकं। निष्कमात्रापह-
रणेन विघ्नः किं भविष्यति। बालाग्रमात्रेऽपहृते प्राणायामं समाचरेत्। लिक्षामात्रेऽपि च तथा प्राणायामत्रयं बुधः।
राजसर्षपमात्रे च प्राणायामचतुष्टयं। गायत्र्यष्टसहस्रं च जपेत्पापविशुद्धये। अष्टाधिकं सहस्रं मध्ये सहस्रं। गौ- स्व२
रसर्षपमात्रे तु सावित्रीं वै दिनं जपेत्। यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयं। सुवर्णकृष्णले द्वे कनकपह-

Indira Gandhi National Centre for the Arts

प्रा॰मु॰ली त्यद्विजोत्तमः। कुर्यात्सांतपनं कृच्छ्रं तत्पापस्यापनुत्तये। अपहृत्य सुवर्णं स्य भाषमात्रं द्विजाधमः। गोमूत्र
२ यावकाहारस्त्रिभिर्मासैर्विशुध्यति। सुवर्णस्यापहरणे वत्सरं यावकी भवेत्। ऊर्ध्वं प्राणांतिकं ज्ञेयमथवा ब्रह्म
हृद्व्रतमिति। इदं वत्सरं यावकाशनं किंचिन्न्यून सुवर्णस्यापहारविषयं। सुवर्णस्यापहारे द्वादशवार्षिकविधा
नादिति विज्ञानेश्वरमाधवाचार्यौ चतुः। यावद्वत्सरं यावकाशनं कृतवित एव सुवर्णमिति हेमहारिणो विहित
प्रायश्चित्ताधिकार इति वचनार्थ इति बयं। अकामकृते प्रायश्चित्तमाह याज्ञवल्क्यः। अनिवेद्य नृपे शु
द्ध्येत्सुरापव्रतमाचरन्। आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृदिति। सुवर्णदानमतिधनिनः। मनुरपि।
ह॰ तपसापनुनुत्सुस्तु सुवर्णस्तेयजं मलं। चीरवासा द्विजोरण्ये चरेद्ब्रह्मणो व्रतमिति। कामतोपहार एवाप्रसि नन्व॰
द्धेयेन प्रायश्चित्तविधेः सार्थक्यं स्यादिति चेन्मैवं। वस्त्रापहरणे प्रवृत्तः पुरुषोऽज्ञानादंचललग्नग्रथितसुव
र्णवस्त्रमपहरति तत्पुनः स्वामिने न प्रयच्छति नाशयति भुनक्ति वा तदाकामतोप्यपहारसंभवात्। नि
र्गुणस्वामिकसुवर्णहरणे व्यासः। एतदेव व्रतं स्तेनः पादन्यूनं समाचरेदिति। पादन्यूनं नववार्षिकं। स्तुस्वाम
कुटुंबरक्षणार्थमकामतो हरणे ऽत्रिः प्रायश्चित्तमुक्तवान्। षडब्दं वाचरेत्कृच्छ्रं यजेद्वा क्रतुना द्विजः। तीर्थानि २
वाभ्रमन्विद्वान् ततस्तेयाद्विमुच्यत इति। यदाऽपहृत्य धिङ्मामिति पश्चात्तापपूर्वकं स्वामिने मत्यर्पयति तदा

प्राहाऽऽपस्तंबः। चतुर्थकालमितान्नाने न त्रिवर्षमवस्थानमिति। मानसापहारे तु सुमंतुराह। सुवर्णस्तेयी
प्राहाऽऽपस्तंबः। चतुर्थकालमिताशनो नन्त्रिवर्षमवस्थानमिति। मानसापहारे तु सुमंतुराह। सुवर्णस्तेयी
द्वादशाद्वादशरात्रं वायुभक्षः पूतो भवति। गुरूक्तो त्रियया गस्त्यत्वादिबहुगुणोपेतब्राह्मणद्रव्यापहारे वसि
ष्ठः। निष्कालकोघृताभ्यक्तो गोमयाग्निनापादप्रभृति आत्मानं प्रमापयेत्पूतो भवतीति विज्ञायते। शिर
स्थिता अलकाः कालकाः। निर्गताः कालकाः यस्मादसौ निष्कालकः। मुंडितशिरा इत्यर्थः। सर्वस्तेयप्रा
यश्चित्तं त्वपहृतसुवर्णं परावृत्य स्वामिने एकादशगुणाधिकं दत्त्वैव कार्यं। स्तेये ब्राह्मणस्य तस्य सुवर्णादेः
कृतेः पुनः। स्वामिने पहृतं देयं हर्त्रा त्वेकादशाधिकमिति स्मृतेः। अत्रापि। स्त्री बालवृद्धातुराणामर्द्धं प्राय
श्चित्तं बोध्यं। स्तेयसमे घृष्यवस्त्रादिहरणे षडब्दमेवेत्यन्यत्र विस्तरः॥ ॥ अथ गुरुतल्पगप्रायश्चित्तं॥ ॥
तत्र जनन्यां कामकृते गमने वसिष्ठः प्रायश्चित्तमाह। निष्कालको घृताभ्यक्तो गोमयेनाग्निनापादप्रभृ
त्यात्मानमवदाहयन्पूतो भवतीति विज्ञायत इति। अकामकृते आह याज्ञवल्क्यः। तल्पेयः शयने सार्द्धमा
यस्यायो षिता स्वपेदिति। एतदुभयोरप्ये नःप्रवृत्तावधेयं। स्वेनैव शोणं वमनुः। स्वयं वा शिश्नवृषणावु
त्कृत्याध्याय चांजलौ। नैर्ऋतीं दिशमानिपातादजिह्मगच्छेदिति। वसिष्ठोपि। वृषणं शिश्नमुत्कृत्य
जलावादाय दक्षिणाभिमुखो गच्छेद्यत्रैव प्रतिहतस्तत्रैव तिष्ठेदाप्रपातादिति। तयाप्रोत्साहितस्य तु प्रायश्चि

प्रा०मु०ली० त्तमाह यमः। गुरुदाराभिगमनं कृत्वा मोहेन वै द्विजः। ज्वलंती मायसीं नार्य्यांसं विष्टोऽकृतत्यागः।
२८ सूर्मीं ज्वलंतीं वाश्लिष्य मृत्युना स विशुध्यतीति। सूर्मी लोहादिमयी योषित्। गमनं चरमधातुविसर्ग
इति विज्ञानेश्वरः। कलियुगे ब्राह्मणस्य क्षत्रादिविवाहनिषेधाद्ग्रंथविस्तरभयाच्च क्षत्रियादिमातृग
मनप्रायश्चित्तमप्रतिपादितं। एतादृशविषये स्त्रीणामप्यसह विधिं कात्यायनः। एषदोषश्च शुद्धि
श्च पतितानामुदाहृता। स्त्रीणामपि प्रसक्तानामेष एव विधिः स्मृत इति। स्त्रीणामपि कामतः प्रवृत्तौ म
रणांतिकं।। लिंगं छित्वा वधस्तस्य सकामाया स्त्रिया अपीति यमो व्यवस्मरणात्। अकामतस्तु मनु
राह। एतदेव व्रतं कार्यं योषित्सु पतितास्वपीति। एतदेव पूर्वोक्तं द्वादशवार्षिकमेव। अत्र द्वादशवार्षिको
पक्रमे सत्यप्यर्धं दापनीयं। स्त्रीणामर्धं प्रदातव्यमिति पूर्वलिखितवचनात्। एवं जननीगमनप्रा
यश्चित्तमभिहितं।। ।। अथातिपातकानुपपातकविषये न्नच्यते। मतिपूर्वगमने कात्यायनः। जनन्यां
च भगिन्यां च स्वसुतायां तथैव च। स्नुषायां गमनं चैव विज्ञेयमतिपातकं। अतिपातकिनस्त्वेते प्रविशेयुर्हु
सि ला २ ताशनमिति। वृहद्यमः। रेतः कुमारीषु स्वयोनिष्वंत्यजासु च। सपिंडापत्यदारेषु प्राणत्यागो विधीयत इ २८
ति। अंत्यजाश्च दर्शिता मध्यमांगिरसा। चंडालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा। मागधायोगवौ

चैव सप्तैतेंत्यावसायिन इति। शौनकोपि। अयस्कारः स्वर्णकारस्तक्षा पाषाणवर्द्धकी। कांस्यताम्रकरास्तं
तुवायी श्वधूनिनोंत्यजा इति। एतत्प्रायश्चित्तं मतिपूर्वक बहुकालाभ्यासविषयं। अस्मिन्नेव विषये पराश
रः। मातृष्वसृगमे चैवमात्ममेंढ्रनिकृंतनमिति। याज्ञवल्क्येनापि। पितुः स्वसारमित्यनेन मतिपूर्वगमने म
ने ४ रणांतमुक्तं प्राक्।। ।। अथाज्ञानकृते मातृष्वसृगमे पराशरः।। अज्ञाने न तु यो गच्छेत्कुर्याच्चांद्रायणद्वयं।
दशगोमिथुनं दद्यात्शुद्धिं पाराशरोब्रवीदिति। बृहद्यमः। चांडालीं पुल्कसीं म्लेच्छीं स्नुषां च भगिनीं सखीं।
मातापित्रोः स्वसारं च निक्षिप्तां शरणागतां। मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितं। शिष्यभार्यां गुरो
र्भार्यां गत्वा चांद्रायणं चरेदिति। इदं च रेतःसेकात्प्राङ्निवृत्तौ बोध्यं। प्रायश्चित्तस्याल्पत्वात्। च
तुर्विंशतिमतेपि। पितृष्वसा मातुलानी श्वश्रूर्मातृष्वसा तथा। एता गत्वा स्त्रियो मोहाच्चरेच्चांद्राय
णव्रतमिति। लिंगयोनिसंबंधादर्वाङ्निवृत्तौ चतुर्विंशतिमते। पितृव्यभ्रातृभार्यां च भगिनीं मातु
रेव च। श्वश्रूमारुह्य धात्रीं च तप्तकृच्छ्रं समाचरेदिति। संवर्तः। गुरोर्दुहितरं गत्वा स्वसुतां पितुरेव च।
तस्या दुहितरं चैव चरेच्चांद्रायणव्रतं। सनाभनीं मातुलानीं स्नुषां मातुः सनाभनीं। गच्छन्नेतास्त्रि
यो मोहात्पराकेण विशुध्यति। सखिभार्यां समारुह्य श्वश्रूं चैव हि मानवः। अहोरात्रोषितो भूत्वा त

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० सकृच्छ्रद्वयं चरेत्। कुमारीगमने चैव व्रतमेतत्समादिशेदिति। चतुर्विंशतिमते। भ्रातुश्चैव कनिष्ठ
स्य भार्यां गत्वानुकामतः। सांतपनं तु कुर्वीत कृच्छ्रद्वयमथापि वा। मातुश्च स्वस्त्रियं गत्वा पितृव्यतन
२८ यां तथा। तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं तत्सुतासु च। गुरोर्दुहितरं गत्वा पराकं तु समाचरेत्। भागिनेयीं द्वि
जो गत्वा चरेच्चांद्रायणव्रतं। मातुलस्य स्नुतां गत्वा पितुश्च स्वस्त्रियं तथा। प्राजापत्यं प्रकुर्वीत हारी
तवचनं यथा। मातुश्च स्वस्त्रियां चैव भार्यां गत्वानुकामतः। पितृव्यतनयस्यैव सपादं कृच्छ्रमाचरेत्।
चरेच्चांद्रायणं विप्रो गत्वोपाध्याययोषितं। आचार्यस्य पराकं तु बौधायनवचो यथेत्यादि वचनेष्वन्येष
प्यनुपात्तवचनेषु प्रायश्चित्तस्य बाहुल्याल्पत्वश्रवणादिमानि वचांसि यथायथं कामाकामकृताभ्यासा
णी५ नभ्यासकृतदोषविषयाणीत्यलं विस्तारेतत्या॥ ॥अथ महापातकिसंसर्गप्रायश्चित्तं याज्ञवल्क्यः। श्रेण५
एभिस्तु संवसेद्यो वै वत्सरं सोपि तत्सम इति। एभिर्ब्रह्महमद्यपस्तेनगुरुतल्पगैः। तथा चायमर्थः। यो
येन साकमाचरति स तदीयमेव प्रायश्चित्तं कुर्यादित्यर्थः। मनुना तु सकलप्रायश्चित्तजातमभिधायां
तेभिहितं। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धय इति। अत्रेदमव २९
धेयं। महापातकिनां मरणांतिकप्रायश्चित्तमाज्ञातमृषिभिस्तथापि तत्संसर्गिषु तु तन्नातिदिश्यते।

मनुवाक्ये व्रतग्रहणोपपादनाद्व्रतस्यैवातिदेशात्। न हि मरणस्य व्रतत्वाह्व वाच्यं त्वमस्ति येन तस्यातिदे ण१
शसंभवः। तस्मादुक्तैव व्याख्या गरीयसी। अतः कामकृत एव संसर्गे द्वादशाब्दमकामकृते तदर्द्धमिति। अमु
मेवार्थं हृदि निधाय देशकालमाह। पतितेन सहोषित्वा ज्ञानात्संवत्सरं नरः। मिश्रितस्तेन सोब्दांते स्वयं च
पतितो भवेदिति। पतितैः सह किं कृते पापं संक्रामतीत्याह पराशरः। आसनाच्छयनाद्यानात्संभाषात्सह
भोजनात्। संक्रामंतीह पापानि तैलबिंदुरिवांभसीति। तैलबिंदुरिति कथनाज्ज्ञायते पापं प्रतिदिनं मंदं मं वे५
दं संक्रामति न तु संसर्गादेव सर्वमिति। बृहद्बृहस्पतिरपि। एकशय्यासनं पंक्तिर्भांडपक्वान्नमिश्रणं। या
जनाध्यापने योनिस्तथा च सहभोजनं। नवधा संकरः प्रोक्तो न कर्तव्योधमैः सहेति। मनुरपि। एभिस्त्रिभिरणि
र्निक्तैर्नार्थं कंचित्समाचरेदिति। विष्णुरपि। संवत्सरेण पतति पतितेन सहाचरन्नेकयानभोजनासनशयनैर्यो
नस्त्रौवमुख्यैः स्तु संबंधैः सद्य एवेति। स्त्रौवशब्देन याजनं। मुख्यशब्देन मुखजन्यत्वादध्यापनमभिधीयते।
अत्र परिगणितेषु यौनस्त्रौवमुख्यानां प्रत्येकं पतनहेतुत्वं बोध्यं। यः पतितैः सह यौनमुख्यस्त्रौवाणां संबं
धानामन्यतमं संबंधं कुर्यात्तस्याप्येतदेव प्रायश्चित्तमिति सुमंतुक्तेः। इतरेषां समुदितानामेव पतनहेतुत्वं।
एकयानं भोजनासनशयनैरिति। इतरेतरयुक्तानां निर्देशादिति विज्ञानेश्वरः। एषां पृथक्पतनहेतुत्वविधायक
श्रम:१ वचनाभावादिति च। स्मृत्यर्थसारे। एतैरेकासनस्थितिमेकपंक्तिभोजनं च एकशयने स्वापं च एकवाहनग

प्रा॰मु॰ली॰ तिंचरेदेकवत्सरं कृत्वा पातित्यमाप्नोतीति ॥ अथ महापातकिभिः सहाज्ञानेन संसर्गे मतिपूर्वंकृते प्रायश्चित्त
मुक्तं मिताक्षरायां सम्वत्सरे। पंचाहं तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकं। पराकस्त्वर्द्धमासे स्यान्मासे चांद्रायणं चरे
३० त्। मासत्रये तु कुर्वीत कृच्छ्रं चांद्रायणोत्तरं। षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्द्धमाचरेत्। संसर्गे त्वाब्दिके
कुर्यादब्दं चांद्रायणेन तु इति। अत्र विज्ञानेश्वरः। आब्दिके संसर्ग इति किंचिन्न्यूनत्वे द्रष्टव्यं। पूर्णे तु वत्स
रे मन्वादिभिर्द्वादशवार्षिकस्मरणादिति सम्यगाह। अकामकृते पराशर आह। संसर्गमाचरन्विप्रः पतिता
दिष्वकामतः। पंचाहं वा दशाहं वा द्वादशाहमथापि वा। मासार्धं मासमेकं वा मासत्रयमथापि वा। अब्दार्द्धमेकं
वा भवेदूर्ध्वं च तत्समः। त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्। चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव तु। चतुर्थे द
शरात्रं स्यात्पराकः पंचमे मतः। षष्ठे चांद्रायणं कुर्यात्सप्तमे त्वैन्दवद्वयं। अष्टमे च तथा पक्षे षण्मासात्कृच्छ्र
माचरेदिति॥ ॥अथ प्रसंगादभिशस्याभिशस्तयोः। याज्ञवल्क्यः। महापापोपपापाभ्यां योभिशंसेन्मृषा प
रं। अब्भक्षो मासमासीत स जापी नियतेन्द्रिय इति। जपः शुद्धवतीनामृचां। अभिशस्तस्याह पैठीनसिः। अ
नृतेनाभिशस्यमानः कृच्छ्रं समाः संचरेत्पातकेषु महापातकेषु द्विमासं कृच्छ्रमिति। उपपातके तु त्वाह याज्ञ ३०
वल्क्यः। अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा। निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वेति॥ ॥इति श्री विद्व
न्मुकुटमाणिक्य श्री भारद्वाज महादेव भट्टात्मज दिवाकर विरचिते धर्मशास्त्रसुधानिधौ प्रायश्चित्तमुक्तावलीप्रक

अथोपपातकप्रायश्चित्तान्यभिधीयंते॥ तत्रादौ गोवधप्रायश्चित्तमुच्यते। अत्र यद्यप्युच्चावचानि भूयांसि वच
नानि दृश्यंते तथापि यथामति विविच्य लिख्यते। अज्ञानाद्गोवधे याज्ञवल्क्यः। पंचगव्यं पिबन्गोघ्नो मासमासीत
संयतः। गोष्ठेशयो गोनुगामी गोप्रदानेन शुध्यति। कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः। दद्यात्त्रिरात्रं वोपो
ष्य वृषभैकादशास्तु गा इति। वृषभ एकादश यासां ता वृषभैकादशाः। अत्र विज्ञानेश्वरपराशरमाधवमते
चतुर्णामीदृशी व्यवस्था। जातिमात्रब्राह्मणस्वामिके गोवधे त्रिरात्रोपवासो वृषभैकादशगोदानं च। क्ष
त्रियस्वामिके पंचगव्याशनं। वैश्यस्वामिके मासमतिकृच्छ्रं। शूद्रस्वामिके कृच्छ्रमिति। अपरार्कमते। देशका
लवयःसामर्थ्यं विचार्य व्यवस्थेति। जाबालिः। प्राजापत्यं चरेन्मासं गोहंता चेदकामतः। गोहितो गोनुगामी
च गोप्रदानेन शुध्यतीति। यदीयं द्रव्यं नाशयति तस्य द्रव्यादिदानेन संतोषं जनयेत्। तदुक्तमपरार्के। मनुस्मृ
तौ। हिंसाद्रव्याणि यो यस्य ज्ञानतोऽज्ञानतोपि वा। स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्सममिति। यत्त्वापस्त
म्बेनोक्तं। गोघ्नः कुर्वीत संस्थानं गोष्ठे गोरूपसन्निधौ। तत्रैव शयनं चास्य मासार्द्धं क्षितिशायिनः। सक्तुया
वभक्ष्याणि पयो दधि शिरः शकृत्। शरीरं धिकुग्धद्भस्मः। एतानि क्रमशोऽश्नीयान्नरस्तत्पापमोक्षकः। शुध्य
तेसोऽर्द्धमासेन नखरोमविवर्जितः। स्नानं त्रिषवणं तस्य सभवेन्नियतेन्द्रियः। एतत्समाहितः कुर्यान्नरो वि
गतमत्सरः। गायत्रीं च जपेन्नित्यं पवित्राणि च शक्तितः। पूर्णे चैवार्द्धमासे तु सविप्रान्भोजयेद्द्विजः। भुक्त

Indira Gandhi National Centre for the Arts

प्रा०मु०ली० वत्सश्च विप्रेषु गाश्च दद्याद्विचक्षणः। गवामभावे दातव्यं गोमूल्यं न तु संशयः। अनेन च विधानेन गोघ्नो
मुच्येत किल्बिषादिति। तद्गुणवद्बहुल विषयं। पन्नुयमेनाप्यधायि। गोसहस्रं शतं वापि दद्यात्सुचरितव्रतः।
३१ व्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति तत्र खड्गादिना कर्मागभ्दे लकपिला गर्भिणी वधे हस्त
व्यं। गर्भिणीं कपिलां दोग्ध्रीं होमं धेनुं च सुव्रतां। खड्गादिना घातयित्वा द्विगुणं व्रतमाचरेदिति ब्रह्मस्प
स्पतिवाक्ये विशिष्टवाक्यश्रवणात्। एवमन्यान्यपि वचनान्यन्यथैव दिग्भाग्वस्थाप्यानि। कामकृते तु गो
वधे मनुराह। उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत्। कृतवापो वसेद्गोष्ठे चर्मणार्द्रेण संवृतः। चतुर्थ
कालमश्नीयादक्षारलवणं मितं। अथापरं। गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः। दिवानुगच्छेत्ता
गश्व ६ गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्। आसीनास्व पि वासीनो नियतो वीतमत्सरः। आतुरामभिशस्तां वा चोरव्या वा ५
घ्रादिभिर्भयैः। पतितां पंकलग्नां वा सर्वप्राणैर्विमोक्षयेत्। उष्णे वर्षति शीते वा मारुते वाति भृशं। न कुर्वी
तात्मनस्त्राणं गोरकृत्वा तु शक्तितः। आत्मनो यदि वान्येषां गृहे क्षेत्रे खले पि वा। भक्षयन्तीं न कथयेत्पि
बंतं न्वैव वत्सकं। अनेन विधिना यस्तु गोघ्नो गा अनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति॥ अ ३६
र्षभैकादशा गाश्च दद्यात्सुचरितव्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति। गुणव
यत्नतीयं॥ वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति। गुणव =
द्गुणकपिलादिभेदैरत्रापि पक्षत्रयव्यवस्थोहनीयेति दिक्॥ अथान्यानि वधनिमित्तान्याह पराशरः॥
शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनी भवेत्। तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्॥ ६

रोधबंधनयोक्त्राणि घातश्चेति चतुर्विधं। वधनिमित्तमिति शेषः पूरणीयः। अत्र प्रायश्चित्तान्याह स एव।
एकपादं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योक्त्रेषु पादहीनं स्याच्चरेत्सर्वं निपातने इति। योक्त्रं वधलक्षणमा
ह। हले वा शकटे पंक्तौ पृष्ठे वापीडितो नरैः। गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वध इति। गोपतिर्वृषः। अंगि
राः कृमासद्वयकृच्छ्रं गोव्रतत्वेनाभिधाय तत्पादादीन् रोधनादिषाह। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योज
नेषु पादहीनं स्याच्चरेत्सर्वं निपातन इति। बंधनरोधनयोः क्वचित्प्रतिप्रसवमाह पराशरः। अन्यत्रांकनलक्षाभ्यां हमा०
वाहने मोचने पि वा। सायंसंगोपनार्थं च न दुष्येद्रोधबंधनोरिति। स्थिरचिह्नकरणमंकनं। तद्विपरीतं लक्ष्मं।
आपस्तंबः। अतिदाहातिवाहाभ्यां नासिकाछेदने तथा। नदीपर्वतसंरोधे मृते पादोनमाचरेत्। दाहो अंकनकाल
दाहातिरिक्तः। तादृशो दाहदोषाभावश्रुतेः। स एव। कंठाभरणदोषेण विपत्तिर्यत्र गोर्भवेत्। कृच्छ्रार्द्धं तु भवेत्तत्र घंटा५
भूषणार्थं हि तत्स्मृतं। अतिदाहातिदमने संघाते चैव योजने। बद्धाः शृंखलपाशैश्च मृते पादोनमाचरेदिति। यम
आह। काष्ठलोष्टादिभिर्गावः शस्त्रैर्वा नि हता यदि। प्रायश्चित्तं कथं तत्र शस्त्रे शस्त्रे विधीयते। काष्ठे सांतपनं कु
तु२ र्यात्प्राजापत्यं तु लोष्टके। तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकं। प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं। त्रिं
शद्गा वृषभं चैकं दद्यात्तेभ्यश्च दक्षिणामिति। वध्ये कत्वे हंतृबहुत्वे यस्य प्रहारेण हता तस्याधिकप्रायश्चित्तप्रदर्शनो

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० यमुपायमाह पराशरः। एकोहतोयैर्बहुभिः समेतैर्नज्ञायते यस्य हतोभिघातात्। दिव्येन तेषामुपलभ्य हंता
निवर्त्तनीयो नृपसंनियुक्तैः॥ अस्यार्थः। बहुजनप्रहारैर्मृतेर्गवि यद्दीयः प्रहारः प्राणवियोगनिमित्तं नज्ञातस्त
३२ त्रतुलाग्न्यादिदिव्येन तंनिश्चित्य समहात्यबहुस्यसंपूर्णगोहत्याव्रतंकारयेदिति। इतरेषांप्रहर्तॄणामाह
तुः संवर्त्तापस्तंबौ। एकोन्वेद्बहुभिःकाचिद्दैवाद्व्यापादितायदि। पादं तु हत्यायाश्चरेयुस्तेपृथक्पृथगि पादं४
ति। यादृग्विधहत्यायां यत्प्रायश्चित्तमुक्तं तत्पादं प्रत्येकमाचरेयुरित्यर्थः। दैवादित्युक्तेरेतदकामकारविष
यं। कामकारे द्विगुणं। एकं घ्नतां बहूनां तु यथोक्ताद्द्विगुणो दमः इति स्मृत्यंतरात्। व्यासआह। औषधं लवणं चैव
पुण्यार्थमपि भोजनं। अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत्। अतिरिक्ते विपत्तिश्चेत्कृच्छ्रपादो विधीयतइ
ति। पराशरः। मूर्छितः पतितो वापि दंडेनाभिहतः स तु। उत्थितस्तु यदा गच्छेत्पंच सप्त दशैव वा। पदानि तिरोषभागः।
ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि। पूर्वव्याध्युपसृष्टश्चेत्प्रायश्चित्तं न विद्यत इति। पूर्वव्याध्युपसृष्ट इ
ति विशेष्यं। एकेन व्यापारेण बहूनां व्यापादने व्यापारैक्याद्वध्यसंख्यया न व्रताचरणं। किंतु अतो द्विगुण्येन नि
र्वाह इत्याह संवर्त्तः। व्यापन्नानां बहूनां तु रोधने बंधनेपि वा। भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति। ३२
गोगर्भवधे आह पराशरः। पिंडस्थे पादमेकं तु द्वौ पादौ गर्भसंमिते। पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतन

मिति। एतदर्थप्रकाशकं षट्त्रिंशन्मतेवचनं। पाद उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते। पादोनं व्रतमुद्दिष्टं ह
त्वा गर्भमचेतनं। अंगप्रत्यंगसंपूर्णे गर्भे चेतःसमन्विते। द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिरिति॥
गो३ ॥ ॥ अथावयवविशेषहनने पराशरः॥ पाषाणेन दंडेन गावो येनाभिघातिताः। शृंगभंगे चरेत्पादं द्वौ पादौ
नेत्रघातिने। लांगूले पादकृच्छ्रं तु द्वौ पादावस्थिभंजने। त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने इति। दंड
लक्षणमाह पराशरः। अंगुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणतः। आर्द्रश्च सपलाशश्च दंड इत्यभिधीयत इ
ति। यत्त्वापस्तंबांगिरोभ्यां दर्शितं। अस्थिभंगं गवां कृत्वा शृंगभंगमथापि वा। त्वक्छेदे पुच्छनाशे वा मा
सार्द्धं यावकं पिबेदिति। तत्कपिलादिगोविषये युक्तमाभाति। यदा तु शृंगादिभंगोत्तरं चिरकालेन गौ
र्मृता तदा संपूर्णवधप्रायश्चित्तमपेक्षितमित्यभिप्रेत्याह पराशरः। शृंगभंगेस्थिभंगे च कटिभंगे तथै
व च। यदि जीवति षण्मासात्प्रायश्चित्तं न विद्यत इति। सएव। ग्रामघाते शरौघेण वेश्मबंधनिपातने। अ
तिवृष्टिहतानां च प्रायश्चित्तं न विद्यते। संग्रामे प्रहतानां च ये दग्धा वेश्मकेषु च। दावाग्निग्रामघातेषु प्रा
यश्चित्तं न विद्यते। यंत्रिता गौश्चिकित्सार्थं मूढगर्भविमोचने। यत्ने कृते विपद्येत प्रायश्चित्तं न विद्य
त इति। संवर्त्तः। औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च। दीयमाने विपत्तिश्चेन्न स पापेन लिप्यते। औ

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० षधमनतिरिक्तं। अतिरिक्ते तु पूर्वोक्तलिखितवचनाद्दोषोस्त्येव। दाहछेदशिराभेदैः प्रयोगे रूपकुर्वतां।
३३ द्विजानां गोहितार्थं च प्रायश्चित्तं न विद्यते। योगीश्वरोपि। क्रियमाणोपकाराय मृते विप्रे न पातकं। विपा
के गोवृषाणां तु भेषजाग्निक्रियासु च। अंगिराः। औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु यः। विपाके तु विप
त्तिः स्यान्न स दोषेण लिप्यत इति। गवादिविपत्तौ प्रेक्षका अपि पापभागिन इत्याह पराशरः। गोवृषाणां
विपत्तौ च यावंतः प्रेक्षका जनाः। अनिवारयतां तेषां सर्वेषां पातकं भवेदिति॥ ॥अथ कीदृग्विधे प्रायश्चि
त्ते कीदृग्वपनमित्याह स एव। पादे गरोमवपनं द्विपादे श्मश्रुणोपि च। त्रिपादे तु शिखावर्ज्यं सशिखं तु
निपातन इति। यदा राजा वा राजपुत्रो वा वपनं कृतं वै कृच्छ्रमसहमानस्तदा प्रकारमाह स एव। केशा
नां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेदिति। आपस्तंबः। य
स्य न द्विगुणं दानं केशांश्च परिरक्षतः। तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेत्। यत्किंचित्क्रियते पापं स
र्वं केशेषु तिष्ठति। तस्मात्सर्वप्रयत्नेन सशिखं कारयेद्द्विजः इति। स्त्रीणां सधवानां वपनप्रकारमाह पराश
रः। सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं। एवं नारीकुमारीणां शिरसो मुंडनं स्मृतमिति। स्त्रीणा ३३
कांश्चित्पदार्थान्निषेधति स एव। न स्त्रियाः केशवपनं न दूरे शयनासनं। न च गोष्ठे वसेद्रात्रौ न दि

वागा अनुव्रजेत्। नदीषु संगमे चैव अरण्येषु विशेषतः। न स्त्रीणामजिनं वासो व्रतमेवं समाचरेदिति। अत्र वपन
शब्देनाचूडमूलं मुंडनं विवक्षितं। तदेव स्त्रीणां प्रतिषिध्यते। ननु ततः पूर्वमुक्तं। अत्र गोवधप्रायश्चित्ते वृह
द्विष्णुर्विशेषं दर्शितवान्। विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं। वैश्येर्द्धं पाद पादं तु शूद्रजातिषु शस्य
तइति। यत्तु बृहस्पतेर्वाक्यं एकवर्षहते वत्से कृच्छ्रपादो विधीयते। अबुद्धिपूर्वं पुंसस्या द्विपादस्तु द्विहायने।
त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति तदल्पत्वादबुद्धिपूर्वकाधमसंबंधि गोवधे द्रष्टव्यमिति श्री
मा॥महच्चरणाः। गोवधप्रच्छादने दोषमाह पराशरः। दुहत्यो गोवधं कृत्वा प्रच्छादयितुमिच्छति। तस्यापि नर
कं घोरं कालसूत्रमसंशयं। विमुक्तो नरकात्तस्मान्मर्त्यलोके प्रजायते। क्लीबो दुःखी सकुष्ठी च सप्तजन्मा
नि वै नरः। तस्मात्प्रकाशयेत्पापं स्वधर्मं सततं चरेत्। स्त्रीबालभृत्यगोविप्रघातिको पंच वर्जयेदित्येषा
दिक्॥ ॥अथ पारदार्यप्रायश्चित्तमाप्रः॥ ब्राह्मणो ब्राह्मणीं गच्छेदकामाद्यदि कामतः। कृच्छ्रं चांद्रायणं कुर्या
दर्द्धमेव प्रमादतः। अर्द्धमेव सकामायां तत्र कृच्छ्रं सकृन्मतौ। अर्द्धमर्द्धं नृपादीनां दारेषु ब्राह्मणश्चरेत्।
एतद्व्रतं चरेत्तस्मादूर्द्ध्वं श्रोत्रियस्य परिग्रहे। अश्रोत्रियश्चेद्द्विगुणमगुणामर्द्धमेवेति। श्रोत्रियभार्यागमने
विशेषमाह गौतमः। द्वे परदारे त्रीणि श्रोत्रियस्येति। अस्य व्यवस्था विज्ञानेश्वरेण दर्शिता। ऋतुकाले काम

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ तोज्ञातिमात्रब्राह्मणीगमने वार्षिकं प्राकृतं ब्रह्मचर्यं। तस्मिन्नेव काले कर्मसाधनत्वादिगुणशालिन्या ब्राह्म
ण्यागमने द्विवर्षप्राकृतं ब्रह्मचर्यं। तादृश्या एव श्रोत्रियभार्याया गमने त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यमिति।
३४ युक्तं तु गौतमवचनं गर्भपर्यंतं श्रोत्रियभार्यागमनविषयमिति। गर्भपर्यंतमित्यनुवृत्तौ यमोपि। वर्षं द्वे परदारे
षु त्रीणि श्रोत्रियदारकृदिति। परदारेष्वपि यद्द्विवर्षपर्यंतं ब्रह्मचर्यविधानं तदपि गर्भाधानविषयं। श्रोत्रिय
दारकसाहचर्यात्। क्षत्रियादिस्त्रीषु ब्राह्मणस्य गमे आह संवर्त्तः। क्षत्रियां चैव वैश्यां वा गच्छेद्यः काममोहि
तः। तस्य सांतपनं कृच्छ्रं भवेत्तत्पापमोचनं। विप्रामस्वजनां गत्वा प्राजापत्यं समाचरेत्। अस्वजना मातृपितृ
पक्षासंबद्धा विप्रामस्वजनामेतच्च व्यभिचरति ब्राह्मणीविषयं। प्रायश्चित्तस्याल्पत्वात्। स एव। शूद्रां तु
ब्राह्मणो गत्वा मासं मासार्द्धमेव वा। गोमूत्रयावकाहारस्तिष्ठेत्तत्पापमोक्षकः। मतिपूर्वगमने गोमूत्र
यावकाहारो मासममतिपूर्वगमने तु मासार्द्धं तिष्ठेदित्यभिप्रायः गर्भमेतद्वचनमसकृद्गमने ज्ञेयं।
सकृद्गमने तु कण्वः। शूद्रदारान्गतो विप्रो अतिकृच्छ्रं समाचरेत्। चांद्रायणं विशेषाद्राज्ञः समं च ब्राह्मणश्च
तामित्याह। अन्त्योजातिमात्रब्राह्मण्यां त्रैमासिकमिति स्मृत्यर्थसारे। अमत्या सर्वत्रार्द्धं योज्यमित्यपि॥ ३४
अत्रोक्तमखिलं प्रायश्चित्तं गर्भानुत्पत्तिविषयं। तदुत्पत्तावाह उशनाः। गमने तु व्रतं यत्स्यात्गर्भे तद्द्विगुणं

भवेदिति। चतुर्विंशतिमते हि प्रकारांतरं। ब्राह्मणीगमने कृच्छ्रं गर्भे सांतपनं स्मृतं। राज्ञीगर्भे पराकः
स्याद्विड्गर्भे तु त्र्यहाधिकं। शूद्रागर्भे द्विजः कुर्यात्तद्वच्चांद्रायणं स्मृतं। चांडाल्यां गर्भमारोप्य गुरुतल्प
व्रतं चरेदिति। प्रातिलोम्येनत्व चाये सर्वत्र पुंसो वधः स्त्रियाः कर्णादिकर्त्तनं। प्रातिलोम्ये वधः पुंसो ना
र्याः कर्णादिकर्त्तनमिति शंखस्मृतेः। यत्तु संवर्त्त आह। कथंचिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव च। गो
मूत्रयावकाहारो मासार्द्धेन विशुध्यति। शूद्रस्तु ब्राह्मणीं गत्वा कथंचित्काममोहितः। गोमूत्रयावका
हारो मासेकेन विशुध्यति। तदेतदतीव व्यभिचारि ब्राह्मणीपरं। यदपि प्रचेतोवचनं। शूद्रस्य ब्राह्म पी६
णीं मोहाद्गच्छतः शुद्धिमिच्छतः। पूर्णमेतद्व्रतं देयं माता यस्माद्धि तस्य सा। पादहान्यान्यवर्णासु गच्छ
दृ३५ तः सार्ववर्णिकमिति श्लो वार्षिकव्रतातिदेशकं तत्प्रौढांधकारे स्वकलत्रभ्रांत्या गच्छतो बोध्यं। अत्रो
पपातकादिषु अमतिपूर्वाभ्यासे चतुर्विंशतिमते। सकृत्कृते तु यत्प्रोक्तं त्रिगुणं तत्त्रिभिर्दिनैः। मासा
त्पंचगुणं प्रोक्तं षण्मासाद्दशधा भवेत्। संवत्सरात्पंचदशान्यद्वात्रिंशद्गुणं भवेत्। ततोऽप्यब्दप्रक
ल्प्यं स्याद्यातातपवचो यथेति। बुद्धिपूर्वाभ्यासे त्वाह लौगाक्षिः। अभ्यासेहर्गणाद्वृद्धिर्मासाद्वा वि
धीयते। ततो मासगणाद्वृद्धिर्यावत्संवत्सरं भवेत्। ततः संवत्सरगुणं यावत्पापं समाचरेदिति॥

Indira Gandhi National Centre for the Arts

प्रा०मु०ली० अथविप्रस्यब्राह्मण्यादिस्वैरिणीगमनेयमआह॥ब्राह्मणोब्राह्मणींगत्वा द्विजेद्द्यात्कृष्णाजिनं। क्ष
३५ त्रियायांधनुर्दद्याद्वैश्यायामायसीं शिलां। शूद्रांगत्वातथाविप्रउदकुंभंद्विजातये। त्रिरात्रोपोषितः
स्नात्वादद्यात्संमार्जनीं तथेति। त्रिरात्रोपोषणंसर्वत्रबोध्यं। केचित्वेतस्यबंधकीविषयत्वंमन्यंते। बं
धकीगमनआहप्रचेताः। बंधकीगमनेउपस्पृश्यप्राणायामंकुर्यात्। अपहूतिन्दोषः। एषाशूद्राविट्
या। इतरासान्नामसंकीर्तनात्। ब्राह्मणबंधकींगत्वाकमंडलुंदद्यात्क्षत्रियबंधकीमायुधंवैश्यबंध
कींप्रतोदमिति। स्वैरिणीबंधकीलक्षणंस्मृत्यंतरे। चतुर्थःस्वैरिणीप्रोक्तापंचमीबंधकीतथेति। श्रीम
हाभारतेपि। अतःपरंस्वैरिणीस्यात्पंचमीबंधकीतथेति। अत्रचतुर्थपंचमोव्यभिचारोविवक्षितो। य
थुमनुनाभ्यधायि। शूद्राशयनमारोप्यब्राह्मणोयात्यधोगतिं। जनयित्वासुतंतस्यांब्राह्मण्यादेव
हीयतइतितत्पापगौरवख्यापनपरमिति विज्ञानेश्वरः। श्रीमात्तामहचरणाअप्येवं। चस्कृतस्त्व
भ्यासविषयेबोध्यं। विधवागमनेतु चतुर्विंशतिमते। विधवागमनेकृ
अतिनिषिद्धकर्मकारिशूद्रायामभ्यासविषयेबोध्यं। विधवागमनेतुचतुर्विंशतिमते। विधवागमनेकृ
च्छ्रमहोरात्रसमन्वितं। व्रतस्थागम[redacted]नेकृच्छ्रसपादंतुसमाचरेदिति। अथांत्यजागमनआहसंवर्तः। ३५
रजकव्याधशैलूषवेणुचर्मोपजीविनीः। एतास्तुब्राह्मणोगत्वाचरेच्चांद्रायणद्वयमिति। ब्राह्मणग्र

६

हणात्क्षत्रियादेःपादहीनंप्रकल्पनीयं। अंत्यजाआहापस्तंबः। रजकश्चर्मकारश्चनटोबुरुडएवच। कैव
र्तमेदभिल्लाश्चसप्तैतेत्वंत्यजाःस्मृताइति। चंडाल्याद्यंत्यजस्त्रीगमनेप्रायश्चित्तमुक्तंप्राक्। इदंप्राय
श्चित्तंकामतोगमनेज्ञेयं। अकामतआहापस्तंबः। चंडालमेदश्वपचकपालव्रतचारिणां। अकाम
तःस्त्रियोगत्वापराकव्रतमाचरेदितितदप्यकामविषयमितिविज्ञानेश्वरः। युक्तंतुविप्राणामिदंराज
न्यादीनामापस्तंबीयमिति। यत्तुशातातपीयं कैवर्तीरजकीचैववेणुचर्मोपजीविनी। प्राजापत्यवि
धानेनकृच्छ्रेणैकेनशुध्यतीतितत्प्रकृपरमितिश्रीगुरवः। रेलःसकृत्प्राग्निहतिविषयमितियुक्तंब
भाणमितिविज्ञानेश्वरः। रजकीगमनेउक्तंतदेवचर्मकारादिस्त्रीषुबोध्यन्यातिरिक्तं। बहूनामेक
धर्माणामेकस्यापियदुच्यते। सर्वेषांतद्भवेत्कार्यमेकरूपाहितेस्मृताइत्युशनोवचनात्। चंडाल्या
दिषुगर्भाधानेतुषड्विंशन्मतोक्तंद्वादशवार्षिकंव्रतंद्रष्टव्यं॥ अथांत्यजगमनेस्त्रीणामभिहितंस्मृत्यंत
रे। रजकव्याधशैलूषवेणुचर्मोपजीविनः। ब्राह्मण्येतान्यदागच्छदकामादैंदवद्वयं। अकामइत्युक्त्या
कामतोगमनेत्रिगुणंकल्पनीयं। अथचांडाल्यादिगमनआहपराशरः। चंडालीवाश्वपाकींवाअनुगच्छ
तियोद्विजः। त्रिरात्रमुपवासित्वाविप्राणामनुशासनात्। सशिखंवपनंकृत्वाप्राजापत्यद्वयंचरेत्।

Indira Gandhi National
Centre for the Arts

प्रा०मुक्ली० गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवी॥दिति। चंडालस्वरूपमाह यमः। आरूढपतिताज्जातो ब्राह्म
ण्यां शूद्रजश्च यः। चंडालौ तावुभौ प्रोक्तौ सगोत्राश्च जायत इति। निरुक्तं च चंडालाज्जातास्त्री चांडाली। श्व घ २
३६ पाकस्वरूपमाह मनुः। उग्रात्तु जातः क्षत्तायां श्वपाक इति कीर्तितः इति तस्माज्जातास्त्री श्वपाकी। राजन्यवि
शोराह स एव। क्षत्रियो यदि वा वैश्यो वा चांडालीं गच्छतो यदि। प्राजापत्यद्वयं कुर्याद्दद्याद्गो मिथुनद्वयमिति।
स्प ५ शूद्रस्त्वत्र व्रतमधिका दक्षिणेत्याह। श्वपाकीं वाथ चांडालीं शूद्रो वा यदि गच्छति। प्राजापत्यं चरेत्कृच्छ्रं चतुर्गो
मिथुनं यदीति। एतत्कामकारविषयं। अकामतस्तु स एव आह। अकामतस्तु यो विप्रश्चंडालीं यदि गच्छति।
तप्तकृच्छ्रेण शुध्येत प्राजापत्यद्वयेन वेति। यमस्तु व्यवस्थापूर्वकं प्रकांतेरारेण पक्षद्वयमुदाजहार। चंडाल
पुल्कसानां तु भुक्त्वा गत्वा च योषितं। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैंदवद्वयमिति। इंदवे तः से कपर्यंतं स न ४
कृद्गमनपरमिति माधवः। एवमादीन्यन्यान्यपि वचांस्येव दिशा योजनीयानीति संक्षेपः॥ ॥अथ चं
डालाद्यंत्यावसायिगमने स्त्रीणां स्मृत्यंतरे। चंडालपुल्कसम्लेच्छश्वपाकपतितं तथा। ब्राह्मण्यकाम
तो गत्वा चांद्रायणचतुष्टयमिति। चरेदिति शेषः पूरणीयः। अपि च। चंडालेनतु संपर्कं यदि गच्छत्क ३६
थंचन। सशिखं वपनं कुर्याद्भुंजीयाद्यावकौदनं। त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत्। शंख
आत्मनः संभिते कूपे गोमयोदककर्दमे। तत्र स्थित्वा निराहारा सा त्रिरात्रं ततः पिबेत्॥ १ =

पुष्पिलतामूलपत्रं वा कुसुमं फलं। क्षीरे कृष्णवर्णं संमिश्रं क्वाथयित्वा ततः पिबेत्। एकभक्तं चरेत्पश्चाद्याव
त्पुष्पवती भवेत्। बहिस्ता वच्च निवसेद्यावच्चरति तद्व्रतं। प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं। गो द्व च ३
यं दक्षिणां दद्याच्छुध्येत्स्वायंभुवोऽब्रवीदिति। एतदपि यमप्यकामविषयं। अकामतः कथंचनेति श्रवणा
त्। कामकृते गमने द्विगुणं प्रकल्प्यं। ब्राह्मणीग्रहणात् क्षत्रियादीनां क्रमेण पादपादोनमुभयत्र ध्येयं। यदि
तु कामकृते गमने द्विगुणं प्रकल्प्य। ब्राह्मणीग्रहणात्। क्षत्रियादीनां क्रमेण पादपादोनमुभयत्र ध्येयं। यदि
त्। कामकृते गमने द्विगुणं प्रकल्प्यं। ब्राह्मणीग्रहणात्। क्षत्रियादीनां क्रमेण पादपादोनमुभयत्रध्येयं। यदि
तु। अंतर्वत्नी तु युवतिः
वैपरीत्ये नांतर्वत्नी चंडालादिव्यवायं कुरुते तदा विशेषं प्रदर्शितवान्व्यासः। अंतर्वत्नी तु युवतिः
संपृक्ता चांत्ययोनिना। प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः। न प्रचारं गृहे कुर्यान्न चांगे षु प्रसा
धनं। न शयीत समं भर्त्रा न वा भुंजीत बांधवैः। प्रायश्चित्ते गते गर्भे विधिं कृत्वा विदिकं चरेत्। हिरण्यम
यनाधेनुं दद्याद्विप्राय दक्षिणामिति। यदा कामतोऽत्यंतसंपर्कमंत्यजेन साकं करोति तदाह शंखः। अंत्य
जेन तु संपर्कं भोजने मैथुने कृते। प्रविशेत्संप्रदीप्तेऽग्नौ मृत्युना सा विशुध्यतीति॥ ॥अथ रजस्वलागमने प्रा
यश्चित्तं॥ ब्राह्मणस्य कामतः सकृद्गमने आपस्तंबः। उदक्यां यदि गच्छेत ब्राह्मणो मदमोहितः। प्राजापत्ये
न शुध्येत ब्राह्मणानां च भोजनादिति। इदं प्राजापत्यात्मकं प्रायश्चित्तं तृतीयदिनगमनाभिप्रायं ज्ञेयं। तथा च
लौगाक्षिः स्मृतिमते। रजस्वलां द्विजो गत्वा पराकं तु समाचरेत्। सांतपनं द्वितीये ह्नि प्राजापत्यं परे ह्नीति। सांत

प्रा०मु०ली० पनोत्र महासांतपनो विवक्षित इति मदनपारिजातः। कामतः सकृद्गमने सप्तरात्रमिति। उपोषणमित्यर्थः। यत्तु
योगियाज्ञवल्क्यं त्रिरात्रांते घृतप्राश्य गत्वोदक्यां विशुध्यतीति तद् कामतः सकृद्गमनो विज्ञेयं। मनुः। अमानुषीषु
३७ गोवर्जमुदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेदिति शातातपः। अनुदकमूत्रपुरीषकर
णे श्वकाकस्पर्शने सचेलं स्नानं। महाव्याहृतिहोमश्च रजस्वलाभिगमने चैतदेवेत्युक्तमिति। शंखलिखितावपि।
रजस्वलावधूतादिगमने त्रिरात्रोपवासो घृतप्राशनं कुर्यादित्येवमादीन्यन्यान्यपि वाक्यानि ह्रासवृद्धि
बाधकानि तानि रेतःसेकाप्राप्ति-वृत्ति-क्षत्रियादिस्त्रीभेदान्योन्येच्छादिविषयभेदेन व्यवस्थापनीयानि॥
स्तु६ अथ मुखमैथुने आह उशनाः॥ मैथुनं श्लेष्मणो धर्मपत्नीमुखमैथुने सेवेत स दुःष्यति। प्राजापत्येन शुध्य
तीति॥ अथ वेश्यायां गर्भाधानपर्यंतं गमने कण्व आह। प्रसूतो यस्य वेश्यायां भेदश्च शुद्धिः यतेन्द्रियः। श्र
तं सहस्रमभ्यस्य सावित्रीमेति शुध्यतामिति। आधानात्प्राग्गमने वक्ष्यमाणपराशरवाक्यात्प्राजापत्यं।
विप्रो भवति स्त्रीजीवनहेतुतया ऽर्हतीति वेश्या॥ ॥अथ स्त्रीणां व्यभिचारप्रायश्चित्तान्यभिधीयंते। तत्र मनुः। ३७
विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादेकवेश्मनि। यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतमिति। अत्र च प्रायश्चित्तार्ह
मर्हतीति स्त्रियोरोगिण्या एव चेति परिभाषानादरणीया। तस्याः स्त्रीकृष्णपुरुषसाधारणव्रतोपदेशावि

षयत्वात्। असावसाधारणो निर्देशः। अत एवाह बृहस्पतिः। यत्पुंसः परदारेषु समानेषु व्रतं स्मृतं। व्यभि
चारात्तु भर्तुः स्त्री तदशेषं समाचरेदिति। समानेषु सवर्णेषु। एतेन वाचनिकातिदेशेन पादोनमेव स्त्रीणा
मिति ब्रुवंतो निराकृता वेदितव्याः। इदमिच्छापूर्वकव्यभिचार एव। अनिच्छापूर्वके तु स एव। अनिच्छंती या भु
क्ता गुप्तां तां कारयेद्गृहे। मलिनांगीमधःशय्यां पिंडमात्रोपजीविनीं। कारयेन्निष्कृतिं कृच्छ्रं पराकं वास
मागतां। समेन सवर्णेनागतां संगतामित्यर्थः। हीनवर्णोपभुक्ता या त्याज्या वध्याथवा भवेत्। अत्र स
कृद्गमने कृच्छ्रः। द्वितीयवारं गमने पराकः। तृतीये चांद्रायणमिति स्मरणिः। अग्रे तु स्वैरिणी भवति। बुद्धि
पूर्वके गर्भपर्यंते क्षत्रियवैश्यगमने त्याज्या। एवं शूद्रगमने वध्या। वधोऽत्र नासाकर्णच्छेदो न तु देहात्मवि
योगः। तादृशवध्यस्य निषेधात्। संवर्तोऽपि। बलात्प्रमथ्य भुक्ता चेद्वा समाने न्चेतसा। प्राजापत्येन शु
द्धिः स्यात्तत्तस्याः पावनं स्मृतं। पराशरस्तु परव्यवायमनिच्छंत्याः प्राजापत्यऋतुप्रस्रवणयोर्विकल्प
माह। सकृद्भुक्ता तु या नारी नेच्छंती पापकर्मभिः। प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन वेति। यानि तु यदि तु
ब्राह्मणीं गच्छेत्क्षत्रियं वैश्यमेव वा। गोमूत्रयावकैर्मासात्तदर्धाच्च विशुध्यति। वैश्यस्य गमने मासात्त्रि
यांचे विशुध्यति। ब्राह्मण्याः शूद्रसंपर्के कथंचित्समुपागते। चांद्रायणेन शुद्धिः स्यात्तदस्याः पावनं पर

Indira Gandhi National
Centre for the Arts

 मित्यादौ। निसंवर्त्तादिवचनानि बलात्कारभुक्तविषयाणीत्यलं। अयं बलात्कारभुक्तास्त्रीसंवासोऽपु
३८ गान्तरविषयः। बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदित इत्यनेन कलिवर्ज्येन तस्य वर्जितत्वात्।
तादृशीं कृतप्रायश्चित्तां यथोक्तपरित्यागेन त्यजेत्। तमाह योगी। हृताधिकारां मलिनीं पिंडमात्रोप
जीविनीं। परिभूतामधःशय्यां वासयेद्व्यभिचारिणीमिति॥ ॥अथ पशुगमन आह पराशरः। पशु
वेश्यादिगमने महिष्युष्ट्रीकपिस्तथा। खरीं च शूकरीं गत्वा प्राजापत्यं समाचरेदिति। इदं कामतः। अका
मत आह शंखलिखितौ। तिर्यग्योनिषु गोवर्जं सचेलं स्नात्वा तोयवसभारं दद्यादिति। पराशरः। महिषु
ष्ट्रखरीगामी त्वहोरात्रेण शुध्यतीति। एकोपवासेन शुध्यतीत्यर्थः॥ ॥अथ गोगमने॥ पराशरः। गो
गामी च त्रिरात्रेण गामेकां ब्राह्मणे ददत्। रेतःसेकात्तु सकृत्कृच्छ्रपादो विधीयत इति। अत्र पूर्वार्द्धं सकृ
द्गमने रेतःसेकाभावविषयं। अधिकृच्छ्रादिगुणवत्त्वात् गवि आवृत्तौ चतुर्विंशतिमते। नरो गोगम
नं कृत्वा चरेच्चान्द्रायणं व्रतमिति। तत्रैव विषये त्यन्ताभ्यासे विष्णुराह। कुर्यात्परदारगमने गोव्रतं गोगमने
च तिर्यग्योनावाकाशे पूत दिवा गोयाने च सवासास्नानमाचरेदिति। अथ गोयुक्तशकटारूढसन्यः स्त्री ३८
व्यवायं करोति तं प्रत्याह यमः। यदि गोभिः समायुक्तं यानमारुह्य वै द्विजः। मैथुनं सेवते तत्र मनुः स्वायंभु

वोऽब्रवीत्। त्रिरात्रं क्षपणं कृत्वा सचेलं स्नानमाचरेत्। गोभ्यो यवाढकं दत्वा घृतं प्राश्य विशुध्यतीति। त्रिरात्र
क्षपणमुपवासे नेति भावः। मनुरपि। मैथुनं तु समारोप्य पुंसि योषिति वा द्विजः। गोयाने प्सु दिवा चैव सवा
सास्नानमाचरेदिति॥ ॥अथ स्त्रीवधप्रायश्चित्तानि॥ ब्राह्मण्यादिकवधे व्यासः। अकामतः स्त्रियं हत्वा
ब्राह्मणीं विट्श्यवच्चरेत्। कामतो द्विगुणं प्रोक्तं प्रदुष्टायां न किंचन। पुण्याल्लोकान्वा मोति शूद्रगां यस्तु पा
तयेत्। पतिघ्नीं भ्रूणघ्नीं सा हि संकरकारिकेति। अंगिरास्तु विषयविशेषव्रतातिरेकमाह। आहि
ताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिंदितां। ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति। ईषद्व्यभिचारिणब्रा
ह्मण्यादिवधे आह याज्ञवल्क्यः। अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेदिति। अप्रकर्षेण दुष्टा अप्रदुष्टा।
अत्र विज्ञानेश्वरः। शूद्रहत्याव्रतं षाण्मासिकं दशाधेनूर्वा दद्यात्। इदं च षाण्मासिकमकामकृते ब्राह्मण्या
व्यापादने क्षत्रियावधे च कामकृते कामतो वैश्यावधे दशाधेनूर्दद्यात् कामतः शूद्रावधे उपपातकसाधार
णप्रायश्चित्तं मासं पंचगव्याशनमित्याह। अनृतुमतीवधे जातिभेदेनाह प्रचेताः। अनृतुमतीं ब्राह्मणीं हत्वा कृ
तु३ च्छ्राब्दषण्मासान्वेति क्षत्रियां हत्वा षण्मासान्मासत्रयं च वैश्यां हत्वा मासत्रयं सार्द्धमासं वेति शूद्रां हत्वा सा
र्द्धमासं सार्द्धं त्रिंशद्दिनानि वेति। प्रतिलोमपुरुषसंबंधेन जातापत्यस्त्रीणां कामतो वधे आह ब्रह्मगर्भः।

Indira Gandhi National
Centre for the Arts

प्रतिलोमप्रसूतानांस्त्रीणांभासावधेस्मृताः। अंतरप्रभवानांच सूतादीनांचतुर्द्विषडिति। ब्राह्म
प्रा०मु०ली० णीवधेषट् क्षत्रियायाश्चत्वारो वैश्यायायाद्वाविति योजना। याज्ञवल्क्योपि। दुर्वृत्तब्रह्मविट्क्षत्रशूद्र
३८ योषाःप्रमाप्यतु। दृतिंधनुर्वस्तमविंक्रमाद्द्याद्विशुद्धयेइति। चर्ममयंजलभांडं। धनुःकार्मुकं। वस्तश्छागः।
अविर्मेषः। एतदकामतोवधे द्रष्टव्यं। सूतादीनांवधेचैवमितिस्मृत्यर्थसारे॥ ॥अथदुष्टस्त्रीवधे॥
अविर्मेषः। एतदकामतोवधेद्रष्टव्यं। सूतादीनांवधेचैवमितिस्मृत्यर्थसारे। ॥अथ दुष्टस्त्री विवधे।
पराशरः। वैश्यंवाक्षत्रियंवापि निर्दोषंयोभिघातयेत्। सोपिकृच्छ्रद्वयंकुर्याद्गोविंशद्दक्षिणांददेदिति।
पराशरः। वैश्यंवाक्षत्रियंवापिनिर्दोषंयोभिघातयेत्। सोपिकृच्छ्रद्वयंकुर्याच्छूद्रस्यैदवमे
सदोषवधेचतुर्विंशतिमते। क्षत्रियस्यवधंकृत्वाचरेच्चांद्रायणत्रयं। वैश्यस्यतुद्वयंकुर्याच्छूद्रस्यैदवमे
सदोषवधेचतुर्विंशतिमते। क्षत्रियस्यवधंकृत्वाचरेच्चांद्रायणत्रयं। वैश्यस्यतुद्वयंकुर्याच्छूद्रस्यैकंविधीयते
वचेति। व्रतस्थक्षत्रादिवधेमनुराह। अकामतस्तुराजन्यंविनिपात्यद्विजोत्तमः। वृषभैकसहस्रागा
दद्यात्सुध्यर्थमात्मनः। त्र्यब्दंचरेद्वानियतोजटीब्रह्महणोव्रतं। वसन्दूरतरेग्रामाद्वृक्षमूलनिकेतनः।
एवमेवचरेदब्दंप्रायश्चित्तंद्विजोत्तमः। प्रमाप्यवैश्यंवृत्तस्थंदद्याद्वैकशतंगवामिति। हत्वान्युक्ता [redacted] नि
मिताक्षरायां। गुरुपूजाघृणाशौचसत्यमिंद्रियनिग्रहः। प्रवर्तनंहितानांचतत्सर्वंवृत्तमुच्यतइति।
कामतस्तुवधेहारीतः। ब्राह्मणःक्षत्रियंहत्वाषड्वर्षाणिव्रतंचरेत्। वैश्यंहत्वाचरेदेवंव्रतंत्रैवार्षिकंद्विजः। ३९
शूद्रंहत्वाचरेदेवंवृषभैकादशाश्चगाइति। श्रोत्रियवधेविष्णुः। एतन्महाव्रतंब्रह्महत्यावद्द्यात्सवं

त्सरंकुर्यात्। यागस्थंक्षत्रियंवैश्यंगर्भिणींवारजस्वलांवा। अत्रिगोत्रांचेति। यथाहतस्यभेदेनप्रायश्चि
त्तमभिहितंएवंकर्तृभेदेनापिबोध्यं। विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतं। वैश्येर्द्धंपादमेकं
तुशूद्रजातिषुशस्यतइतिविष्णुस्मरणात्॥ ॥अथविप्रादिकर्तृकेचंडालादिवधेगिराःप्राह॥ अंत्यजा
नांतुगमनेभोजनेतुप्रमापणे। पराकेणविशुद्धिःस्याद्भगवानंगिराब्रवीदिति॥ पराकस्तुमतिपूर्वेह
नने। अमतिपूर्वेचांद्रायणं। तथाचलोगाक्षिः। हननेप्रतिलोमानांशूद्रजानांकथंभवेत्। ज्ञानपूर्वंपराकःस्या
दज्ञानेत्वैंदवंतथेति। सूतादिवधेप्येतदेव। चांद्रायणंचरेत्सर्वान्निपकृष्टान्निहत्यत्विति योगीश्वरस्मरणा
त्। प्रायश्चित्तांतरमाहपराशरः। चंडालंहतवान्कश्चिद्ब्राह्मणोयदिकंचन। प्राजापत्यंचरेत्कृच्छ्रंगोद्वयंदक्षि
णांददेत्। क्षत्रियेणापिवैश्येनशूद्रेणैवेतरेणवा। चंडालस्यवधेप्राप्तेकृच्छ्रार्द्धेनविशुध्यतीति। यदिचां
डालादिश्चोरस्तदाःस्त्यमित्याहसएव। चोरःश्वपाकश्चांडालोविप्रेणाभिहतोयदि। अहोरात्रोषितःस्ना
त्वापंचगव्येनशुध्यतीति। पंचगव्यप्राशनेनेत्यर्थः॥ ॥अथमार्जारादिवधेहिंसाप्रसंगादुच्यते। मनुःमा
र्जारनकुलौहत्वाचाषंमंडूकमेवच। श्वगोधोलूककाकांश्चशूद्रहत्याव्रतंचरेत्। एतच्चसमुदितवधेज्ञेयं।
पयःपिबेत्त्रिरात्रंवायोजनंवाध्वनोव्रजेत्। उपस्पृशेत्स्रवंत्यांवासूक्तंचाब्दैवतंजपेदिति। इदंप्रत्ये
कवधेद्रष्टव्यं। पराशरस्तुप्रकांतरमाह। हत्वामूषिकमार्जारसर्पाजगरडुंडुभान्। कृसरंभोजयेद्विप्रान्लोह

पा०मु०ली० दंडंच दक्षिणामिति। नकुलवधेपि द्रष्टव्यमेतत्। हत्वा मूषकमार्जारनकुलमंडूकडुंडुभाजगराणामन्यतमं
कृसरान्नं भोजयित्वा लोहदंडं दक्षिणां दद्यादिति विष्णुः।। कृसरास्तिलमिश्र ओदनः। ओदनस्तु प्रसि
५० द्धः स्यात्पायसः पयसान्वितः। ओदनस्तिलमिश्रस्तु कृसरः परिकीर्तितः। तिलकल्कान्विनिक्षिप्य श्र
तो वा कृसरो भवेदिति वृत्तिकृल्लिखितवचनात्। यत्तु माधवेन कृसरं तिलमिश्रमन्नमित्युल्लेखितं तद्
तेन परास्तं।। ।।अथ प्रसंगान्नागबलिविधिरुच्यते।। शौनकः।। अथ वक्ष्यामि सर्पस्य संस्कारविधि
मुत्तमं। सिनीवाल्यां पौर्णमास्यां पंचम्यां वापि कारयेत्। आश्लेषार्क्षसंयुक्तायां नवम्यां वापि कारयेत्। कृ
तसर्पवधो विप्रः पूर्वजन्मनि वा यदि। स्नात्वागत्य ततो ब्रह्मदंडं दद्याद्द्विजातये। वधं प्रख्यापयेत्पापी चरे
त्कृच्छ्रं चतुर्दश। वधे त्र जन्मनि कृते लोहदंडं द्विजातये। दद्यात्पापविशुद्ध्यर्थं श्रोत्रियाय कुटुंबिने। प्र५
विप्राय दंडमूल्यं वा तदभावे सशक्ति दापयेत्। साक्षाद्वधे कर्मकर्त्तुरेतद्देवं दापयेत्। मूल्यमाहुः स एव। निष्क
त्रयं द्विनिष्कं वा निष्कमेकं कनीयसः। अनुमत्यादिकर्तृणां निष्कमर्द्धं तदर्द्धकं। दंडं च स्वर्णरौप्ययोः शक्त्या ज्ञे
यं। स च तु पलमान एव। वित्तशाठ्यं न कुर्वीत दद्याद्वित्तानुसारतः। अनुज्ञां च गुरोर्लब्ध्वा संस्कुर्यात्तदनंत ५०
रं। प्रियंगुव्रीहिगोधूमतिलपिष्टेन वा पुनः। कृत्वा सर्पाकृतिं शूर्पे निधाय प्रार्थयेदहिं। एहि पूर्वमृतः स
र्प अस्मिन्पिष्टे समाविश। संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः। यज्ञोपवीतगंधाद्यैः संपूज्य

च हरेद्वहिः। कुर्यात्संस्कारसंकल्पं प्राणायाममतः परं। यज्ञोपवीतिना कार्यं सर्पसंस्कारकर्म तु। लौकिका
ग्निं प्रतिष्ठाप्य समिधादानमाचरेत्। ततोग्नेरग्निदिग्भागे भूमिं प्रोक्ष्य च वारिभिः। चितिं कृत्वाथ संस्तीर्य
कुशैराग्नेयकाग्रकैः। पर्युक्ष्याग्निं परिस्तीर्य परिषिंच्य समर्पयेत्। कृतेध्माधानपर्यंतं षट्पात्रासादनादि
कं। आधारं चक्षुषी कृत्वा सर्पिषा च यथाविधिः। सर्पं गृहीत्वा यत्नेन चितिमारोपयत्सुधीः। अपः स्पृष्ट्वा
स्पृष्ट्वा छात्र गत्वा चाग्निसमीपतः। स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्ततः। सर्पास्ये जुहुयादाज्यं व्या
हृत्य च समग्रया। आज्यशेषं स्रुवेणैव सर्पदेहे निषेचयेत्। उपतिष्ठेद्धमानेन नमोस्तु सर्पमंत्रतः। ज्ञानतो
ज्ञानतो वापि कृतः सर्पवधो मया। पूर्वजन्मनि वा सर्प तत्सर्वं क्षंतुमर्हसि। इति संप्रार्थ्य नागेंद्रं स्नात्वा
गत्य ततः पुनः। क्षीराज्येन ततश्चाग्निं प्रोक्ष्य व्याहृतिभिस्त्रिभिः। कृते सर्पजलेनाग्निमभिषिच्य ततः प
रं। नास्थिसंचयनं कुर्यात्स्नात्वागत्य गृहं व्रजेत्। ब्रह्मचर्यादिकं कार्यं त्रिरात्राशौचमिष्यते। स्नचैलं तु चतु
र्थेह्नि स्नात्वा विप्रान्समर्चयेत्। सर्पानंतस्तथा शेषः कपिलो नाग एव च। कालियः शंखपालश्च भूधर
श्चेति कीर्तिताः। पादप्रक्षालनं कुर्यादेभिर्नामपदैः पृथक्। गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्। घृत
पायसभक्ष्यैश्च द्विजानष्टौ च भोजयेत्। एवं कृते विधानेन तु सर्पसंस्कारकर्मणि। सर्पहिंसाकृतात्पापान्मुच्य
ते नात्र संशयः। कुष्ठव्याधिसमायुक्ते सर्वथा भेषजं त्विदं। आयुरारोग्यमैश्वर्यं प्राप्य कामानवाप्नुयादिति।।

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ अथप्रयोगः॥ पंचम्यादिदिनेषु कृतनित्यक्रियोमयेह जन्मनि जन्मांतरे वाकृतसर्पवधजन्य
संतत्यादिविच्छेदरूपदोषपरिहारार्थं नागबल्यधिकारसिद्ध्यर्थं च चतुर्दशकृच्छ्रात्मकं प्रायश्चित्तम
४१ मुकप्रत्याम्नायेन करिष्य इति संकल्प्य तत्परिषदादि प्राच्योदीच्यां गरहितं कुर्यात्। इह जन्मनि साक्षा
त्सर्पहंता कुटुंबिने विप्राय लोहदंडयष्टी कृतजिह्वं च यवादद्यात्। जन्मांतरे नैतत्। ततः सर्वसामग्रीसंपा
घप्राणानायम्य तिथ्यादि स्मृत्वा मयेह जन्मनि जन्मांतरे वा कृत सर्पवधजन्यसंततिविच्छेदरूपदो
षापनोदपूर्वकसंततिप्राप्त्यर्थं नागबलिं करिष्य इति संकल्प्य प्रियंगुव्रीहिगोधूमतिलपिष्टधान्यतैः पिष्ट म ६
नप्रस्थमितेन सर्पाकारं विधाय तन्नवे शूर्पे निधाय हस्तेन स्पृष्ट्वा प्रार्थयेदनेन मंत्रेण। एहि पूर्वमृतः सर्प
अस्मिन्पिष्टे समाविश। संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः इति प्रार्थ्य वस्त्रोपवीतगंधाद्यैः सं
पूजयेत्। ततो गृह्याद्बहिः स्वतीर्थदेशं गत्वा यज्ञोपवीत्येव पूर्वाहस्तकलावादय्यस्य सर्पस्य संस्कारकर्मक
रिष्य इति संकल्प्य इषुमात्रे स्थंडिलेऽग्निस्थापनं कुर्यात्। अस्मिन्सर्पसंस्कारकर्मणि व्याहृतिहोमं करि
ष्ये। तत्र स्थंडिलादि करिष्य इति संकल्प्योल्लेखनाद्यग्निप्रतिष्ठांतं कृत्वास्मिन्कर्मणि देवतापरिग्रहार्थ ४१
मन्वाधानं करिष्ये। अस्मिन्नन्वाहितेऽग्नावित्याद्याज्यभागांतमुक्त्वात्र प्रधानमग्निं वायुं सूर्यमेताः
प्रधानदेवता आज्येन भूर्भुवः स्वरितिसर्पमुखे प्रजापतिमाज्येनाज्यशेषेण सर्प॰ शे॰ यक्ष्य इति स

मिद्द्वयमग्नावाधायेध्माबर्हिषोश्च सन्नहनमित्यंतमुक्त्वाग्नेराग्नेय्यां दिग्भागे भूमिं प्रोक्ष्य चितिं कृत्वाग्ने
याग्नेके दर्भैः स्तामास्तृणीयात्। ततोऽग्नेः परिसमूहनाद्याज्यभागांतं कृत्वा एवं कृतायां चित्यां पिष्टसर्प
मृत्पादृहीत्वारोपयेत्। ततः स्रुवेणाज्यं गृहीत्वा ॐ भूः स्वाहा अग्नय इदं न मम। भुवः स्वाहा वायव इ
दं॰। स्वः स्वाहा सूर्याय इदं न ममेति प्रधानहोमं कृत्वा ॐ भूर्भुवः स्वः स्वाहेति समस्तव्याहृतिभिराज्यं
सर्पास्ये कृत्वाज्यशेषं स्रुवेणैव सर्पदेहे निषेचयेत्। ततो हस्ताभ्यां गृहीतेश्म सजलैः समस्तव्याहृत्या सर्प
प्राश्याग्ने रक्षाणइति वसिष्ठोऽग्निर्गायत्री। सर्पाथाग्निदाने विनियोगः॥ अग्ने रक्षाणो अंहसः प्रतिष्म
देव रीषतः॥ तपिष्ठैरजरो दह॥ अमुनामंत्रेणतमग्निं सर्पायदद्यात्। दह्यमाने तेमंत्रैरुपतिष्ठेत्॥ नमो
अस्तु सर्पेभ्यो ये के च पृथिवीमनु॥ ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ येदो रोचने दिवो ये वा सूर्यस्य र
श्मिषु॥ येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः॥ या इषवो यातुधानानां ये वा वनस्पती रनु॥ ये वावटेषु शेरे
तेतेभ्यः सर्पेभ्यो नमः॥ ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया॥ पूर्वजन्मनि यास्सर्पतत्सर्वं क्षंतुमर्हसी
ति। ततः स्नात्वा मिश्रिताभ्यां क्षीराज्याभ्यां ॐ भूः ॐ भुवः ॐ स्वरिति तमग्निं प्रोक्ष्य कुतसर्पजलेन
ग्निं निर्वाप्य स्नात्वाचम्य गृहमेत्य ब्रह्मचर्यादि नियमपूर्वकं त्रिरात्रमाशौचं कुर्यात्। कर्तुं॰। आरोग्ये चपि

Indira Gandhi National Centre for the Arts

प्रा०मु०ली० उदः कुर्यान्नतु तद्बंधुगोत्रजा इति वचनात्। ततश्चतुर्थे ह्नि सचैलं स्नात्वा शेषं द्विजानामं त्र्यक्रमेण सर्पा २२
४२ नंतरूपथात्रोषः कपिलो नाग एव च। कालियः शंखपालश्च भूधरश्चेति नामभिः। पादप्रक्षालनपूर्वकं गं
धमाल्यधूपदीपवस्त्रयज्ञोपवीतैरभ्यर्चयेत्॥ तद्यथा। सर्पस्वरूपिणे ब्राह्मणाय दत्तं पाद्यं। अनंत
स्वरूपिणे० शेषःस्वरूपिणे० कपिलस्वरूपिणे० नागस्वरूपिणे० कालियस्वरूपिणे०। शंखपालस्व
रूपिणे० भूधरस्वरूपिणे० इति पादौ प्रक्षाल्याचम्य भूर्भुवः स्वः इदमासनमास्यतामित्यासनानि द
त्त्वा। सर्पस्थाने क्षणः क्रियतामेवं सर्वत्र। शेषादिष्वपि भोः सर्प इदं तव रूपं एष ते गंधः एवं पुष्पधूपदीपाच्छ
त्वा। सर्पस्थाने क्षणः क्रियतामेवं सर्वत्र। शेषादिष्वपि भोः सर्प इदं तव रूपं एष ते गंधः एवं पुष्प धूप दीपाच्छा
दानयज्ञोपवीतदानं। एवं सर्वत्र ज्ञेयं। ततः परिवेषणोत्तरं सर्पायेदमन्नं परिविष्टं [redacted] परिवेषमा
णं चात्र तैः स्वाहा संपद्यतां न मम। एवं शेषादिभ्योप्यन्नदानं कृत्वा ब्राह्मणान्त्रभूतसर्पिःपायसभक्ष्यैः
संभोज्य तांबूलदक्षिणादिभिस्तोष्य क्षमाप्य ब्राह्मणान्विसर्ज्य सर्पादिनाममंत्रैरन्नबलिं दत्त्वाऽऽचार्य
संपूज्य तस्मै सुवर्णनागदानं कार्यं। इति सर्पस्य संस्कारं कृत्वा नागबलिं ततः। दत्त्वा स्वर्णमयं नागमपरा
धात्प्रमुच्यत इति वचनात्। स्वर्णनिर्मितं नागमायगोरितिमंत्रेण ताम्रकलशे षोडशोपचारैः संपूज्य ४२
प्रार्थयेत्। ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः॥ नमोस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु सर्वदा। एवं संप्र

त्वा तु नागेंद्रमाचार्याय निवेदयेत्। देशादि निर्दिश्य कृतस्य सर्पसंस्कारकर्मणः सांगता सिध्यर्थमिमं
स्वर्णनागं सकलशं सवस्त्रं सदक्षिणमाचार्याय तुभ्यमहं संप्रददे न मम आचार्यो देवस्य त्वेति मंत्रं प
ठन्प्रतिगृह्णामीति वदेत्। तत आचार्याय ततो दद्यात् कृष्णां गां वृषभं प्रणाहि। वस्त्रालं[redacted]करणैः पूज्य
ब्राह्मणं ब्राह्मणीं तथेति वचनाद्वृषवत्सां कृष्णां गां तदभावेन्यां वा तदभावे गोमूल्यं वा तस्मै दत्त्वा सांगता सि
ध्यर्थं ब्राह्मणान्भोजयित्वा कर्मणः सांगतां वाचयित्वा रुक्षद्युक्तैः पाकांतरेण भुंजीतेति॥ ॥ भारद्वाज
दिवाकरविरचितो नागबलिः प्रयोगः प्रासंगिकः॥ ॥ वृकादिवधे पराशरः। वृकजंबूकऋक्षाणां तरक्षु
श्वानघातकः। तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयमिति। गजवधेप्याह स एव। गजस्य च तुरंगस्य म
हिषोष्ट्रनिपातने। प्रायश्चित्तमहोरात्रं त्रिसंध्यमवगाहनमिति। दानान्याह मनुः। वासो दद्याद्धयं हत्वा
न्२। पंच नीलान्वृषान्गजे। अजमेषावनड्वाहं खरं हत्वैकहायनमिति। खरहनने एकहायनमनड्वाहमित्य
र्थः। नीलवृषलक्षणं तु लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्य
ते इति। संवर्तः। हस्तिनं तुरगं हत्वा महिषोष्ट्रकपिं तथा। एषु सर्वेषु कुर्वीत सप्तरात्रमभोजनमिति। स एव। व्या
घ्रं श्वानं खरं सिंहं मृगं शूकरमेव च। एतान्हत्वा द्विजः कुर्याद्ब्राह्मणानां तु भोजनं। जाबालिः। सिंहव्याघ्र
मृगाणां च मृगखड्गरुरुद्विपान्। हत्वा सांतपनं कुर्यात् ओमूकन्यान्तेषु च। गवादिविषयाण्यन्यत्तानि

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० गोभूकन्यान्तानि। अहं तुभ्यं गां दास्य इति प्रतिज्ञायादानं इत्यर्थः। पराशरः। क्रौंचसारसहंसांश्च
४३ चक्रवाकं च कुक्कुटं। जालपादं च शरभमहोरात्रेण शुध्यति। संवर्त्तः। हंसं बकं बलाकां च चश्चाविधं
बर्हिणं तथा। सारसं चाषभासं च हत्वा त्रीन्दिवसान्क्षिपेदिति। पराशरः। वृककाकपोतानां शारी क३
तित्तिरघातकः। अंतर्जले उभे संध्ये प्राणायामेन शुध्यति। गृध्रश्येनशशादीनामुलूकस्य च घा
तकः। अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशनः। करंडवचकोराणां पिंगलाकुररस्य च। भारद्वाजा
दिकं हत्वा शिवं पूज्य विशुध्यति। भरुंड चाषभासांश्च पारावतकपिंजलौ। पक्षिणां चैव सर्वेषामहो
रात्रमभोजनमिति। पक्षिणामनुपात्तानां। उक्तप्रायश्चित्तेषु गौरवलाघवं समर्थासमर्थाभ्यामापद
नापदादिविषयत्वेन व्यवस्थापनीयं। आत्मघातप्रायश्चित्तनिगमे। आत्मघातकशुध्यर्थं चरेच्चांद्रायण
द्वयं। तप्तकृच्छ्रं चतुष्कं च त्रिंशन्निष्काणि वा चरेत्। अत्र तप्तकृच्छ्रचतुष्कसमुच्चितं चांद्रायणद्वयरूपं प्राय
म४ श्चित्तं समर्थस्य तु त्रिंशन्निष्काणि बोध्यं। एतत्प्रायश्चित्तं पुत्रादिरेव तदुद्देशेन कुर्यात्। आत्महंतुः स
र्वथा तत्करणासंभवात्। मरणमध्यवस्य विनिवृत्ते तु वसिष्ठः। आत्महननाध्यवसाये जीवन्नात्म
त्यागी कृच्छ्रं द्वादशरात्रं चरेत्त्रिरात्रं चोपवसेदिति। च्यवनः। आत्मघातकस्य पूर्णनिवहनदहने तप्तकृच्छ्रं ४३
चरेद्विंशति गावो दक्षिणा ब्राह्मणेषु इति। वसिष्ठः। य आत्मघातिनः कुर्यात्स्नेहात्प्रेतक्रियान्नरः॥

स तप्तकृच्छ्रसहितं चरेच्चांद्रायणव्रतमिति। क्वचिदात्मघातदोषो नास्तीत्युक्तमादित्यपुराणे। अ
साध्यव्याधिना युक्तः स्वव्यापाराक्षमः पुमान्। प्रविशत्यनलं दीप्तं करोत्यनशनं तु वा। अगाधतोय
राशिं वा भृगोः पतनमेव वा। गच्छेन्महापथं वापि तुषारगिरिमादरात्। प्रयागवटशाखाग्राद्देहत्या
गं करोति वा। स्वयं देहविनाशश्च प्राप्ते काले महामतिः। उत्तमानाप्नुयाल्लोकान्नात्मघाती भवेत्क्व
चित्। एतेषामधिकारस्तु सर्वेषां सर्वजंतुषु। नराणामथ नारीणां सर्ववर्णेषु सर्वदेति। अत्रासाध्य
व्याधिं विनाग्निप्रवेशादावात्मघातित्वं भवतीति तात्पर्यं। स्वव्यापाराक्षम इत्यनेन वृद्धत्वं लक्ष्य
ते। तथा च मनुः। वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्य
नशनांबुभिरिति। एतच्च कलिव्यतिरिक्तयुगविषयं। भृग्वग्निपतनैश्चैव वृद्धस्य मरणं तथेत्यादि
ना कलौ तन्निषेधात्। अनशनव्रतं भवत्येव। निषेधाभावात्। प्रयागे तु काम्यमरणस्य विहितत्वा
दनातुरस्याप्यग्निप्रवेशादौ दोषाभावः। तदुक्तमस्मान्मातुः प्रपितामहभट्टश्रीनारायणभट्टरचिते ण३
प्रयागसेतौ स्कांदे। यथाकथंचित्तीर्थेस्मिन्प्राणत्यागं करोति यः। तस्यात्मघातदोषो न प्राप्नुया
दीप्सितानपि। मात्स्येपि। शृणु राजन्प्रयागे तु अनाशकफलं महत्। प्राप्नोति पुरुषो धीमान्श्रद्दधा

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० उदः कुर्यान्नतु तद्बंधुगोत्रजा इति वचनात्। ततश्चतुर्थे ह्नि सचैलं स्नात्वा शोद्धिजानाम त्र्यक्रमेण सर्पा
४२ नंतस्तथा शेषः कपिलो नाग एव च। कालियः शंखपालश्च भूधरश्चेति नामभिः। पादप्रक्षालनपूर्वकं गं ४२
धमाल्यधूपदीपवस्त्रयज्ञोपवीतैरभ्यर्चयेत्॥ तद्यथा। सर्पस्वरूपिणे ब्राह्मणायेदं ते पाद्यं। अनंत
स्वरूपिणे० शेषः स्वरूपिणे० कपिलस्वरूपिणे० नागस्वरूपिणे० कालियस्वरूपिणे०। शंखपालस्व
रूपिणे० भूधरस्वरूपिणे० इति पादौ प्रक्षाल्याचम्य भूर्भुवः स्वः इदमासनमास्यतामित्यासनानि द
त्त्वा। सर्पस्थाने क्षणः क्रियतामेवं सर्वत्र। शेषादिष्वपि भोः सर्पस्वरूप एष ते गंधः एवं पुष्पधूपदीपाच्छा
दानयज्ञोपवीतदानं। एवं सर्वत्र ज्ञेयं। ततः परिवेषणोत्तरं सर्पायेदमन्नं परिविष्टं [redacted] परिवेक्ष्यमा
णं चातत्सेः स्वाहा संपद्यतां न मम। एवं शेषादिभ्योप्यन्नदानं कृत्वा ब्राह्मणान्त्रभृतसर्पिः पायसभक्ष्यैः
संभोज्य तांबूलदक्षिणादिभिस्तोष्य क्षमाप्य ब्राह्मणान्विसर्ज्य सर्पादिनाममंत्रैरन्नबलिं दत्त्वाऽऽचार्यं
संपूज्य तस्मै सुवर्णनागदानं कार्यं। इति सर्पस्य संस्कारं कृत्वा नागबलिं ततः। दत्वा स्वर्णमयं नागमपरा
धात्प्रमुच्यत इति वचनात्। स्वर्णनिर्मितं नागमायगोरिति मंत्रेण ताम्रकलशे षोडशोपचारैः संपूज्य ४२
प्रार्थयेत्। ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः॥ नमोस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु सर्वदा। एवं स्तु

त्वा तु नागेंद्रमाचार्याय निवेदयेत्। देशादि निर्दिश्य कृतस्य सर्पसंस्कारकर्मणः सांगतासिध्यर्थमिमं
स्वर्णनागं सकलशं सवस्त्रं सदक्षिणमाचार्याय तुभ्यमहं संप्रददे न मम आचार्यो देवस्य त्वेति मंत्रं प
ठन्प्रतिगृह्णामीति वदेत्। तत आचार्याय ततो दद्यात्सवत्सां गां वृषभेण हि। वस्त्रालं[redacted]करणैः पूज्य
ब्राह्मणं ब्राह्मणीं तथेति वचनाद्वृषवत्सां सवत्सां गां तदभावे न्यायात्तदभावे गोमूल्यवा तस्मै दत्वा सांगतासि
ध्यर्थं ब्राह्मणान्भोजयित्वा कर्मणः सांगतां वाचयित्वा स्वयं हुतशेषः पाकांतरेण भुंजीतेति॥ ॥ भारद्वाज
दिवाकरविरचितो नागबलिः प्रयोगः प्रासंगिकः॥ ॥ वृकादिवधे पराशरः। वृकजंबूकऋक्षाणां तरक्षु
श्वानघातकः। तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयमिति। गजवधेप्याह स एव। गजस्य च तुरंगस्य म
हिषोष्ट्रनिपातने। प्रायश्चित्तमहोरात्रं त्रिसंध्यमवगाहत इति। दानान्याह मनुः। वासो दद्याद्धयं हत्वा
२। पंचनीलान्वृषान्गजे। अजमेषामनड्वाहं खरं हत्वैकहायनमिति। खरहनने एकहायनमनड्वाहमित्य
र्थः। नीलवृषलक्षणं तु लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्य
त इति। संवर्त्तः। हस्तिनं तुरगं हत्वा महिषोष्ट्रकपिं तथा। एषु सर्वेषु कुर्वीत सप्तरात्रमभोजनमिति। स एव। व्या
घ्रं श्वानं खरं सिंहं मृगं शूकरमेव च। एतान्हत्वा द्विजः कुर्याद्ब्राह्मणानां तु भोजनं। जाबालिः। सिंहव्याघ्र
मृगाणां च मृगखड्गरुरुद्विपान्। हत्वा सांतपनं कुर्यात् शोभकन्यान्तेषु च। गवादिविषयाण्यनंतानि

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० गोभक्ष्यान्नतानि। अहं तुभ्यं गां दास्य इति प्रतिज्ञायादानदुत्यर्थः। पराशरः। क्रौंचसारसहंसांश्च
चक्रवाकं च कुक्कुटं। जालपादं शरभं चाहोरात्रेण शुध्यति। संवर्तः। हंसं बकं बलाकां चश्वाविधं
४३ बर्हिणं तथा। सारसं चाषभासं च हत्वा त्रीन्दिवसान्क्षिपेदिति। पराशरः। वृककाकपोतानां शारी क३
तित्तिरघातकः। अंतर्जले उभे संध्ये प्राणायामेन शुध्यति। गृध्रश्येनशशादीनामुलूकस्य च घा
तकः। अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशनः। करंडवचकोराणां पिंगलाकुररस्य च। भारद्वाजा
दिकं हत्वा शिवं पूज्य विशुध्यति। भरुंड चाषभासांश्च पारावतकपिंजलौ। पक्षिणां चैव सर्वेषामहो
रात्रमभोजनमिति। पक्षिणामनुपात्तानां। उक्तप्रायश्चित्तेषु गौरवलाघवं समर्थासमर्थाभ्यामापद
नापदादिविषयत्वेन व्यवस्थापनीयं। आत्मघातप्रायश्चित्तनिगमे। आत्मघातकः शुध्यर्थं चरेच्चांद्रायण
द्वयं। तप्तकृच्छ्रं चतुष्कं च त्रिंशन्निष्काणि वाचरेत्। अत्र तप्तकृच्छ्रचतुष्कसमुच्चितं चांद्रायणद्वयरूपं प्राय
म ४ श्चित्तं समर्थस्य तु त्रिंशन्निष्काणि बोध्यं। एतत्प्रायश्चित्तं पुत्रादिरेव तदुद्देशेन कुर्यात्। आत्महंतुः स
र्वथा तत्करणासंभवात्। मरणाध्यवसायविनिवृत्ते तु वसिष्ठः। आत्महननाध्यवसाये जीवन्नात्म
त्यागी कृच्छ्रं द्वादशरात्रं चरेत्त्रिरात्रं चोपवसेदिति। च्यवनः। आत्मघातकस्य पुनर्निवर्तने तप्तकृच्छ्रं ४३
चरेद्विंशतिगावो दक्षिणा ब्राह्मणेभ्य इति। वसिष्ठः। य आत्मघातिनः कुर्यात्स्नेहात्प्रेतक्रियां नरः।

स तप्तकृच्छ्रसहितं चरेच्चांद्रायणव्रतमिति। क्वचिदात्मघातदोषो नास्तीत्युक्तमादित्यपुराणे। अ
साध्यव्याधिनायुक्तः स्वव्यापाराक्षमः पुमान्। प्रविशत्यनलं दीप्तं करोत्यनशनं तु वा। अगाधतोय
राशिं वा भृगोः पतनमेव वा। गच्छेन्महापथं वापि तुषारगिरिमादरात्। प्रयागवटशाखाग्राद्देहत्या
गं करोति वा। स्वयं देहविनाशस्य प्राप्ते काले महामतिः। उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्व
चित्। एतेषामधिकारस्तु सर्वेषां सर्वजंतुषु। नराणामथ नारीणां सर्ववर्णेषु सर्वदेति। अत्रासाध्य
व्याधिं विनाग्निप्रवेशादावात्मघातित्वं भवतीति तात्पर्यं। स्वव्यापाराक्षम इत्यनेन वृद्धत्वं लक्ष्य
ते। तथा च मनुः। वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्य
नशनांबुभिरिति। एतच्च कलिव्यतिरिक्तयुगविषयं। भृग्वग्निपतनैश्चैव वृद्धस्य मरणं तथेत्यादि
ना कलौ तन्निषेधात्। अनशनव्रतं भवत्येव। निषेधाभावात्। प्रयागे तु काम्यमरणस्य विहितत्वा
दनातुरस्याप्यग्निप्रवेशादौ दोषाभावः। तदुक्तमस्मत्पितुः प्रपितामहभट्टश्रीनारायणभट्टरचिते ण३
प्रयागसेतौ स्कांदे। यथाकथंचित्तीर्थेऽस्मिन्प्राणत्यागं करोति यः। तस्यात्मघातदोषो न प्राप्नुया
दीप्सितानपि। मात्स्येऽपि। शृणु राजन्प्रयागे तु अनाशकफलं महत्। प्राप्नोति पुरुषो धीमान्श्रद्दधा

Indira Gandhi National Centre for the Arts

प्रा०मु०ली० नोजितेंद्रियः। अहीनांगोप्यरोगश्च पंचेंद्रियसमन्वितः। अश्वमेधफलं तस्य गच्छतस्तु पदे पदे इति।
अत्र प्रत्याख्यातभिषक्क्रियाव्याधिवेदनामसहमानस्सर्वप्रायश्चित्तं कृत्वा स्वीयश्राद्धादिकार्य
४८ भावे जीवश्राद्धं पिंडदानांतं विधाय पूर्वदिनकृतोपवासः पुण्ये ह्नि महाव्याधिजन्यदुःखपूरव्यथा
मसहमानः शौचाचारलोपभयेन पीडितश्चाहं ब्राह्मणसमक्षमनशनव्रतं करिष्य इति संकल्प्य
ब्राह्मणान्संपूज्यामरणं विष्णुं ध्यायन्नुपवसेदिति। एवं सर्वत्राग्निप्रवेशादिग्रहणीयं॥ ॥ऊर्ध्वोच्छि ग्रा५
ष्टादिमरणे आशौचकर्मणोच पराशरः॥ ऊर्ध्वोच्छिष्टेऽधोच्छिष्टे [redacted] अंतरिक्षम्
तिर्यदि। कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणे रता ली ति। तथा। ऊर्ध्वोच्छिष्टेऽधोच्छिष्टोभयोच्छिष्टे तथैव च।
अस्पृश्यस्पर्शमरणे खङ्गादौ मरणे पि वा। श्वानकव्यादसंस्पर्शे कृमिकीटोद्भवे पि च। एतद्दोषानुसारे
णप्रायश्चित्तं समाचरेत्। कृच्छ्राश्चिषट्पंचदशान्चांद्रायणमथापि चेति। अत्र दोषतारतम्येन प्रायश्चि
त्ततारतम्यं बोध्यं। रजस्वलासूतिकामरणे स्मृत्यंतरे। अंतरिक्षेमृतायेचवन्हावप्सु प्रमादतः। उदकीसू ४८
तकीनारीचरेच्चांद्रायणत्रयमिति। उदकीसूतकीनारीमरणे इति शेषः। भविष्यपुराणे। चंडालगोब्राह्म
णाग्निपश्वादंष्ट्रिसरीसृपैः। प्रमादान्मरणे चांद्रं तप्तकृच्छ्रमथापि वेति॥ ॥अथ चितिभ्रंशप्रायश्चित्तं॥

आपस्तंबः। चितिभ्रष्टा तु या नारी मोहात्प्रचलिता ततः। प्राजापत्येन शुध्येत तस्माद्वै पापकर्मणः।
अस्यार्थः। तत्र सहगमने संकल्पोत्तरं सहगमनकर्मणः प्रचलिता पराङ्मुखाऽग्निभयादिना नारी
चितिभ्रष्टेत्युच्यते। तस्याः शुध्यर्थं प्राजापत्यं प्रायश्चित्तं कारणीयमिति। देवयाज्ञिकनिबंधे गृह्य
कारिकायामपि। मोहात्प्रचलिता नारी चितिभ्रष्टा कथंचन। प्राजापत्यं चरेत्सा हि व्यवहार्या भवेद
तद्भूति। अथान्यास्थिनयनप्रायश्चित्तं ब्राह्मे। मातुः कुलं पितृकुलं वर्जयित्वा नराधमः। अस्थीन्य
न्यकुलोत्थस्य नीत्वा चांद्रायणं चरेदिति॥ ॥अथ यज्ञादिनिमित्तं विना द्रुमच्छेदनमनुराह। फलदानां
तु वृक्षाणां छेदने जप्यमृक्शतं। गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां। कृष्टजानामोषधीनां जा
तानां च स्वयं वने। वृथारंभेनुगच्छेद्गां दिनमेकं पयोव्रत इति। यत्तु हारीतः। स्थावरं शरीरन्तु पादीनां व
धे यस्तु देशाणां निमिषद्धृहे जैति यस्य जातं जनेमानं चूके वलं। सोम्युश्विनां स्थितो जाह्नवी मिसनो मुंच
ज्यं ३ त्वं हस्वाहा। इत्येतयोंकृत्वा तिलपात्रं ब्राह्मणाय दद्यादिति तदश्वत्थादिपुण्यस्थावरविषयमिति
माधवः। यदि कृषिकर्त्ता भूसमीकरणार्थं हन्यते तदा न दोष इत्याह शंखः। फलपुष्पोपगान्पादपा
न्नहिंस्यात्कर्षणकार्यार्थमुपहन्यादिति॥ ॥अथ व्रतलोपे॥ मनुः। अवकीर्णी तु काणेन गर्दभेन चतु

Indira Gandhi National Centre for the Arts

प्रा०मु०टी० ष्पथे। स्थालीपाकविधानेन यजेत निर्ऋतिं निशि। कृत्वाग्नौ विधिवद्धोमं ततश्च समित्यृचा वातेंद्र
४५ द्गुरुवह्नीनां जुहुयात्सर्पिषाहुती। एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनं। सप्तागारं चरेद्भैक्षं स्वकर्म
र्म परिकीर्तयन्। तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकं। उपस्पृशं स्त्रिषवणमब्देन स विशुध्यती
ति। अवकीर्णलक्षणमाह आपस्तंबः। रेतः स्कंदितं प्रतिनारेतो येन स्याद्ब्रह्मचारिणा। कामतोकामतः
प्राकृतस्त्ववकीर्णीति तं बुधा इति। ओगीश्वरोपि। अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितं। गर्दभं पशुमा
लभ्यनैर्ऋतं स विशुध्यतीति। निर्ऋतिदेवत्येन गर्दभपशुना यागं निर्वर्त्य विशुध्यतीत्यर्थः। स्था
लीपाकविधानमत्राथ पशुकल्प इत्याश्वलायनोक्तं द्रष्टव्यं। पशोरभावे चरुरिति विज्ञानेश्वरः।
श्रोत्रियस्य पशुरश्रोत्रियस्य चरुरिति माधवः। अत्रश्रीमातामहगुरुचरणाः। आहुतीरिति बहुवच
नात्कपिंजलन्यायेन तिस्र एवाहुतयो बोध्या इति प्राहुः। अत्रापरार्के। गर्दभयागाहुतिभ्यः पूर्वं वाता
यस्वाहेत्यादि चतुर्भिर्मंत्रैराज्यहोमः प्रधानहोमांते समासिंचंत्वित्यृचा होम इत्येषक्रम इति। ऋक्तु। संमा
सिंचंतु मरुतः समिंद्रः संबृहस्पतिः। संमायमग्निः सिंचतु यशसा ब्रह्मवर्चसेनेति निर्दिष्टं प्रायश्चित्तं तद्श
क्तिमतो बोध्यं। अशक्तस्य वासिष्ठोक्तं नैर्ऋतं वा चरुं निर्वपेत्। तत्र तस्य जुहुयात् कामाय स्वाहा निर्ऋत्यै स्वा ४५
हा रक्षोदेवताभ्यः स्वाहेति। यत्तु गौतमीयं। गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत्। तस्याजिन
मूर्ध्ववालं परिधाय लोहपात्रः सप्तगृहान्भैक्षं चरेत्कर्माचक्षाणः संवत्सरेण शुध्येदिति तन्मान
वेन समानविषयं। श्रोत्रियविप्रपत्न्यामवकिरणे धिक्ज्ञेयं। गुप्तायां वैश्यायामवकीर्णः षड्रात्रं संव
त्सरं त्रिषवणमनुतिष्ठेत्क्षत्रियायां द्विवर्षं ब्राह्मण्यां त्रीणि वर्षाणीति शंखोक्तेः। व्यभिचारिण्यां तु हा
रीतः। स्वैरिण्यां ब्राह्मण्यामवकीर्णः षड्रात्रमुपोषितो गां दद्यात्। क्षत्रियायामुपोषितस्त्रिरात्रं
वैश्यायां चतुर्थकालाहारो ब्राह्मणान्भोजयित्वा यवसभारं च गोभ्यो दद्यात्। वृषल्यामवकीर्णः।
सचेलं स्नात उदकुंभं ब्राह्मणाय दद्यात्। गोष्ववकीर्णः प्राजापत्यं चरेत्। षंढायामवकीर्णः पलालभारं सीसमाषं च दद्यादिति। अत्र च राजन्यादीनां ब्राह्मणार्द्धमिति न्यायो नावतरति। अवकीर्णद्वि
जो राजा वैश्यश्चापि खरेण तु। इष्ट्वा भैक्ष्याशिनो नित्यं शुध्यंत्यब्दात्समाहिता इति शांडिल्येन त्र
याणामपि तुल्यप्रायश्चित्ताभिधानात्। यदा संभोगमंतरेण कामतो धातुं विसृजति दिवास्वप्ने
वोत्सृजति तदा नैर्ऋतयागमात्रं द्रष्टव्यं। एतदपरेतसः प्रयत्नोत्सर्गे दिवास्वप्ने वेति वसिष्ठेन यागमा
त्रस्य निर्दिष्टत्वात्। स्वप्नोत्सर्गे मनुराह। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्च

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ यित्वात्रिः पुनर्मामीत्यृचं जपेत्। यतिवनस्थयोस्तु विकं व्रतमाह शांडि ल्यः। वानप्रस्थो यतिश्चैव स्वं
४६ डनेसति कामतः। पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेदिति। अकामतस्त्वाह कश्यपः। स्कन्नस्य त्रिर्नम
स्कारं स्वप्ने सिक्त्वा गृहीचरेत्। वानप्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणमिति॥ प्रसंगाद्यतेः पुनर्गा
र्हस्थ्यस्वीकारे प्रायश्चित्तमभिधीयते। संवर्त्तः। सन्यस्य दुर्मतिः कश्चित्प्रत्यापत्तिं व्रजेद्यदि। सकुर्या
त्कृच्छ्रमश्रांतः षण्मासान्प्रत्यनंतरमिति। प्रत्यापत्तिर्गार्हस्थ्यपरिग्रहः। वृद्धपराशरोपि। यः प्रत्य
वसितो विप्रः प्रव्रज्यातो विनिर्गतः। अनाशकनिवृत्तिश्च गार्हस्थ्यं च चिकीर्षति। चरेत्त्रीणि च
कृच्छ्राणि त्रीणि चांद्रायणानि च। जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयादिति। अत्र शक्त्या
द्यपेक्षया व्यवस्था। शातातपमाधवाभ्यां ब्राह्मणस्य षाण्मासिककृच्छ्रः क्षत्रियस्य चांद्रा
य ४ यणत्रयं वैश्यस्य कृच्छ्रत्रमित्याद्या व्यवस्थोक्ता सा भ्रममूलिकैव। पराशरवचनगतविप्रग्रहस्य
क्षत्रियादिवाचित्वाभावात्। चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः। क्षत्रियस्य त्रयः प्रो
क्ता द्वावेको वैश्यशूद्रयोरिति योगयाज्ञवल्क्यवचनात्क्षात्रियस्य सन्यासे नधिकाराच्च। अनाश ४६
कनिवृत्तअनशनव्रतात्परावृत्तः। कृते पि प्रायश्चित्ते सोऽव्यवहार्य इत्याह वृद्धपराशरः। अनाशक

निवृत्तस्तु चातुर्वर्ण्यव्यवस्थितः। चंडालः स तु विज्ञेयो वर्जनीयः प्रयत्नत इति। यतीनां धर्मलोपे छा
गलेयः। व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च। एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते। अ
होरात्रोषितो भूत्वा कृच्छ्रं चांद्रायणं चरेत्। व्रतान्युपव्रतानि चाह बोधायनः। अथ व्रतान्यहिंसास
त्यमस्तेयं मैथुनस्पर्शवर्जनं। अथोपव्रतान्यक्रोधो गुरुशुश्रूषा प्रमादः शौचमाहारशुद्धिरिति।
सत्यपि प्रायश्चित्ते लुप्तधर्माः परिव्राजका गर्हिता एवेत्याह वृद्धपराशरः। लुप्तधर्मास्तु चांडालाः
परिव्राजकतापसाः। तेभ्यो जातान्यपत्यानि चंडालैः सह वासयेदिति। व्रतांतरलोपेप्यवकीर्णिव्र
तमतिदिशति मनुः। अकृत्वा भैक्षचरणमसमिध्य च पावकं। अनातुरः सप्तरात्रमवकीर्णिव्रतं
चरेदिति। अनातुर इत्युक्त्याऽऽतुरस्य स्वल्पं। यत्तु याज्ञवल्कीयं भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्र
मनातुरः। कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयं। उपस्थानं ततः कुर्यात्समासिंचत्वनेन त्वि
ति। तद्गुरुशुश्रूषादिकार्येण प्रतिबंधे बोध्यमिति माधवः॥ ॥ यज्ञोपवीतनाशे हारीतः। मनो
व्रतपतिभिश्चतस्र आज्याहुतीर्हुत्वा पुनर्यथार्थं प्रतिपादिति। मनोलिंगा। भिस्त्वमग्ने व्रतपा अ द्येर
सीत्यादिव्रतलिंगाभिरित्यर्थः। यथार्थं समंत्रमित्यर्थः। मंडनः। यज्ञोपवीतस्याभावे वस्त्रोपमा
गर

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० न्नमाचरेत्। तदभावेतुसूत्रेणात्रिवृतोपस्थेतसः। यज्ञोपवीतमंतरेणभोजनादौ। क्रियमाणे
४७ मरीचिः। ब्रह्मसूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेथवा। गायत्र्याष्टसहस्रेणप्राणायामेनशुध्यति।
महानाम्न्यादिव्रतलोपेप्रायश्चित्तमाहशौनकः। व्रतानिविधिवत्कृत्वास्वशाखाध्ययनंच
रेत्। अकृत्वाध्यस्यतेयेनसपापीविधिघातकः। प्रत्येकंकृच्छ्रमेकैकंचरित्वाकुर्तीशतं। कृ ज्या ४
त्वाचैवतुगायत्र्यास्नायादित्याहशौनकइति। ब्रह्मचारिव्रतलोपप्रायश्चित्तप्रयोगस्तुअस्मन्मा
तुःप्रपितामहभट्टश्रीनारायणपदपाथोजविरचितप्रयोगरत्नेद्रष्टव्यइत्येषादिक्॥ ॥अथपरि
वेदने॥ तत्रादौपरिवेत्तृपरिवित्तिस्वरूपमाहमनुः। दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते। परि
वेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजइति। अग्रजःसोदरएवनतुसपत्नभ्रात्रादिः। तदाहतुर्ग
र्ग्यशातातपौ। सोदर्येतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहं। आवसथ्यंतथाधानंपतितस्त्वन्यथा
भवेत्। पतितइतिविलक्षणदोषभागित्वस्यसूचकन्नतुपातित्यस्य। पितृव्यपुत्रसापत्नपरनारी ४७
सुतेषुच। ज्येष्ठेष्वपिचतिष्ठत्सुभ्रातॄणांतुकनीयसां। दाराग्निहोत्रसंयोगेनदोषःपरिवेदनइति।
परनारीसुतादत्तकादयः। दत्तकस्यपरिगृहीतकुलएवपितृव्यपुत्रादिधर्माम्नानाद्दत्तकसोद

रस्यकनिष्ठस्यदत्तकमुत्क्रम्यविवाहेनदोषः। द्व्यामुष्यायणेदत्तकेऽस्त्येव। क्वचित्प्रतिप्रसवमाह
शातातपः। क्लीबेदेशांतरस्थेचपतितेभिक्षुकेपिवा। योगशास्त्राभियुक्तेचनदोषःपरिवेदने। अ
त्रज्येष्ठइतिविशेष्यमध्याहार्यं। भिक्षुकोयतिः। योगशास्त्राभियुक्तोब्रह्मनिष्ठः। कात्यायनोपि। देशांत
न ४ रस्थक्लीबैकवृषणानसहोदरान्। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः। जडमूकांधबधिरकुब्जवा
मनषोडकान्। अतिवृद्धानभार्यांश्चकृषिसक्तान्नृपस्यच। धनवृद्धिप्रसक्तांश्चकामतोकारिणस्तथा। कु
हकांस्तस्करांश्चापिपरिविंदन्नदुष्यतीति। षोडशःकोभग्नचरणद्वंद्वः। अभार्योमृतदारः। कामतोऽकारि
२७ णःस्वेच्छयैवविवाहमकुर्वाणाः। देशांतरगतंप्रतिविशेषमाहवसिष्ठः। अष्टौद्वादशवर्षाणिज्येष्ठंभ्रातरंअनि
विष्टमप्रतीक्षमाणःप्रायश्चित्तीभवतीति। सएव। द्वादशैवतुवर्षाणिज्यायान्धर्मार्थयोगतः। न्याय्यःप्र
तीक्षितुंभ्राताश्रूयमाणःपुनःपुनरिति। दोषरहितेषुसमानोदरेषुविशेषमाहपराशरः। ज्येष्ठोभ्राता
यदातिष्ठेदाधानंनैवकारयेत्। अनुज्ञातस्तुकुर्वीतशंखस्यवचनंयथा। एवंपित्राद्यनुज्ञातस्यपुत्रस्य
कदाचिदाधानप्रसक्तौचतुर्विंशतिमते। ज्येष्ठभ्रात्रात्वनुज्ञातःकुर्यादग्निपरिग्रहं। अनुज्ञातोपिपि
त्रातुनादध्यान्मनुरब्रवीत्। प्रायश्चित्तमाहवसिष्ठः। परिवित्तिःकृच्छ्रंद्वादशरात्रंचरित्वानिविशेत
२१ मंडनः। पितर्यनाहिताग्नावप्यादधीताथवासुतः। अग्निहोत्रंचजुहुयादितिलौगाक्षिकारिका। २

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० तांचोपयच्छेत।अयमर्थः।अग्रजोद्वादशरात्रं कृच्छ्रं कृत्वा विवाहाधिकारी सन् कनीयसा दत्तां पूर्वंप्र
णीतां स्वीकृत्य तस्मै दद्यादिति। परिवेत्तृप्रायश्चित्तमाह स एव।परिविदानः कृच्छ्रातिकृच्छ्रौ चरि चि२
४८ त्वा तस्मै दत्त्वा पुनर्निविशेत।अस्यायमर्थः।कनिष्ठो व्युत्क्रमेण विवाहमाचरन् परिविविदानो भिधी
यते स कृच्छ्रातिकृच्छ्रौ तस्मै ज्येष्ठाय ऊढां परिचर्यां हृतं भेक्षवमनुरूपरिभवपरिहाराय निवेद्य तेना
नुज्ञातां तामेवोद्वहेदिति।एतच्च प्रायश्चित्तं देशांतरगते ज्येष्ठे प्रायशो सो विवोढा भविष्यतीति भ्रां हि५
त्या कृते परिवेदने बोध्यं।अल्पत्वात्।अग्रजेन निवार्यमाणो मतिपूर्वं परिवेदनं करोति तदाहहा
रीतः।ज्येष्ठे निर्विष्ठे कनीयान्निर्विशमानः परिवेत्ता परिवित्तो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता प
रिकर्त्ता याजकः सर्वे ते पतिताः संवत्सरं प्राजापत्येन कृच्छ्रेण पारयियुः समाप्ते व्रते तां कन्यां ज्येष्ठायोपपा
अनुपगछन् ४ दयेयुः स तामनुपयन्नन्यथा निविशमानुजानीयादेवं धर्मो न लुप्यत इति।यत्तु यास्यं कृच्छ्रद्वयोः परिवेद्यक
न्यायाः कृच्छ्र एव च।अतिकृच्छ्रं चरेद्दाता होता चांद्रायणं चरेदिति तत्स्वत्रविषयं।अपरार्के तु देकृच्छ्रे परिवि ४८
पि२ त्तेस्त्विति पाठः।य दंसौमंतं परिवित्ति परिवेत्तृ कन्यादातृयाजकानां द्वादशरात्रे सक्तु प्राशनं ब्राह्मण
तर्पणं च तां पुनर्भुवनमाचक्षते न भूयश्चैनामभिगच्छेदिति लघुद्रविषयमिति श्रीगुरुचरणाः।वसि

ष्ठः।अग्रे दिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा तस्मै दत्त्वा पुनर्निविशेतेति।तयोः स्वरूपमाह देव
लः।ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेनुजा।यासाग्रे दिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृतेति।प्राय
श्चित्तांतरमाह गौतमः।परिवित्ति परिवेत्तृ पर्याहित पर्याधात्रग्रे दिधिषू पदिधिषूपतीनां संवत्सरं प्रा
कृतं ब्रह्मचर्यमिति।पर्याहितपर्याधात्रोः स्वरूपमाह संवर्तः।असमाहिताग्नौ ज्येष्ठे तु कनीयानादधीत चे
त्।पर्याधाता कनिष्ठः स्याज्ज्येष्ठः पर्याहितः स्मृत इति।अथर्ववेदे विश्वासवतः।वसिष्ठः।नास्तिकः कृच्छ्रं
कः६ द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यान्नास्तिकवृत्तिरत्यतिकृच्छ्रमिति।अनभ्यासे चैतत्।अभ्यासे शं
खस्त्वाह।नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहार मिथ्याभिशंसीत्येते पंच संवत्सरं ब्राह्मणगृहे
भैक्षं चरेयुरिति।अथवा शंखोक्तं पातकनास्तिक्यविषयं।यथाहुः।नास्तिकास्त्रिविधाः प्रोक्ताः धर्मज्ञैस्त
त्त्वदर्शिभिः।क्रियादुष्टो मनोदुष्टो वाग्दुष्टश्च तथैव च।उपपातकस्तु मनोदुष्टो वाग्दुष्टः पातकः स्मृतः।अभ्या
सात्तु क्रियादुष्टो महापातक इष्यत इति॥ ॥अथ सुतादिविक्रये प्रायश्चित्तमाह शंखः॥देवगृहप्रतिश्रयो
द्यानारामसभाप्रपातडाकपुण्यसेतुसुतविक्रयं कृत्वा तप्तकृच्छ्रं चरेदिति।कन्याविक्रयेतु लघुपराशरः॥
विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेदिति।एतदापद्यकामतो विक्रय इति माधवः।अत्यंतापदीति स्मृ

प्रा० मु० ली० त्यर्थसारे। तदुभयन्नमन्यामहे। प्रमाणाभावात्। गुणवत्कृतविक्रये तु पैठीनसिः। आरामतडागोदपा
४९ नपुष्करिणीसुकृतसुकृतविक्रये त्रिषवणः स्नाय्यधःशायी ब्रह्मचारी चतुर्थकालाहारः संवत्सरेण पूतो
भवतीति। अनापदि तत्कानां समस्तानां विक्रये योगीश्वरोक्तमुपपातकसाधारणं चांद्रायणादिपंकप्रा
यश्चित्तं।। ।।अथानाश्रमे हारीतः। अनाश्रमी संवत्सरं प्राजापत्यं चरित्वाऽऽश्रममुपेयात्। द्वितीयेऽति
कृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रं अत ऊर्ध्वं चांद्रायणमिति।। ।।अथाग्नित्यागे।। तत्र नास्तिक्याप्रोताग्नित्या
गे कृच्छ्रं हारीतः। संवत्सरोच्छिन्नेऽग्निहोत्रे चांद्रायणं कृत्वा पुनराद्ध्यात्। द्विवर्षोच्छिन्ने चांद्रायणं सोमायनं च
त्रिवर्षोच्छिन्ने संवत्सरं कृच्छ्रमभ्यसेदिति। कामतस्तु मासपर्यंतमग्नित्यागे मनुराह। अग्निहोत्र्यपविध्या
ग्नीन्ब्राह्मणः कामकारतः। चांद्रायणं चरेन्मासं वीरहत्यासमं हि तत्। अग्निहोत्र्यपविध्याग्नीन्मासादू
र्ध्वं तु कामतः। कृच्छ्रं चांद्रायणं चैव कुर्यादेनाविचारयन्निति। अपविध्य मुक्त्वा वीरो यजमानः। मासमपवि
ध्येति योजना। अल्पकाले तु वसिष्ठः। योऽग्नीनपविध्येत्स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेदिति। ४९
यत्तु हारीतेनोक्तं। संवत्सरोत्सन्नेऽग्निहोत्रे चांद्रायणं कृत्वा पुनराद्ध्यात्। द्विवर्षोत्सन्ने सोमायनं चां
द्रायणं कुर्यात्। त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनराद्ध्यादिति तदकामतो ज्ञेयं। नास्तिक्या

कृत्याग्नित्यागे व्याघ्रः। मासद्वयं तु यो वह्निं त्यजेदेवं समाचरेत्। नास्तिक्यात्कृच्छ्रमेकं तु होमद्रव्यमशेषतः।
तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव चेति। जातूकर्णेनाप्युक्तं। अतीतकालं तु कुर्यादग्नौ विप्राय वा स्वयं।
दद्याद्द्रविणं सम्यक्कृत्वाधानं पुनर्द्विज इति। स एव। चतुष्टयं तु संपूर्णमासानां तु कृतावनं। त्यक्त्वाऽ
ग्निं कृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यत इति। उशनाः। षण्मासांस्त्यजते यो वै पराकं तु समाचरेत्। ऊर्ध्वं पयो
व्रतं कुर्यान्मासमेकं समाहितः। वर्षपर्यंतमेवाकृ मुनयः शंसितव्रता इति। अब्दोर्ध्वमाह शंखः। अग्न्युत्सादी
संवत्सरं प्राजापत्यं गोदानं च दद्यादिति। संवत्सरमतिक्रम्याग्न्युत्सादीत्यर्थः। स्मृत्यंतरेपि। यावंत्यब्दा
न्यतीतानि निरग्नेर्वै द्विजन्मनः। तावंति कृच्छ्राणि चरेद्धोम्यं दद्याद्यथाविधीति।। ।।अथालस्यादिनाग्नि
पूर्वत्यागे स्मृत्यंतरे। आलस्येन यदा वह्निं द्वादशाहं त्यजेत्प्रभो। त्रिरात्रमुपवासं च चरेत्पापविशुद्धये इति
स्कांदेपि। द्वादशाहातिक्रमे त्र्यहमुपवासः। पयोभक्षणं वा। कूष्मांडीभिर्होमः क्रमेणो भवेदिति। भा यं४
रद्वाजोपि। द्वादशाहातिक्रमे त्र्यहमुपवासो मासातिक्रमे द्वादशाहमुपवासः पयोभक्षणं चेति। उपवासा
शक्तो मासं पयोव्रतं कार्यं। अमुनैवाभिप्रायेण अब्दपर्यंतं त्यागे मासं पयोव्रतमित्युदाहृतं। प्रयोग
रत्ने स्मृत्यंतरेऽपि तामहं भट्टश्रीनारायणपदपाथोजैः। प्रमादात्त्यागे तु भारद्वाजगृह्ये। प्राणाया
संवत्सरातिक्रमे मासोपवासः ३

Indira Gandhi National Centre for the Arts

प्रा॰मु॰स्री॰ मद्यातमात्त्रिरात्रादुपवासः स्याद्दाविंशतिरात्रात्। अतऊर्ध्वं माषष्ठिरात्रात्तिस्रो रात्रीरुपवसे
५० त्। अतऊर्ध्वमावत्सरात्प्राजापत्यं चरेत्। अतऊर्ध्वं कालबहुत्वे दोषबहुत्वमिति। स्कांदे पि।
कृत्वा स्नानं तु यो विप्रः प्रमादात्स्यजति प्रभो। आयामयाम स्नातं कुर्यादुपवासमथापि वेति। आद्यं
त्रिरात्रे स्यं विंशतिरात्रे ज्ञेयं॥ ॥ अथ व्रात्यत्वे॥ व्रात्यो नाम सावित्रीपतितः। तदाहाश्वलायनः॥
अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वैकादशे क्षत्रियं द्वादशे वैश्यमाषोडशाद्ब्राह्मणस्यानतीतः का ण५
ल आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊर्ध्वं पतितसावित्रीका भवंति नैनानुपनयेन्ना
ध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुरिति। अत्राचीर्णप्रायश्चित्तानितिशेषः पूरणीयः। चीर्णप्रायश्चि
त्तेनोपनयनं कार्यं। किं तत्प्रायश्चित्तमिति शंकायां वसिष्ठ आह। पतितसावित्रीक उद्दालकव्रतं चरेत्
द्वौ मासौ यावकेन वर्तयेन्मासं पयसार्द्धमासमामिक्षया ऽष्टरात्रं घृतेन षड्रात्रमयाचितं हविष्यं
भुंजीत त्रिरात्रमब्भक्षो ऽहोरात्रमुपवसेदश्वमेधावभृथं वा गच्छेद्व्रात्यस्तोमेन वा यजेतेति। इदं प्राय
श्चित्तमुपनेत्रादिसकलसामग्रीसत्त्वेपि कामतः पंचदशादिवर्षातिक्रमे बोध्यं। सामग्रीवैकल्ये ५०
त्वाह यमः। सावित्रीपतिता यस्य दशवर्षाणि पंचच। सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः। एक

विंशतिरात्रं तु पिबेत्प्रसृतियावकं। हविषा भोजयेच्चैव ब्राह्मणान्सप्त पंच च। ततो यावकशुद्धस्य तस्योपन
यनं स्मृतमिति। असमर्थस्य मनुराह। एषां द्विजानां सावित्री नानूच्येत यथाविधि। तांश्चारयित्वा त्रीन्कृ
च्छ्रान्यथाविध्युपनाययेदिति। यस्य पित्रादयोप्यनुपेतास्तं प्रत्याहापस्तंबः। यस्य पिता पितामह इत्य
नुपनीतौ स्यातां तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्यं यस्य प्रपितामहादिनानुस्मर्यत उपनयनं तस्य द्वाद
शवर्षाणि त्रैविद्यं ब्रह्मचर्यमिति। इदं च व्याख्यातं हरदत्तेन भाष्यकृता। प्रपितामहादिः प्रपितामहादारभ्य
प्रपितामहः पितामहः पिता स्वयं च यथाकालमिति। यस्य प्रपितामहस्य पितुरारभ्य नानुस्मर्यते उ
पनयनं तस्य प्रायश्चित्तं नोक्तमिति। तथा च संस्कार्यस्य त्रिपुरुषोर्ध्वमपि व्रात्यत्वे कथमपि संस्कार्यस्यो
पनयनेन भवतीति फलितं॥ ॥ अथ भृतकाध्ययनाध्यापनयोराह हारीतः। भृतकाध्यापनं कृत्वा
भृतकाध्यापितश्च यः। अनुयोगप्रदानेन त्रीन्पक्षान्नियतः पिबेत्। ब्राह्मीं सुवर्चलामिति शेषः पूरणीयः।
तस्याः प्रकृतत्वात्। अनुयोगो ध्येयं तिरस्कार इति विज्ञानेश्वरः॥ ॥ अथ ऋणानपाकरणे॥ ऋणं च द्विधा।
उत्तमर्णपरिगृहीतद्रव्यादानरूपं। तथा जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते यज्ञेन देवेभ्यः प्रज
भ्य १ यापितृभ्यो ब्रह्मचर्येण ऋषिभ्य इत्येतत्त्रितयरूपं च। अत्र ऋणत्रय अपेक्षया याज्ञवल्क्योक्तमतचतुष्टयं योज

Indira Gandhi National
Centre for the Arts

धा॰मु॰ली॰ नीयं। मनुरप्याह। इष्टिं वैश्वानरीं चैव निर्वपेदब्दपर्यये। अब्दपर्यये ऽब्दान्ते। क्लृप्तानां पशुसोमानां नि
ष्कृत्यर्थमसंभवइति॥ ॥ अथानाहिताग्नित्वे। अत्र योगीश्वरोक्तं व्रतचतुष्टयं वर्षादूर्ध्वमापदि शास्त्रय
५१ पेक्षया द्रष्टव्यं। अनापदि तु मानवं त्रैमासिकं। वर्षादर्वाग्विशेषमाह कार्ष्णाजिनिः। काले त्वाधायक
र्माणि कुर्याद्विप्रो विधानतः। तदकुर्वंस्त्रिरात्रेण मासि मासि विशुध्यति। अनाहिताग्नेरपि त्रादोयध्य
मानः स्त्रीलोयदि। साहि व्रात्येन पशुना यजेतान्नि ध्रुयायात्विति। आवसथ्याधाने विशेषमाह स एव।
कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनं। चांद्रायणं चरेद्वर्षं प्रतिमासमहोपि वेति। वर्षादूर्ध्वं चांद्रायणंत
स्मादर्वाक्प्रतिमासमहरुपवास इति फलितार्थः। उक्तं प्रायश्चित्तं सत्यधिकारे आधानाभावे बोध्यं॥ ॥
अथापण्यविक्रये। पैठीनसिः। ब्राह्मणस्य लवणपक्वान्नमधुक्षीरं दधिघृतमुदकं सर्वगंधास्तिलारक्तं
वासो गुडतैलग्राम्यपशूनां धर्मिकं शफकेशार्यश्च सर्वे चारण्याः पशवो विद्यागावः शंखश्चौर्णा चेति विक्र
यणे नैकैकं ग्रामे कैकस्मिन्प्राजापत्यं चरेदिति। स एव। आरामतडागोदपानपुष्करिणीसुकृतसोमविक्रय ५१
त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारः संवत्सरेण पूतो भवतीति। पराशरः। विक्रीय कन्यकां गां च कृ
च्छ्रं सांतपनं चरेदिति। यमः। गवां विक्रयकारी तु गवि रोमाणि यानि तु। तावद्वर्षसहस्राणि गवां गोष्ठे-

क्रिमिर्भवेत्। हारीतः। गुडतिलपुष्पमूलफलपक्वान्नविक्रये सोमायनं लाक्षालवणमधुमांसतैलक्षी
रदधितक्रघृतगंधचर्मवासः सामान्यतमविक्रये चांद्रायणं। तथोर्णाकेशवेसरिभूधेनुवेश्मादश्म
स्त्रविक्रये च। मद्यमांसस्नाय्वस्थिशृंगनखशुक्तिविक्रये तप्तकृच्छ्रं। हिंगुगुग्गुलमनःशिलांजनगैरिक
क्षारलवणमणिमुक्ताप्रवालवेणववेणुमन्मयेषु च। आरामतडागोदपानपुष्करिणीसुकृतविक्रये त्रि
य्य ५ षवणस्नायी धःशायी चतुर्थकालाहारोद्वा[illegible]सदृ स्त्रजपन्गायत्रीं संवत्सरेण पूतो भवति। हीनमानोन्मा
नसंकरव्याजद्रव्यसंकीर्णविक्रये चेति। केसर्यश्वः। मानं प्रस्थादि। उन्मानं तुला। संकरेण द्रव्यांतरेण
संकीर्णं मिश्रितमत एव व्याजद्रव्यं। हीनमिति सर्वेषां विशेषणं। हीनं निषिद्धं। भविष्ये। गुडतिलास्तथा
लो॰५ नीलीकेशा गोधूमशाल्यकाः। विक्रीय ब्राह्मणो गां च कृच्छ्रं सांतपनं चरेदिति। चतुर्विंशतिमते। सुरा
या विक्रयं कृत्वा चरेत्सोम्यचतुष्टयं। लाक्षालवणमांसानां चरेच्चांद्रायणत्रयं। मध्वाज्यतिलसोमा
नां चरेच्चांद्रायणद्वयं। पयः पायसपूपानां चरेच्चांद्रायणव्रतं। दध्यन्नेक्षुरसस्यैव गुडखंडादिविक्रये। स
र्वेषां स्नेहपक्वानां पराकं तु समाचरेत्। कदलीनालिकेरं च नारिंगं बीजपूरकं। एतेषां पदकृच्छ्रं स्यात्क्ष
बीरादिस्तथैव च। कस्तूरिकादिगंधानां विक्रये कृच्छ्रमाचरेत्। कर्पूरादेस्तरद्वस्यादिने हिंग्वादिविक्रये।

Indira Gandhi National Centre for the Arts

प्रा॰मु॰ली॰ तिलानां विक्रयं कृत्वा प्राजापत्यं समाचरेत्। धर्मार्थं क्रमिजानां श्रयज्ञार्थं विक्रयं नयेत्। रक्तपीता
दिवस्त्राणि कृष्णाजिनमथापि वा। विक्रयेत्र्यहमेतेषां गर्गस्य वचनं यथा। उपोषणमिति दोषः। गोवि
५२ क्रयत्नरः कृत्वा लाभार्थं धनमोहितः। प्राजापत्यं प्रकुर्वीत राजा नामेदवेस्मृ॰ तं। खराश्वाश्वतरीणां
च करभाणां च विक्रये। पराकं तत्र कुर्वीत कृतानां द्विगुणं चरेत्। नारीणां विक्रयं कृत्वा चरेच्चांद्रायणव्र
तं। द्विगुणं पुरुषस्यैव व्रतमाकुर्मनीषिणः। चांद्रायणं प्रकुर्वीत एकाहाद्देदविक्रये। अंगानां तु परा
कः स्यात्स्मृतीनां कृच्छ्रमाचरेत्। इतिहासपुराणानां चरेत्सांतपनं द्विजः। रहस्यपंजराणां च कृच्छ्रमेव
समाचरेत्। गाथानां नीतिशास्त्राणां प्राकृतानां तथैव च। सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेदि
ति। वेदपुस्तकविक्रयो वेदविक्रयः॥ एवमेवेतिहासादिषु ज्ञेयं। विष्णुः रक्तवस्त्ररंगरत्नगुडगंधमधु
रसोर्णाविक्रयी त्रिरात्रमुपवसेत्। प्राणिभिः पण्यसोमविक्रयी तप्तकृच्छ्रं कुर्यात्। तं च भरयज्ञोपन
ये इति। अभ्यासविषये शंखश्चाह। धारयित्वा तुलां वक्रां विषमां कारयन्वणिक्। सुरालवणमधा
नां कृत्वा क्षीरस्य विक्रयं। लाक्षाया श्चैव मांसस्य कुर्याद्देवमहाव्रतं। विक्रीता प्राणिनो मत्स्यं तिलस्य च तत ५२
था चरेदिति। महाव्रतं द्वादशाब्दं। उक्तप्रायश्चित्तं अशक्तस्यापदि वैश्यवृत्तिमाश्रित्य जीवितो ज्ञेयं। अना पा१

परि तु द्विगुणं दोषाधिक्यात्। क्षत्रियवैश्ययोरपि तथा परिभाषाप्रासंयोध्यं। शूद्रस्य न दोषः। लवणं मधु
मद्यं वादधितक्रं घृतं पयः। न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयमिति पराशरोक्तेः॥ अत्र श्रीमातामहगुरु
चरणाः। यज्ञार्हितेनार्जयंति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्यंति जप्येन तपसैव चेति मानवात्पण्य
विक्रयार्जितद्रव्यत्यागपूर्वकं प्रायश्चित्तं कुर्युरित्याहुः। युक्तं तु वचनात्तादर्थ्यप्रतीत्यभावात्स्वयं निर्दि
ष्टप्रायश्चित्तेन सह विकल्प इति प्रतिभाति। धनोत्सर्ग एव प्रायश्चित्तमिति मानवाशयः॥ ॥अथ
५६ स्तेयनाम्नाभिधेयं परस्य हरणो मनुराह। धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः। स्वजातीयगृ
हादेव कृच्छ्राब्देन विशुध्यति। अत्र द्विजोत्तमग्रहणात्क्षत्रादेर्न्यूनं प्रकल्प्यं। मनुष्याणां तु हरणे स्त्रीणां क्षे
त्रगृहस्य च। कूपवापीजलानां च शुद्धिश्चांद्रायणं स्मृतं। द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्म
नः। चरेत्सांतपनं कृच्छ्रं तं निर्यात्यात्मशुद्धये। भक्ष्यभोज्यापहरणे यानशय्यासनस्य च। पुष्पमूलफ
लानां च पंचगव्यं विशोधनं। तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च। चैलचर्मामिषाणां च त्रिरा
त्रं स्यादभोजनं। मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानां च द्वादशाहं कणान्न
ता। कार्पासकीटजोर्णानां द्विखुरैकखुरस्य च। पक्षिगंधौषधीनां च रज्वाश्चैव त्र्यहं पयः इति। इदं धा

Indira Gandhi National
Centre for the Arts

 न्यहरणेभिहितंप्रायश्चित्तंदशकुंभपरिमितेधान्यहरणेएव। अधिकेवधस्यनिर्दिष्टत्वात्। तथाचस्मृत्यं
तरे। धान्यंदशभ्यःकुंभेभ्योहरतोभ्यधिकेवधइति। कुंभउक्तःकात्यायनेन। दशद्रोणाभवेत्खारीकुं
 भोपिद्रोणाविंशतिरिति। द्रोणमाहयोगीश्वरः। पलंचकुडवप्रस्थआढकोद्रोणएवच। धान्यमाने
षुविज्ञेयाःक्रमशोमीचतुर्गुणाइति। पलप्रमाणमुक्तंस्तेयप्रायश्चित्तकथने। स्मृत्यंतरे। रूप्यंहृत्वाद्वि
जोमोहाच्चरेच्चांद्रायणव्रतं। गद्याणदशकादूर्ध्वमामासाद्विगुणंभवेत्। आसहस्राच्चत्रिगुणंतुर्ध्वेहेमवि
धिःस्मृतइति। गद्याणउक्तोज्योतिःशास्त्रे। तुल्यायवाभ्यांकथितात्रगुंजावल्लस्त्रिगुंजोधरणंच
नेष्टौ। गद्याणकस्तद्द्वयमिति। जाबालिः। तिलधान्यान्यवस्त्राणांशय्यानांमामिषस्यच। संवत्सरार्द्धं
कुर्वीतव्रतमेतत्समाहितइति। अकामकृतेचैतत्। विष्णुः। रजताश्वगोभूमिकन्यानांसकृद्धरणेचांद्रायण
त्रयमिति। क्वचित्प्रतिप्रसवमाहमनुः। द्विजोध्वगःक्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके। आददानःपरक्षेत्रान्न
दंडंदातुमर्हति। चणकव्रीहिगोधूमयवानांमुद्गमाषयोः। अनिषिद्धैर्गृहीतव्यामुष्टिरेकःपथिस्थितैः।
तथैवसप्तमेभक्तेभक्तानिषडनश्नता। अश्वस्तनविधानेनहर्तव्यंहीनकर्मणइति। शंखः। अस्तेयमग्र ५३
येकाष्ठमस्तेयंचतृणंगवे। कन्याहरणमस्तेयं योहरत्यनलंकृतामिति। कन्याहरणस्यास्तेयत्व

मारुरादिविवाहाभिप्रायेणतच्चकलियुगातिरिक्तयुगेबोध्यं। कलौतन्निषेधादितिसंक्षेपः॥ ॥अथ
विनापराधंपित्रादित्यागेयोगीश्वरोक्तंचांद्रादिप्रकृयोजनीयं॥ ॥अथानुकृष्टेषूपपातकेषुवैदिक॥
अथरजस्वलानांपरस्परसंस्पर्शे॥ वृद्धवसिष्ठः। स्पृष्टेरजस्वलेन्योन्यसवर्णेत्वेकभर्तृके। कामतोका
मतोवापिसद्यःस्नातेविशुध्यतइति। असपत्न्योःसवर्णयोःकामतस्पर्शेकश्यपः। रजस्वलातुसं
स्पृष्टाब्राह्मण्याब्राह्मणीयदि। एकरात्रंनिराहारापंचगव्येनशुध्यतीति। कामतोभ्यासेतुपराशरः। स्पृ
ष्टारजस्वलान्योन्यंब्राह्मणीब्राह्मणीयदि। तावत्तिष्ठेन्निराहारात्रिरात्रेणैवशुध्यतीति। अकामतस्तु
मार्कंडेयः। उदक्यातुसवर्णायास्पृष्टाचेत्स्यादुदक्यया। तस्मिन्नेवाह्निस्नाताशुद्धिमाप्नोत्यसंशय
इति। असवर्णास्पर्शेतुवृद्धवसिष्ठः। स्पृष्टारजस्वलान्योन्यंब्राह्मणीशूद्रजापिच। कृच्छ्रेणशुध्यतेपूर्वा
शूद्रीदानेनशुध्यतीति। दानेनकृच्छ्रप्रत्याम्नायभूतचतुर्थांशदानेनेतिविज्ञानेश्वरः। पादकृच्छ्रेणेतिफ
लितोर्थः। स्पृष्टारजस्वलान्योन्यंब्राह्मणीवैश्य जापिच। पादन्यूनंचरेत्पूर्वाकृच्छ्रंपादंतथोत्तरा।
स्पृष्टारजस्वलान्योन्यंब्राह्मणीक्षत्रियातथा। कृच्छ्रार्द्धाच्छुध्यतेपूर्वात्वितरातुतदर्द्धतः। तदर्द्धतःपा
दकृच्छ्रइत्यर्थः। स्पृष्टारजस्वलान्योन्यंक्षत्रियाशूद्रजापिच। उपवासैस्त्रिभिःपूर्वात्वितरात्रेणवात
वैश्य।

Indira Gandhi National
Centre for the Arts

प्रा०मु०त्री० रा। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया वैश्यजापि च। त्रिरात्राच्छुध्यते पूर्वा त्वहोरात्रेण वापरा। स्पृष्ट्वा रज
स्वलान्योन्यं वैश्यशूद्री तथैव च। त्रिरात्राच्छुध्यते पूर्वा नक्तेनान्त्या तु दिनद्वयात्। वर्णानां कामतस्पर्शे शुद्धिरेषा पुरा
५४ तनेति। अकामतस्तु स्पर्शे आह विष्णुः। रजस्व लाहीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शु
क४ द्धिः स्यात्। सवर्णामधिवर्णां वा स्पृष्ट्वा सद्यः स्नात्वा विशुध्यतीति॥ ॥अथ रजस्वलाया अस्पृश्यस्प या४
न५ र्शे वृद्धवसिष्ठ आह॥ पतितान्त्यश्वपाकैश्च संस्पृष्टा चेद्रजस्वला। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाच
रेत्। प्रथमेह्नि त्रिरात्रं स्याद्द्वितीये द्व्यहमेव तु। अहोरात्रं तृतीयेह्नि परतो नक्तमाचरेत्। तान्यहा
न्युर्वरित दिनान्यतिवाह्येत्यर्थः। भवदेवस्तु पंचगव्याशनं कुर्यादित्यधिकमाह। युक्तं चैतत्। चंडालेन तु सं
स्पृष्टा कदाचित्स्त्री रजस्वला। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्। त्रिरात्रमुपवासः स्यात्पं
चगव्येन शोधनं। तानि दिनानि व्यतिक्रम्य अजाघ्रातं तु कारयेदिति कश्यपवचनात्। त्रिरात्रमुपवासः प्र
थमदिनाभिप्रायेण। वासिष्ठैकवाक्यात्। एतेन वासिष्ठविपरीतं वदन्शूलपाणिः खंडितः। अकामत
स्तु स्पर्शे त्वमाह बोधायनः। रजस्वला तु संस्पृष्टा चंडालान्त्यश्ववायसैः। तावत्तिष्ठेन्निराहारा या ५४
वत्कालेन शुध्यतीति। उपवासासामर्थ्ये त्वंगिराः। चंडालश्वपचौ वापि यद्यात्रेयी स्पृशेद्यदि। अका

मकृष्टे वर्जितं पंचगव्येन शुध्यतीति। एतत्पंचगव्यप्राशनं शुध्युत्तरं बोध्यं॥ काकादिस्पर्शे यमः। रजस्वला
तु संस्पृष्टा श्वनाजंबुकवायसैः। निराहारा भवेत्तावद्यावत्कालेन शुध्यति। यत्तु बोधायनोक्तं। रजस्वला तु
संस्पृष्टा ग्रामकुक्कुटसूकरैः। श्वभिः स्नात्वा क्षिपेत्तावद्यावच्चंद्रस्य दर्शनमिति। तद्ग्रामकाकपरं। अत्र चंद्रेन प दश३
देन रात्रिर्लक्ष्यते। अशक्तं त्वं तस्य विशेषं दर्शितवान्बोधायनः। रजस्वला तु भुंजाना श्वान्त्यजादीन्स्पृशेद्यदि।
गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति। अशक्तो कांचनं दद्याद्विप्रेभ्यो वापि भोजनमिति। कांचनदानं पंचमेह्नि
चतुर्षु स्नानानधिकारात्। उच्छिष्टयोरन्योन्यस्पर्शे त्रिः। उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला। कृच्छ्रे
णा शुध्यते पूर्वा शूद्रा दानैरुपोषितेति। उच्छिष्टाद्द्विजस्पर्शे मार्कंडेयः॥ द्विजान्कथंचिदुच्छिष्टान्रजस्था यदि
संस्पृशेत्। अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेदिति। आशौचसंस्पर्शे शातातपः। आर्त्तवाभि
प्लुता नारी स्पृष्टा चेच्छवसूतके। ऊर्ध्वं त्रिरात्रात्स्नातां तां त्रिरात्रमुपवासयेत्। अत्र पंचमदिनमारभ्य त्रिरात्रो
पवासो ज्ञेयः। चतुर्थे प्रायश्चित्तसंकल्पानधिकारात्। संस्पृष्टस्य भोजनादोषमत्रिराह। आर्त्तवाभिप्लुता नारी
मृतसूतकयोः स्पृशेत्। भुक्त्वापि त्वाचरेत्कृच्छ्रं स्पृष्ट्वा तु त्र्यहमेव तु। सूतकिस्पर्शे स्नानात्प्राग्रजोदर्शने मा
र्कंडेयः। मृतसूतकसंस्पर्शे ऋतुं दृष्ट्वा कथं भवेत्। नास्नानकालमश्नीयाद्भुक्त्वा चान्द्रायणं चरेदिति। अत्र

Indira Gandhi National
Centre for the Arts

नचास्नानकालमितिपदच्छेदः। रजस्वलायाः शावाशौचप्रसक्तौव्यासः। मलवद्वसनायास्तुअप्रापत्यं
भवेद्यदि। अभिषेकेणशुद्धिःस्यान्नाशनंवादिनत्रयमिति। त्रिरात्रमुपोषणंबलवत्याः। इतरस्यास्तुस्नान
मात्रेणभोजनाधिकारः। तदेवोक्तंमदनरत्नस्मृत्यंतरे। अप्रापत्येसमुत्पन्नेमलवद्वाससीयदि। अभिषेकेणशु
द्धिःस्याद्दिनत्रयमभोजनमिति। अप्रापत्यंबंधुमरणादि। पराशरः। स्नानेनैमित्तिकेप्राप्तेनारीयदिरजस्व
ला। पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत्। व्रतंरजस्वलधर्मपरिपालनरूपं। सिक्तगात्राभवेदद्भिः
सांगोपांगात्कथंचन। नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेदिति। रजस्वलाग्रहनक्षत्रनिरीक्षणदिवास्वा
पंमधुमांसतांबूलनखनिकृंतनदंतधावनप्रवासस्नानाभ्यंजनादिपरिवर्जयेदिति॥ ॥अथचंडालादिस्प
र्शे॥ पराशरः। चंडालस्पर्शनेचैवसचैलंस्नानमाचरेदिति। देवलोपि। श्वपाकंपतितंव्यंगमुन्मत्तंशव दा
हकं। सूतकंसूतिकांनारींरजसाचपरिप्लुतां। श्वकुक्कुटवराहांश्चग्राम्यान्संस्पृश्यमानवः। सचैलंसशिरः
स्नात्वातदानीमेवशुध्यतीति। एतस्मादेवबृहस्पतिवचनाद्यत्रयत्रस्नानमुक्तंतत्पुरुषनारीभिःसशिरस्कंकार्यं॥
मनुः। दिवाकीर्तिमुदक्यांचपतितांसूतिकांतथा। शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानंसमाचरेदितिक ५५
दीवाकीर्तिश्चंडालाद्युक्तिः। एतदकामतःस्पर्शेबोध्यं। दिवाकीर्तिंचितिंयूपंपतितंचरजस्वलां। स्पृ



ष्ट्वाप्रमादतोविप्रःस्नानंकृत्वाविशुध्यतीतिबृहस्पतिवाक्यैकवाक्यत्वात्। कामतोप्याहसएव। पतितं
सूतिकामंत्यंशवंस्पृष्ट्वाचकामतः। स्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति। संवर्त्तः। कैवर्त्त
मृगयुव्याधशौनशाकुनिकानपि। रजकंचतथास्पृष्ट्वास्नात्वैवाशनमाचरेत्। मनुः। जान्वधःस्नानमा
त्रंस्यादानाभेरेकरात्रकं। नाभेरूर्ध्वंत्रिरात्रंस्यान्मदिरास्पर्शनेविधिः। उपोषणमित्यध्याहार्यं। आ
तुरान्प्रत्याहतुर्गार्ग्यापस्तंबौ। शूद्रस्पृष्ट्वानिषादंचशुध्येदाचमनाद्द्विजः। तद्धीनस्पर्शनाद्यत्नात्प्रा
णायामेस्तपोबलात्। सर्वेषामंत्यजादीनांस्पर्शनाचमनंविदुरिति। आपस्तंबएव। चर्मकारंचजनकंधी
वरंनटमेवच। एतान्स्पृष्ट्वाद्विजोमोहादाचमेत्प्रयतोपिसन्। एतैस्पृष्टस्तूच्छिष्टएकरात्रंपयःपिबेत्।
तैरुच्छिष्टस्त्रिरात्रंस्याद्घृतंप्राश्यविशुध्यतीति। पराशरः। अस्तंगतेयदासूर्येचंडालंपतितंस्त्रियं। सू
तिकांस्पृशतश्चैवकथंशुद्धिर्विधीयते। जातवेदःसुवर्णंचसोममार्गंतथैवच। ब्राह्मणानुगतश्चैवस्ना
नंकृत्वाविशुध्यतीति। अत्रस्नानोत्तरमग्निस्पर्शसुवर्णदानंचंद्रदर्शनंब्राह्मणानुगमनैःशुध्यतीतिभा
वः। निशिस्नानार्थंतोयमाहदेवलः। दिवाहृतैर्जलैःस्नानंनिशिकुर्यान्निमित्ततः। प्रक्षिप्यचसुवर्णंच
सन्निधाप्यचपावकमिति। शिश्वादीनांशुद्धिप्रकरणमाहवृद्धशातातपः। शिशोरभ्युक्षणंप्रोक्तंबाल

Indira Gandhi National
Centre for the Arts

प्रा०मु०टी० स्याचमनं स्मृतं। रजस्वलादिसंस्पर्शे स्नातव्यं तु कुमारके इति। तेषां स्वलक्षणमाह स एव। प्राङ्नामकर
णाद्बालः प्रागन्नप्राशनाच्छिशुः। कुमारस्तु [redacted] स विज्ञेयो यावन्मौंजीनिबंधनमिति॥ ॥अथ प
५६ रंपरास्पर्शे याज्ञवल्क्यः॥ उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्। अस्यार्थः। रजस्वलादुद
स४ क्यादीन्स्पृष्ट्वा तैः स्नायात्। यस्तु स्पृष्टान्स्पृशति स अप उपस्पृशेत्। आचमेदित्यर्थः। एतच्च कुमारादि
विषयं। अन्यान्प्रत्याह मनुः। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यतीति। वस्त्रांतरित आह स मनुः।
साक्षात्स्पर्शे तु यत्प्रोक्तं तद्वस्त्रांतरितेपि चेति। आपस्तंबः। एकवृक्षसमारूढश्चांडालादिर्यदा भवे
त्। ब्राह्मणस्तत्र निवसन्स्नानेन शुचितामियादिति। आदिनोदक्यादिपरिग्रहः। एकशाखायां फल
भक्षणे स एव। एकवृक्षसमारूढो चंडालब्राह्मणौ यदि। फलं भक्षयतस्तस्य प्रायश्चित्तं कथं भवेत्। ब्रा स५
ह्मणानामनुज्ञाय सवासा जलमाविशेत्। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति। मतिपूर्वं चेत्तत्
अज्ञानात्तु ब्राह्मे। विप्रश्चांडालसहितो यत्रैकस्मिन्वनस्पतौ। अज्ञानात्तु फलं भुंक्ते चरेत्तत्राघमर्षण ५६
मिति। क्वचिदपवादमाह बृहस्पतिः। तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृ
ष्टास्पृष्टिर्न दुष्यति। परापरेपि (?) रथ्याकर्दमतोयानि नावः पंथास्तृणानि च। स्पर्शनान्न प्रदुष्यंति प

क्वेष्टकाचितानि चेति॥ ॥अथ चंडालादिसंभाषणे पराशरः। श्वपाकं वापि चंडालं विप्रः संभाषते यदि।
द्विजसंभाषणं कुर्यात्सावित्रीं तु सकृज्जपेदिति। द्विजशब्देन श्रोत्रियादिर्विप्रो ग्राह्यो न तु क्षत्रियादिः। स्व
स्मान्निकृष्टस्य प्रायश्चित्ताकल्पत्वात्। हारीतस्तु विकल्पमाह। चंडालैः सह संभाष्य द्विजसंभाषणाच्छु
चिः। गायत्रीं व्याहरेद्वापि इति धर्मो व्यवस्थित इति। चंडालाद्यो यद्युच्छिष्टा भवेयुस्तदा त्रिरात्रमुपवास
माह पराशरः। उच्छिष्टैः सह संभाषे त्रिरात्रेणैव शुध्यतीति। स एव। चंडालैः सह सुप्तस्तु त्रिरात्रमुपवासयेत्।
चंडालैकपथं गत्वा गायत्रीस्मरणाच्छुचिः। चंडालवाप्यादि प्रकृत्याह आपस्तंबः। तत्तोयं यः पिबेद्विप्रः का
मतोकामतोपि वा। अकामान्नक्तभोजी स्यादहोरात्रेण कामत इति। स्नानपानयोराह स एव। अंत्यजैः
खानिताः कूपास्तडागा वाप्य एव च। एषु स्नात्वा च पीत्वा च प्राजापत्येन शुध्यतीति। चंडालभांडोदक
पाने अंगिराः। चंडालपरिगृहीतमज्ञानादुदकं पिबेत्। तस्य शुद्धिं विजानीयात्प्राजापत्येन नित्यश इति।
मतिपूर्वपाने आपस्तंबः। चंडालकूपभांडस्थं नरः कामाज्जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दि
शेत्। चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः। तदर्धं तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेदिति। मानुषश्रा
वसंस्पृष्टकूपजलपाने हारीतः। क्लिन्नं भिन्नं शवं चैव तोयं तत्र स्थं यदि तत्पिबेत्। शुद्धो चांद्रायणं कुर्यान्नृमह

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ घृतमथापिवा। यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः। जपंस्त्रिषवणस्नायी अहोरात्रेण शुध्यतीति। पंच
नखादिशवसंस्पृष्टकूपादिजलपाने त्वाह विष्णुः। मृतपंचनखात्कूपादत्यंतोपहताद्वोदकं पीत्वा ब्राह्मणस्त्र्य
५८ हमुपवसेद्द्व्यहं राजन्य एकाहं वैश्यः शूद्रो नक्तं सर्वे चांते पंचगव्यं पिबेयुरिति। जलेजलस्प्राणिशवेन दोषः। वि
ण्मूत्रसंस्पृष्टे अंगिराः। कूपे विण्मूत्रसंसृष्टे पीत्वा तोयं द्विजोत्तमः। त्रिरात्रेण विशुध्येत कुंभे सांतपनं स्मृतमिति।
तत्राह विष्णुः। वापीकूपतडागेषु दूषितेषु विशोधनं। घटानां शतमुद्धृत्य पंचगव्यं ततः क्षिपेदिति॥ चंडालान्नभो
जने कूर्मपुराणे॥ चंडालान्नं द्विजो भुक्त्वा सम्यक्चांद्रायणं चरेत्। बुद्धिपूर्वं तु कृच्छ्राब्दं पुनः संस्कारमेव चेति। वसि
ष्ठोपि। चंडालपतितान्नभोजने पुनरुपनयनमिति। पुनरुपनयनप्रयोगमुपरिष्टाद्वक्ष्यामः। पराशरः। अविज्ञा
तस्तु चंडालो यत्र वेश्मनि तिष्ठति। दध्ना च सर्पिषा चैव क्षीरगोमूत्रयावकं। भुंजीत सहभृत्यैश्च त्रिसंध्यमवगाह
नमिति। स एव। गृहस्याभ्यंतरे गच्छेच्चंडालो यदि कस्यचित्। तमागाराद्विनिर्यास्य मृद्भांडं तु विसर्जयेत्। रस
पूर्णं तु मृद्भांडं न त्यजेत्तु कदाचन। गोमयेन तु संमिश्रैर्जलैः प्रोक्षेद्गृहं तथेति॥ ॥ अथ श्वादिदंशे॥ पराशरः। ५८
वृकश्वानशृगालाद्यैर्दष्टो यस्तु द्विजोत्तमः। स्नात्वा जपेत्स गायत्रीं पवित्रां वेदमातरमिति। बोधायनः। वेदवि
द्याव्रतस्नातः शुना दष्टस्तु ब्राह्मणः। शतपर्यायमावर्त्य गायत्रीं शुद्धिमाप्नुयादिति। अंगिराः। ब्राह्मणी तु शुना

दष्टा सोमे दृष्टिं निपातयेत्। यदा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत्। यां दिशं तु गतः सोमस्तां दिशं चावलोकये
त्। सोममार्गेण सा पूता पंचगव्येन शुध्यतीति। अंगिराः। ब्रह्मचारी शुना दष्टस्त्र्यहं सायं पयः पिबेत्। गृह
स्थस्तु त्रिरात्रं वाप्येकाहं वाग्निहोत्रवान्। नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत्। स्यादेतत्त्रिगुणं वक्त्रे म
स्तके तु चतुर्गुणं। अव्रती सव्रती वापि शुना दष्टस्तथा द्विजः। दृष्ट्वाग्नीन्हूयमानांस्तु सद्य एव शुचिर्भवेदिति।
जातूकर्ण्यः। ब्राह्मणी क्षत्रिया वैश्या शुनाथ श्वापदैरपि। दष्टा सचैलमामुत्य शुध्यती। तिलसंज्ञायद्रमि। शुना
घ्रातश्चातालपः। शुना घ्रातावलीढस्य नखैर्विदलितस्य। अद्भिः प्रक्षालनं शौचमग्निना चोपचूलनमि
ति। उपचूलनमग्नौ तप्तीकरणं। व्रणे कृम्युत्पत्तौ बोधायनः। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे। कृमिरु
त्पद्यते यस्य प्रायश्चित्तं कथं भवेत्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। त्र्यहं स्नात्वा च पीत्वा च कृमि
दष्टः शुचिर्भवेदिति। नाभेरधस्ताच्चैतत्। ऊर्ध्वं तु नाभेराह मनुः। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे। कृ
मिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्। गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत्। त्रिरात्रं पंचगव्याशी त्व
मेर्धि धो नाभ्या विशुध्यति। नाभिकंठांतरोद्भूते व्रणे चोत्पद्यते कृमिः। षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे इति।
क्षत्रियादीनामाह पराशरः। कृमिरुत्पद्यत इत्यधिकृत्य। क्षत्रियोपि सुवर्णस्य पंच माषान्प्रदापयेत्। गो

Indira Gandhi National
Centre for the Arts

 दक्षिणाश्चैववैश्यस्याप्युपवासं विनिर्दिशेत्। शूद्राणां नोपवासस्स्याच्छूद्रो दानेन शुध्यतीति॥ ॥अथ संस्का
 रान्नभोजने॥ अपरार्के बौधायनः। ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चांद्रा
यणं चरेत्। निर्वृत्तेव्रतहोमे तु प्राङ्नामकरणात्तथा। चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि। अतोन्येषु
तु भुक्त्वान्नं संस्कारेषु द्विजोत्तमः। नियोगादुपवासेन शुध्यते निंद्यभोजने। आपस्तंबः। याजकान्नं नवश्राद्धं
संग्रहे चैव भोजनं। स्त्रीणां प्रथमगर्भे च द्विजश्चांद्रायणं चरेदिति॥ ॥अथ श्राद्धभोजने॥ अपरार्के शंखः।
चांद्रायणं नवश्राद्धे पराको मासिके स्मृतः। पक्षत्रये तिकृच्छ्रः स्यात्षण्मासे कृच्छ्रमेव च। आब्दिके पादकृच्छ्रः स्या
देकाहः पुनराब्दिके। अत ऊर्ध्वं न दोषः स्याच्छंखस्य वचनं यथेति। मासिकेत्राद्यमासिके। द्वितीयादिषु त्वनु
कृच्छ्रेषु त्रिरात्रक्षपणविधानात्। न दोषः प्राग्वदित्यर्थः। कामत एतत्। अकामस्तु चतुर्विंशतिमते। प्राजापत्यं न
वश्राद्धे पादोनं मासिके तथा। पादकृच्छ्रसमुद्दिष्टं षण्मासे च तथाब्दिके। त्रिरात्रमन्यमासेषु यत्यब्दे चेदहः
स्मृतमिति। अन्यान्यपि लघुगुरुप्रायश्चित्तबोधकानि वचनान्यतदर्थकानि विस्तरभियानोदाहृतानि। 
क्षत्रियादीनां श्राद्धभोजने चतुर्विंशतिमते। चांद्रायणं नवश्राद्धे पराको मासिके स्मृतः। त्रैपक्षिके सांतपन
कृच्छ्रं मासद्वये स्मृतं। क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतं। वैश्यस्यैव धिकं प्रोक्तं क्षत्रियात्तु मनीषिणः।


शूद्रस्य तु नवश्राद्धे चरेच्चांद्रायणद्वयं। सार्द्धं चांद्रायणं मासि त्रिपक्षे त्वैंदवं स्मृतं। मासद्वये पराकः स्यादूर्ध्वं सां
तपनं स्मृतमिति। भरद्वाजः। अपात्रे यान्यदुद्दिश्य श्राद्धमेकादशेहनि। ब्राह्मणस्तत्र भुक्त्वान्नं त्रिषु चांद्रायणं
चरेत्। मार्कंडेयः। आमश्राद्धे तदा भुक्त्वा तप्तकृच्छ्रेण शुध्यति। संकल्पिते तथा भुक्त्वा त्रिरात्रं क्षपणं भवेदिति।
आमश्राद्ध इति नवश्राद्धविषयं। संकल्पित इति मासिकादिषु बोध्यं। यत्तु शंखश्चाह। आमश्राद्धाशने विद्वा
न्मासमेकं व्रतं चरेदिति। तदभ्यासविषयं। ब्रह्मचारिणश्चाह संवर्तः। मृतकान्नं नवश्राद्धं मासिकान्नं तथै
व च। ब्रह्मचारी तु योश्नीयान्मधु मांसं कथंचन। प्राजापत्यं तु कृत्वासौ मौंजीहोमेन शुध्यतीति। ब्रह्मपुराणे।
सूतके मृतके वाथ ग्रस्तयोश्चंद्रसूर्ययोः। छायायां कुंजरस्याथ भुक्त्वा च नरकं व्रजेत्। भुक्त्वा प्रमादाद्द्विजस्तु
सम्यक्चांद्रायणं चरेदिति। अपरिगणितश्राद्धभोजने त्वाहांगिराः। दशकृत्वः पिबेदापो गायत्र्या श्राद्धभु
द्द्विजः। ततः संध्यामुपासीत यजेच्च जुहुयादपि॥ ॥अथाभोज्यान्नाः॥ अपरार्के याज्ञवल्क्यः।
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ। तयोरन्नं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेदिति। शातातपः।
यत्र नाश्नंति देवाश्च पितरश्च तथातिथिः। वृथापाकः स विज्ञेयस्तस्य नाद्यात्कथंचन। योगृहीत्वा विवाहा
ग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि यः स्मृतः। वृथापाकस्य भुंजानः प्रायश्चित्तं स

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० माचरेत्। प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुध्यतीति। तथा। परपाकनिवृत्तस्य परपाकरतस्य च। अपच
स्य च भुक्त्वान्नं द्विजश्चान्द्रायणं चरेत्। परपाकनिवृत्तादेर्लक्षणमाह लिखितः। गृहीत्वाग्निं समारोप्य पंचय
५९ ज्ञान्न निर्वपेत्। परपाकनिवृत्तोसौ मुनिभिः परिकीर्तितः। पंचयज्ञान्स्वयं कृत्वा परान्नमुपजीवति। सततं प्रा
तरुत्थाय परपाकरतस्तु सः। गृहस्थधर्मनिरतो यो ददाति परिवर्जितः। ऋषिभिर्धर्मतत्त्वज्ञैरपचः संप्रकीर्तित इ
ति। ददाति परिवर्जितो दानहीन इत्यर्थः। चतुर्विंशतिमते। निराचारस्य विप्रस्य निषिद्धाचरणस्य च। अन्नं भुक्त्वा
नरः कुर्याद्दिनमेकमभोजनं। आचार्याग्नियुक्तद्विट्सु धर्मशास्त्रद्विषस्तथा। गोब्राह्मणद्विषश्चैव तद्व्रतमा
माचरेदिति। हारीतः। पतितान्नं यदा भुंक्ते विप्रश्चाण्डालवेश्मनि। मासार्धं तु पिबेद्वारि मासं कामकृते तथा। च
ण्डालवेश्मनि यदा भुंक्त इति द्वितीया योजना। भरद्वाजः। पक्षे वा यदि वा मासे नयस्याश्नाति देवताः। भुक्त्वा दुरात्म
नस्तस्य द्विजश्चान्द्रायणं चरेदिति। मनुः। नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः। आददीताममेवास्मादवृ
त्तावेकरात्रकमिति। अनेनैव न्यायेन हीनवर्णत्वसाम्यात्क्षत्रियाद्यन्नभोजने विप्रस्य दोषः प्रसज्येत नास्तीत्या
ह पराशरः। क्षत्रियस्यापि वैश्यस्य क्रियावन्तौ शुचिव्रतौ। तद्गृहे तु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः। क्रियावि ५९
हीनाध्ययनयजनादिरूपा। कलौ युगे त्वस्वाध्यायसंपन्नक्षत्रियवैश्ययोरभावात्तदन्नभोजनं नैव कार्यं

विप्रैः। अत एव सहस्रं तु जपेद्देव्याः क्षत्रियस्यान्नभोजने। तथोपवासं वैश्यस्य सहस्रं सार्धमेव चेति।
चतुर्विंशतिमतोक्तप्रायश्चित्तं संगच्छते। व्यासः। गृध्रो द्वादशजन्मानि दशजन्मानि सूकरः। श्वा चैव
दशजन्मानीत्येवं मनुरब्रवीदिति। शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः। स भवेच्छूकरो ग्राम्यस्तस्य
वा जायते कुले इति। आपस्तंबोपि। आहिताग्निस्तु यो विप्रः शूद्रान्नेन प्रवर्तते। पंच तस्य विनश्यन्ति आ
त्मा ब्रह्म त्रयोग्नयः। ब्रह्म वेदः। पराशरः। आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि। मनस्तापेन शुध्येत द्रुप
दानां शतं जपेदिति। क्वचित्प्रतिप्रसवमाह हारीतः। कंदुपक्वं स्नेहपक्वं पायसं दधि सक्तवः। एतान्यशूद्रा
न्नभुजो भोज्यानि मनुरब्रवीदिति। कंदुः भ्राष्ट्रः। क्लीबेंबरीषं भ्राष्ट्रो ना कंदुर्वा स्वेदनी स्त्रियामिति कोशा
त्। आपस्तंबोपि। आममन्नं मधु घृतं धानाः क्षीरं तथैव च। गुडमांसरसा ग्राह्या निवृत्तेनापि शूद्रतः।
पराशरः। घृतं क्षीरं तथा तैलं गुडं तैलेन पाचितं। गत्वा नदीतटे विप्रो भुंजीयाच्छूद्रभोजितं। आरनालं तथा
क्षीरं कांजिकं दधि सक्तवः। स्नेहपक्वं तथा चान्नं शूद्रस्यापि न दुष्यतीति। सुमंतुः। गोरसश्चैव सक्तुश्च
तैलं पिण्याकमेव च। अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतमिति। शूद्रसंपर्कं निषेधति पराशरः। शू
द्रान्नं शूद्रसंपर्कः शूद्रेण तु सहासनं। शूद्रात्ज्ञानागमश्चापि ज्वलंतमपि पातयेदिति। शूद्रसंपर्को

Indira Gandhi National Centre for the Arts

आ॰मु॰ली॰ एकागारे शूद्रेणसमंवासः। ज्ञानागमो धर्माधर्मविवेकः वेदमंत्रैः शूद्रहोममपि निषेधति स एव चाद
क्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः। ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेदिति। योगी। कद
६० र्यबद्धचोराणां क्लीबरंगावतारिणां। वेणाभिशस्तवार्द्धुष्यगणिकागणदीक्षिणां। अन्नं न ग्राह्यमित्य
र्थः। कदर्यलक्षणंच। आत्मानं धर्मकृत्यंच पुत्रदारांश्च पीडयेत्। लोभाद्यः पितरौ भृत्यान्स कदर्य इति
स्मृतः। लुब्ध इति फलितोर्थः। बद्धो निगडादिना वाचा निरुद्धश्च। रंगावतारी नटचारणरजकमल्लादिः।
वेणो वेणुच्छेदी। अभिशस्ताः पतनीयैः कर्मभिरभियुक्ताः। गणदीक्षी बहुयाजकः। वार्द्धुषी निषिद्धवृत्त्युपजीवी।
आपस्तंबः। रजकव्याधशैलूषवेणुचर्मोपजीविनां। यो भुंक्ते ब्राह्मणश्चान्नं शुद्धिश्चांद्रायणेन तु। स एव
व। कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा। ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवद्वयमि त्यन्यत्र विस्त
रः। क्रतुः। शूद्रहस्तेन यो भुंक्ते पानीयं पिबते क्वचित्। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति॥ ॥अथा
शौच्यन्नभक्षणे॥ अपरार्के छागलेयः। अज्ञानाद्भुंजते विप्रः सूतके मृतके पि वा। प्राणायामशतं कृत्वा शुध्यते
शूद्रसूतके। वैश्यस्य षष्टिर्भवेद्राज्ञि विंशतिर्ब्राह्मणे दश। एकाहंचत्र्यहं पंचसप्तरात्रमभोजनं। ततः शुचिर्भवे ६०
द्विप्राः पंचगव्यं पिबेत्ततः इति। कामकृते आह मार्कंडेयः। भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः। भुक्त्वा

तु क्षत्रियाशौचे तप्तकृच्छ्रो विधीयते। वैश्याशौचे तथा भुक्त्वा महासांतपनं चरेत्। शूद्रस्यैव तथा भुक्त्वा
द्विजश्चांद्रायणं चरेदिति। अभ्यासे त्वाह शंखः। शूद्रस्य सूतके भुक्त्वा षण्मासं व्रतमाचरेत्। क्षत्रियस्य त
था भुक्त्वा द्वौ मासौ व्रतमाचरेत्। ब्राह्मणस्य तथाशौचे भुक्त्वा मासं व्रती भवेदिति॥ जननाशौचे विशेषमाह
व्यासः। प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतके पुत्रजन्मनि। इदंच सूतिकागारे देवादि
पूजार्थं पितरं प्रत्येव। पुत्रजन्मनीत्युक्तेः। विप्रान्प्रतिसप्तस्वंतेषु। तत्र सर्वं प्रतिगृह्य संस्कृतान्नं न तु भक्षयेत्।
भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रायणं चरेदिति। तत्र प्रथमादि दिवसे कृतप्रायश्चित्तं। आहांगिराः। सूतके तु य
दा विप्रो ब्रह्मचारी विशेषतः। पिबेत्पानीयमज्ञानात्समश्नीयात्स्पृशेद्यदि। पानीयपाने कुर्वीत पंचगव्यस्य भ णा ५
क्षणं। त्रिरात्रं भोजने प्रोक्तं स्पृष्ट्वा स्नानं विधीयत इति॥ ॥अथानभ्यक्तान्नेन श्रौकृतिकरणमनुः। घृतहीनं
तु यो भुंक्ते नरस्त्वाकृतिपंचकं। पश्चाद्दिनेन यो भुंक्ते भुक्त्वा चांद्रायणं चरेदिति॥ ॥अथ हस्तदत्तभक्षणे॥
पराशरः। माक्षिकं फाणितं शाकं गोरसं लवणं घृतं। हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनमिति। फा
णितं भाषया राब इत्युच्यते। यमोपि। माक्षिकं फाणितं शाकं गोरसं लवणं घृतं। हस्तदत्तानि भुक्त्वा निभोक्ता
सांतपनं चरेदिति। इदं तु बुद्धिकृते ज्ञेयं॥ ॥अशुचिद्रव्यसंस्पृष्टभक्षणे शंखः। केशकीटावपन्नंच नी

Indira Gandhi National
Centre for the Arts

तं।१

प्रा॰मु॰ली॰ लीलाक्षोपध्याति॥ स्नात्वाऽस्थिचर्मसंस्पृष्टं भुक्त्वा तूपवसेदह इति। भोजनावसरे वामहस्तेनानालंबितभोजन
६१ पात्रो न भोजनेतिष्ठेत् भोजनेचैष इत्रिशन्मते। समुत्थितस्तु यो भुंक्ते यो भुंक्ते मुक्तभाजने। एवमेव स्वतः प्रा
हभुक्त्वा सांतपनं चरेत्। स्मृत्यंतरे। वटार्काश्वत्थपर्णेषु कुंभीतिंदुकपत्रयोः। कोविदारकदंबेषु भुक्त्वा चांद्राय
णं चरेत्। तथा॥ पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत्। वानप्रस्थो यतिश्चैव लभते चांद्रकं फलमिति। अत्र प
लाशो विहीपलाशो वा ध्य इति हेमाद्रिस्मृत्यर्थसारयोः॥ ॥ अथोच्छिष्टभक्षणे॥ अकामतस्त्वाह शंखः॥
ब्राह्मणोच्छिष्टाशने महाव्याहृतिभिरभिमंत्र्यापः पिबेत् स्त्रियोच्छिष्टाशने ब्राह्मी सैरप्केन त्र्यहं क्षीरेण
वर्त्तयेद्वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्राह्मीं सुवर्चलां पिबेत्। शूद्रोच्छिष्टभोजने षड्रात्रमभोजन
वर्त्तयेद्वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्राह्मीं सुवर्चलां पिबेत्। शूद्रोच्छिष्टाशने सप्तरात्रं पंचगव्यं पिबेद्वैश्योच्छिष्टाने पंचारा
मिति। कामतस्त्वाह बृहद्विष्णुः। ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पंचगव्यं पिबेद्वैश्योच्छिष्टाने पंचारा
त्रं राजन्योच्छिष्टाशने त्रिरात्रं ब्राह्मणोच्छिष्टाशने त्वेकाहमिति। सहभोजने त्वाह यमः। भुक्त्वा सह ब्रा
ह्मणेन प्राजपत्येन [redacted] शुध्यति। भूभुजा सह भुक्त्वान्नं तप्तकृच्छ्रेण शुध्यति। वैश्येन सह भुक्त्वान्न
मतिकृच्छ्रेण शुध्यति। शूद्रेण सह भुक्त्वान्नं चांद्रायणमथाचरेदिति। विज्ञानेश्वरस्त्वेतत्कामतोऽभ्यासविषय
उच्छिष्टभोजनमित्याह। वचनात्तत्प्रतीत्यभावादस्मद्गुरुः पंथाज्यायान्। उक्तं प्रायश्चित्तं पित्राद्यतिरिक्तस्य ६२
२२ न्।

ब्रह्मक्षत्रविशांविधिरिति। ६

ले। पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमित्यापस्तंबस्मृतेः। स्त्रीणामुच्छिष्टभोजने आपस्तंबः। उच्छिष्टमात्र
भोजने तु शूद्रोच्छिष्टभोजने सप्तरात्रमभोजनं स्त्रीणां चेति। सहभोजने त्वाह व्यासः। माता वा भगिनी वा
पि भार्या वान्या अपि योषितः। न ताभिः सह भोक्तव्यं भुक्त्वा चांद्रायणं चरेदिति। यत्तु गिरसोक्तं। ब्राह्मण्या
सह यो श्नीयादुच्छिष्टं वा कदाचन। न तत्र दोषं मन्यंते सर्व एव मनीषिण इति। तदपि द्विषयं विवाहविषयं वे
ति विज्ञानेश्वरः। द्विजानां शूद्रोच्छिष्टभक्षणे प्रायश्चित्तमाहापस्तंबः। अंत्यानां भुक्तशेषं तु भक्षयित्वा द्वि
जातयः। चांद्रं कृच्छ्रं तदर्द्धं च [redacted] वर्णयोरनुपूर्वश इति। सांतपनं महासांतपनमिति मिताक्षरायां। मार्जा
राद्युच्छिष्टाशने मनुः। बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटावपन्नं च पिबेद्ब्राह्मीं सुवर्चला
मिति। एतदकामतः कालानुपादानादेकरात्रविषये। कामतो विष्णुराह। पक्षिश्वाद्युपदजग्धस्य संस्कारस्या
न्नस्य भक्षणे। संस्काररहितस्यापि भोजने कृच्छ्रपादकमिति। संस्कारेण वैश्वदेवेन रहितस्य शून्यस्ये
ति भावः। पीतावशिष्टपानीयपाने तु शातातपः। पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित्। त्रिरात्रं तु
व्रतं कुर्याद्वामहस्तेन वा पुनरिति। पीतोच्छिष्टता भूमौ निहितपात्रे जायते न हस्तसंस्थापने। पानीयानि पिब
घेन तत्पात्रं द्विजसत्तमः। अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेदिति वचनात्। इदमतिपूर्वकपाने॥

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ल्ली॰ अकामतस्त्वर्धं प्रकल्पनीयं। अभ्यासे त्वाद्दगतान् तपः। पीतशेषं तु यत्किंचिद्भोजने मुखनिःसृतं। अभो
६२ ज्यं तद्द्विजस्याहुर्भुक्त्वा चांद्रायणं चरेदिति। प्रपाजलपाने लघुहारीतः। प्रपाजलं क्षीरघटस्यैव द्रोणीज
लं कोशविनिर्गतं च। पीत्वा वगाहेत जलं सवासा उपोषितः शुद्धिमवाप्नुते चेति। क्षीरघटो धर्मघटः। सेकपा
त्रविशेषो द्रोणी। कोशः खड्गादिकोशः। दीपोच्छिष्टे तु। दीपोच्छिष्टं तु यत्तैलं रात्रौ रथ्याहृतं च यत्। अभ्यंगाच्चै
व यच्छिष्टं भुक्त्वा नक्तेन शुध्यतीति षट्त्रिंशन्मतोक्तमवलोकनीयं॥ ॥ अथासत्प्रतिग्रहे॥ प्रतिग्रहस्या
सत्त्वं दातृजातिकर्मद्रव्यदेशकालकर्तृनिबंधनं ज्ञेयं। दातृजातिकर्मनिबंधनं च यथा चांडालादेः पतितेभ्या
द्रव्यनिबंधनं यथा मत्तशय्यामेष्यादेः। देशकालनिबंधनं यथा कुरुक्षेत्रोपरागादौ। कर्तृनिबंधनं यथा वि
द्यातपोहीनस्य। तत्रादौ दुष्टप्रतिग्रहकर्मविपाकाः पाद्मादिषु। महादानानि ये विप्रा गृह्णंति ज्ञानदुर्बलाः।
वृक्षास्ते द्विजरूपेण जायंते ब्रह्मराक्षसाः। तथा तत्रैव। ब्रह्मांडं भूमिदानं च गृहीत्वा येन केन तद्भवेत्। गृह्णन्दो
षमवाप्नोति ब्रह्महत्यां न संशय इति। भूमिदानं महादानांतर्गतं। कांचनं पृथ्वीदानं। स्कंदपुराणे। अजिनं मृत
शय्यां च मेषीं चोभयतोमुखीं। कुरुक्षेत्रे तु गृह्णानो न भूयः पुरुषो भवेत्। मनुः। हिरण्यं भूमिमश्वं गामन्नं वा ६२
सस्तिलाघृतं। अविद्वान्प्रतिगृह्णानो भस्मी भवति दारुवत्। अत्राविद्वानित्युक्त्या विदुषां तथा न दोष इत्य

त्रिप्राय। जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः। मासं गोष्ठे पयः पीत्वा मुच्यते ऽसत्प्रतिग्रहात्।
मासपर्यंतं प्रत्यहं त्रिसहस्रं जप इत्यर्थः। द्वितीयया त्रिसहस्रसंख्याकजपस्य प्रतिदिनव्यापित्वाव
गमात्। समाहितः स्थिरचित्तः। मात्स्ये। तस्मात्तीर्थे न गृह्णीयात्तीर्थे घाय तनेषु च। निमित्तेषु च सर्वेषु अप्र
मत्तो भवेद्द्विजः। पाद्मे। न तीर्थप्रतिगृह्णीयात्प्राणैः कंठगतैरपि। अपि कामातुरो जंतुरेकां रक्षत्तिमा
तरं। तीर्थप्रतिग्रहाद्यस्तु तीर्थविक्रय एव सः। विक्रीतायां तु गंगायां विक्रीतस्यां जनार्दनः। जनार्दनेतु
तरं। विक्रीते विक्रीतं भुवनत्रयं। यस्तु लोभाद्द्विजश्रेष्ठः प्रतिग्रहरुचिर्भवेत्। नैव तस्य परो लोको नायं लो
को दुरात्मन इति। ब्रह्मपुराणे। प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं। तत्र नारायणः स्वामी नान्यः स्वा
मी कदाचन। तत्र न प्रति [illegible] गृह्णीयात्प्राणैः कंठगतैरपि। स्कांदे। तीराद्गव्यूतिमात्रं तु परतः क्षेत्रमुच्य
ते। अत्र दानं जपो होमो गंगायां नात्र संशयः। तटयोः प्रत्येकं क्रोशद्वयात्मकगव्यूतिमात्रं गंगायां क्षेत्रमन्यच न
द्यादावनुक्तमेवेति। अत्रास्मन्मातुः प्रपितामहचरणाः। गर्भप्रतिग्रहनिषेधः प्रसिद्धनदीषु प्रसिद्धतरगंडक्या
दिषु तीरेपि गंगायां तु क्षेत्रेपीति शिष्टाचारात् प्राहुः। गव्यूतिः क्रोशयुगं। आदित्यपुराणे। भाद्रशुक्लचतुर्द
श्यां यावदाक्रमते जलं। तावद्गर्भं विजानीयात्तदूर्ध्वं तीरमुच्यते। शास्त्रे। सार्धहस्तशतं यावद्गर्भं तस्मात्तीर

प्रा॰मु॰ली॰ मुच्यते। हेमाद्रौ। ब्राह्मणः प्रतिगृह्णीयाद्वृत्यर्थं साधुतस्तु सः। अश्वं च मणिमातंगं तिल लोहानि वर्जये
त्। कृष्णाजिनं तिलश्याहीनं भयः पुरुषो भवेत्। शय्यालंकारवस्त्राणि प्रतिगृह्य मृतस्य च। नरकान्न
६३ निवर्त्तेत धेनुं तिलमयीं तथा। बह्वृचो। द्विजविप्ताना मपि स्तेयं तरिष्यति। आतुराद्य द्गृहीतं तु तत्कथं नि
स्तरिष्यति। आतुरो मुमूर्षुः। सूर्यारुणसंवादे। प्रतिग्रहेण विप्राणां ब्राह्मं तेजः प्रणश्यति। दुष्टप्रति
ग्रहे जाते विप्रो भवति किल्बिषी। आयुः स्वर्गो यशः सौख्यं हीयते सत्प्रतिग्रहात्। अतः प्रतिग्रहं कृत्वा प्रा
यश्चित्तं समाचरेत्। भिक्षान पि चरन् स्नानः पुण्यमंत्रमुदीरयेत्। प्रतिग्रहेषु सर्वेषु श्रमं त्वापरित्यजे
त्। दानार्थमिति शेषः। प्रतिग्रहे कुत्सितानां जपहोमादितत्परः। कुर्यात्त्रिषवणस्नायी त्रिभिः कृच्छ्रैर्वि
शोधनं। त्रिगुणं प्रजपेद्वेदं गायत्र्या वायुतत्रयं। जपहोमादिकं कृत्वा ज्ञात्वा कुर्यात्प्रतिग्रहं। नैष
ष्ठां त्वापरित्यज्य मुच्यते किल्बिषात्ततः। न भाषेत गृहीतारं महिषीरथवाजिनं। कृष्णाजिनस्य शय्यायाः
द्विमुख्या गोर्घटस्य च। गुडादिरश्रधेनूनामितरासो चलो भतः। प्रतिग्रहे चरेद्विप्रः प्राजापत्यमतं
द्रितः। जपेद्वा पौरुषं सूक्तमप्सु चैवाघमर्षणं। अहोरात्रं स्थितश्चैव मुच्यते किल्बिषात्ततः। अजां च म
हिषीं चैव वृषभे र्युक्तलांगलं। शाकटं प्रतिगृह्णानः पादोनं कृच्छ्रमाचरेत्। रुद्रान्पुरुषसूक्तं तु मंगला ६३

ध्यानमेव च। अंतर्जपेत्तु कृच्छ्रस्य मुच्यते किल्बिषात्ततः। गृहार्थं सुमहद्दानं दानं नैव गृहात्परं। येन दानेन द
त्तेन सर्वं दत्तं भवेन्नृणां। गृहोपकरणं सर्वं महिषी गो वृषादिकं। मुसलोलूखलौ चान्यय्यास्संसुप जादृष
त्। चुल्लीकुंभ्युदकुंभाश्च संमार्जन्यपमार्जको। स्नेत्रो मंथनो मंथा विविधोत्तर भांडिकां। शय्याश्च भाजनं च
त्रवितानानि रथो हलः। सर्वं प्रतिगृहीतं स्याद्गृहदानप्रतिग्रहात्। गृहप्रतिग्रहस्तस्माद्दुस्तरो हि द्विज
न्मनां। कृच्छ्रत्रयं चरेद्विप्रो महासांतपनं तथा। शतं च भोजयेद्विप्रान्लक्षं देव्या जपेत्तथा। प्रायश्चित्ते कृते त्वेवं
मुच्यते तत्प्रतिग्रहात्। अन्यथास्य प्रमीयंते युवानः पुत्रपौत्रकाः। म्रतश्च प्रेततां याति तस्मात्कुर्यात्सनि
ष्क्रियामिति। यतोश्वदानं सुमहत्तस्मात्तद्वर्जयेद्बुधः। यावंति तस्य रोमाणि तावत्स्वर्गे [redacted] श्वदो वसेत्।
तमेव प्रतिगृह्णानस्तावद्विनरकं वसेत्। अतः प्रतिग्रहे दोषस्तथा तद्विक्रयेपि च। अभिभिस्तु पुराणी ताग
थाश्वस्यापि विक्रये। यानि कानि च पापानि ब्रह्महत्यासमान्यपि। प्रायश्चित्तैर्विशुध्यंति हयविक्रयजं विना।
अश्वानां विक्रयं कृत्वा विप्रश्चांद्रायणं चरेत्। गायत्र्या वा जपेत्स्नात्वा त्रीन्लक्षान्सुसमाहितः। प्रतिग्रहे
चरेद्विप्र अतिकृच्छ्रं सचांद्रकं। त्रिगुणं वा जपेद्वेदं ब्राह्मणान्भोजयेच्छतं। आपदि त्वेवमुक्तं तु द्विगुणं स्यादे
नापदि। कन्याप्रतिग्रहः सर्ववर्णानां नातिदोषकृत्। कन्याप्रतिग्रहस्तस्माच्छाम्यते भूरिदानतः। सर्वे

Indira Gandhi National Centre for the Arts

प्रा०मु०ली० पितथावर्णैः कृत्वाकन्यापरिग्रहं। भक्ष्यन्नामान्नवसनभूरिदानपरैर्नरैः।भूरिदानंभवेत्कुर्यात्कन्यामा
६४ दायमानवः।ततः सैवपिशाचीस्यात्कृत्येवगृहमध्यगा। कपिलांप्रतिगृह्णीयाद्धोमार्थेचविशेषतः।
कपिलादर्शनेपुण्यंतथास्याः स्पर्शनेकृते। पुण्यंतद्दानहोमाभ्यां पुण्यंतस्याश्चपोषणे। प्रतिग्रहः कृ
तस्तस्याःपुण्यात्पुण्यतरःस्मृतः। परान्नविक्रयंकुर्यान्महादोषायतद्धनः। कपिलाविक्रयंकृत्वाचरे
च्चांद्रायणत्रयं।तथाश्वशायतांदत्वाचरेच्चांद्रायणद्वयं।कृष्णाजिनंप्रमीतस्यशय्यांवाकालपूरुषं।प्रतिगृ
ह्णन्कुरुक्षेत्रेनभूयःपुरुषोभवेत्।तथापिमनसःशुध्यैप्रायश्चित्तंसमाचरेत्।प्राजापत्यत्रयंकुर्यादैन्दवेन
चसंयुतं।सत्रेणवायजेताथगायत्रीलक्षसप्तकं।प्रजपेद्धोजयेद्विप्रान्शतंसाग्रमतंद्विजः।मनुः।हिरण्यंभू
मिमश्वंगामन्नंवासस्तिलान्घृतं।अविद्वान्प्रतिगृह्णानोभस्मीभवतिदारुवत्।प्रतिग्रहस्याप्रतिग्राह्यंभु
क्त्वाचान्नंविगर्हितं। जपंस्तरत्समंदीत्यंपुयतेमानवस्त्र्यहात्।धेनुर्याद्विमुखीयेचधान्यादिदशपर्वताः।
एषामन्यतमंगृह्णन्नभूयःपुरुषोभवेत्।एषांप्रतिग्रहेविप्रः क्षिपेन्मासचतुष्टयं।प्राजापत्येनकृच्छ्रेण
तत्पष्टांशं परित्यजेत्।भूमिंयःप्रतिगृह्णातियश्चभूमिंप्रयच्छति।तावुभौपुण्यकर्माणौनियतंस्वर्गगामि
नौ।प्रतिग्रहेनदोषःस्याद्दोषस्तस्यास्तुविक्रये।तथापिखलुयज्ञेनमुच्यतेनप्रतिग्रहात्।अन्यैरपहृ ६४

तांभूमिंयःसशक्तिरुपेक्षते।नरकेपच्यतेघोरेयुगानामेकविंशतिः।तस्माद्भूमिंचपत्नींचमातृगुर्वंग
नेतथा।परैरपहृतांदृष्ट्वासद्यःप्राणान्परित्यजेत्।एतेनमुच्यतेपापादन्यथानरकंव्रजेत्।तुलापुरुषमु
ख्यानिमहादानानिषोडश।एतेष्वन्यतमंगृह्यप्रायश्चित्तीभवेद्द्विजः।अन्यथानरकेयातिप्रेतत्वमनुग
च्छति।चतस्रश्चैवयागावोरत्नहेमविनिर्मिताः।गोसहस्रसमुद्भूतावैतरण्यैयाःस्मृताः।एतास्तु द्विज स्व४
वर्येणवर्जनीयाःप्रयत्नतः।यज्ञकर्मणियाधेनुर्याधेनुर्व्रतकर्मणि।प्रायश्चित्तनिमित्तायाहोमार्थयाचदुर्व
ला।मधुपर्केचयाधेनुर्याधेनुःकर्मसिद्धये।एताःसर्वाद्विजोविद्वान्प्रतिगृह्यतत्ततः।लिप्यतेनैवपापेन
पद्मपत्रमिवांभसा।गोसहस्रादितश्चैकांप्रतिगृह्णन्नकामतः।गोमूत्रयावकाहारोमासेनैकेनशुध्यति।
ऋक्सामवेदौनियतोजपेद्धाशिवसन्निधौ।एवंतत्पापतोमुच्येदन्यथानरकंव्रजेत्।वैतरणींप्रतिगृह्यलोह
२४ दंडंमहाभयं।वैतरण्यांनिमज्जेतयावदाभूतसंप्लवं।रक्तोदस्यमांसाब्धौवसेत्क ल्पत्रयंनरः।प्राजापत्य
त्रयंकुर्यादथवाशतभोजनं।जपेद्धास्यवामीयंशिवसंकल्पमेवच।रथंतरंवामदेव्यंमुच्यतेतेनकिल्बिषा
त्।हिरण्यकामधेन्वादिगृह्णानस्तुयथोदितं।महाभूतघटंदिव्यंप्रायश्चित्तमथोच्यते।यएतंप्रतिगृ
ह्णीयाद्धर्माभासोद्विजाधमः।वसेत्सनरकेघोरेविष्ठामूत्रसमाकुले।धर्माभासोद्विजस्तस्माच्चरेच्चां

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ द्रायणव्रतं। तप्तकृच्छ्रत्रयं चैकमतिकृच्छ्रं तथैव च। अथवा मुच्यते पापात्प्राणायामपरायणः। प्राणा
६५ यामो दहेत्सर्वं यच्छरीरेस्ति किल्बिषं। पावकाद्ववदीप्यंते जपहोमैर्द्विजोत्तमाः। प्रतिग्रहेण नश्यंति पा
वकाद्ववारिणा। प्रतिगृह्य ततो विप्रः प्राणायामशतं चरेत्। प्राणायामेन शुध्यंति गायत्र्या जपनेन च। दश
लक्षैस्तु गायत्र्याः सहस्रं प्राणसंयमैः। नश्यंते पापसंघाताः का कथा दुःप्रतिग्रहे। प्रतिगृह्य न कुर्या
च्चेत्प्रायश्चित्तं यथोदितं। नरकान्निःसृतः कालात्प्रेतो वा ब्रह्मराक्षसः। अंते जलचरो हस्ती मानुषीं ज
लम्य स्थितः। तस्माद्धि निर्गतः पश्चाद्दुःकुले श्वपदो भवेत्। ततो मानुषमासाद्य दरिद्रो दुःखितः स
दा। आधितश्चैव मूर्खश्च बंधुभिः परिवर्जितः। यतः प्रतिग्रहधनं स्कस्थि रंस्यात्कदाचन। तस्माद्धी
रतरो राजान्महादानप्रतिग्रहात्। सीदन्नपि नरः पूर्वं न कुर्याद्धैकदाचन। कृपणः परिगृह्याथ तद्ध
नं सद्गतिं नयेत्। यजेद्धा समरोख्यासु सुपुण्यायतनानि वा। शिवस्य विष्णोर्मठं वा अगारान्वा निवेशये रथ६
त्। वापीकूपतडागेषु ब्रह्मस्थानेषु मुक्तये। एतेषु विसृजेच्छुल्कमन्यथा नरकं व्रजेत्। प्रायश्चित्तं यथोक्तं
तु ब्राह्मणस्य प्रतिग्रहे। क्षत्रस्य वर्णयोस्तच्चरद्वित्रिचतुर्गुणं। क्षत्रस्य प्रतिग्रहे द्विगुणं। इतरयोः क्र ६५
मेण त्रिचतुर्गुणं। पादुकोपानहौ छत्रं विद्याचामरवाससी। अप्यनुक्तेप्यदः प्रोक्तं प्रायश्चित्तमभो

जनं। गृह्णतः कृष्णवद्दानं पूर्वोदितमकुर्वतः। विधिं सर्वमत्रोषेण नरकोल्लंघनं नहि। प्रतिगृहीत
रिसद्दायो विधिः स्याद्द्विजन्मनि। अपि सर्वमधीयानेतं शृणुष्व मयेरितं। नाभिभाषेत तं दृष्ट्वा न मु
खं चावलोकयेत्। मुखावलोकने तस्य प्रायश्चित्तीयते जनः। इहैव सक्षणार्द्धेन दिवाकीर्तिसमो
भवेत्। मनुः। जपहोमैरपैत्येनो याजनाध्यापनैः कृतं। प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च। च
तुर्विंशतिमते। कृष्णाजिनं मृतं शय्या दासी गृहगजास्तथा। लवणं द्विमुखी धेनुर्घोराः सप्त प्रति
ग्रहाः। यमस्मृतौ। कर्मणागर्हितेनैव यद्द्विजैः समुपार्जितं। द्रव्यं त्यागेन शुध्यंति धर्मस्यान्वेषणेन वा।
अपकृष्यते न द्रव्यमन्यायेन यदागतं। प्रतिग्रहात्तु शिष्याय देयं वा ब्रह्मचारिणे। चतुर्विंशतिमते। प
वित्रेष्ट्या विशुध्यंति सर्वे घोराः प्रतिग्रहाः। ऐंदवेन मृगारेष्ट्या कदाचिन्मित्रविंदया। द्वयालक्षजपेने
व शुध्यते ऽसत्प्रतिग्रहादिति। हारीतः। मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेदिति। चांडालां
त्यजप्रतिग्रहे मनुयमावाहतुः। चंडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञा
नात्साम्यं तु गच्छति। म्लेच्छप्रतिग्रहेप्येवमूह्यं। म्लेच्छलक्षणमाह रायमुकुटः। गोमांसभक्षको यस्तु अ
पशब्दं च भाषते। सदाचारविहीनश्च म्लेच्छ इत्यभिधीयते। अनयैव दिशानुक्तेष्वपि दानप्रतिग्रहेषु
कामकृताकामकृताभ्यासाभ्यासादिभेदेन लघुगुरुप्रायश्चित्तं कल्पनीयं॥ ॥अथ बलात्कारको

Indira Gandhi National
Centre for the Arts

रितिम्लेच्छदासे। देवलः। दासीकृतोबलान्म्लेच्छैश्चांडालाद्यैश्चदस्युभिः। अशुभंकारितंकर्मगवादि
प्राणिहिंसनं। उच्छिष्टमार्जनंचैवतथातस्यैवभक्षणं। तत्स्त्रीणांचतथासंगस्ताभिश्चसहभोजनं।
मासोषितेद्विजातौतुप्राजापत्यंविशोधनं। चांद्रायणंचाहिताग्नेःपराकस्त्वथवाभवेत्। चांद्रायण
पराकंवाचरेत्संवत्सरोषितः। संवत्सरोषितःशूद्रोमासार्द्धंयावकंपिबेत्। मासंविप्रोषितःशूद्रःकृ
च्छ्रपादेनशुध्यति। ऊर्ध्वंसंवत्सरात्कल्प्यंप्रायश्चित्तंद्विजोत्तमैः। संवत्सरैश्चतुर्भिश्चतद्भावंसोधिग
च्छति। ह्रासोनविद्यतेतस्यप्रायश्चित्तेदुरात्मनः। नृदिह म्लेच्छाद्यैरनाहिताग्निविप्रउच्छिष्टमार्जनोच्छि
ष्टभक्षणमांसभक्षणम्लेच्छस्त्रीसंगताभिःसहभोजनादिकुत्सितकर्मबलान्मासैककारितस्तदाते
नप्राजापत्यंसाग्निनातुचांद्रायणंक्षत्रियवैश्याभ्यांपराकव्रतंशूद्रेणकृच्छ्रपादव्रतंकार्यं। अनग्निना
ब्राह्मणेनवत्सरैकदास्यकरणेचांद्रायणंकार्यं। क्षत्रियवैश्याभ्यांपराकःकार्यः। शूद्रेणमासार्द्धंया
वकाशनंकार्यं। संवत्सरादूर्ध्वंसंवत्सरचतुष्टयंयावत्प्रायश्चित्तमूह्यं। तदूर्ध्वंतत्साम्येनपतितत्वात्प्रा
यश्चित्ताभावइति॥ ॥अथजातिदुष्टसंधिन्यादिक्षीरपाने। तत्रकामतःसकृत्पाने। अनिर्दशाया
गोःक्षीरमौष्ट्रमेकशफंतथा। आविकंसंधिनीक्षीरंविवत्सायाश्चगोःपयः। आरण्यानांचसर्वेषां ६६
मृगाणांमहिषींविना। स्त्रीक्षीरंचैववर्ज्यानिसर्वशुक्तानिचैवहि। अत्रत्र्यहमुपवसेदहइतिमनू

---

क्तउपवासःप्रायश्चित्तं। कामतस्तत्पानेयोगीश्वरोक्तस्त्रिरात्रोपवासःप्रायश्चित्तं। कामतोभ्यासे
श्२ शंखः। क्षीराणियान्यभक्ष्याणितद्विकाराशनेबुधः। सप्तरात्रंव्रतंकुर्यात्प्रयत्नेनसमाहितइति। यत्र
तुक्षत्रियश्चापिवृत्तस्थोवैश्यःशूद्रोथवापुनः। यःपिबेत्कपिलाक्षीरंनततोन्यस्त्वपुण्यकृदित्यादौवा
चनिकंप्रायश्चित्तंनलभ्यतेतत्रसाधारणंमनूक्तंद्रष्टव्यं। ब्राह्मणस्यापिकपिलाक्षीरमभक्ष्यमपेय
मित्युक्तंश्राद्धहेमाद्रौभविष्ये। कापिलंयःपिबेच्छूद्रोनरकेसविपच्यते। हुतशेषंपिबद्विप्रोविप्रःस्या
दन्यथापशुरिति। आपस्तंबः। भक्षयेद्यदिनालीलुप्रमादाद्ब्राह्मणःक्वचित्। चांद्रायणेनशुद्धिःस्या
दापस्तंबोब्रवीन्मुनिः। यमः। नालिकान्नालिकेलीचश्लेष्मातकफलानिचेति। षड्त्रिंशन्मते।
च४ घ्राणपुष्पंशाल्मलंकरनिर्मथितंदधि। बहिर्वेदिपुरोडाशंजग्ध्वानाद्यादहर्निशामिति॥ ॥अथ
स्वभावदुष्टमांसादिभक्षणेमनुः। क्रव्यादसूकरोष्ट्राणांकुक्कुटानांचभक्षणे। नरकाकखराश्वा च४
नांतप्तकृच्छ्रंविशोधनं। श्वादिमांसाशनेयोगी। चाषांश्चरक्तपादांश्चसौनंवल्लूरमेवच। मत्स्यां
२ स्म श्चकामतोजग्ध्वासोपवासस्त्र्यहंवसेत्। कामतोभ्यासेतुजग्ध्वामांसमभक्ष्यंतुसप्तरात्रंयवान्पिबेदि
तिमनूक्तंबोध्यं। अंगिराः। बलकानारसग्ध्वाखुरखराश्चनरस्तुकरान्। दृष्ट्वाचैषाममेध्यानि

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ स्पृष्ट्वाचम्य विशुध्यति। दृष्ट्वैषाममेध्यानि भक्षयित्वा द्विजातयः। कुर्युः सांतपनं कृच्छ्रं प्राजापत्यम
निच्छया। यमः। नरमांसं श्वमांसं च गोमांसं चाश्वमेव च। भुक्त्वा पंचनखादीनां महासांतपनं चरेत्। अ
६७ त्र विस्तरो मिताक्षरायां द्रष्टव्यः। इदं च प्रायश्चित्तमौषधार्थं भक्षणे बोध्यं। ब्राह्मणस्य मांसभक्षण
प्रसक्त्यभावात्। तथा च मनुः। यक्षरक्षःपिशाचानां मद्यं मांसं सुरासवं। तद्ब्राह्मणेन नात्तव्यं देवाना
मश्नता हविरिति॥ ॥अथ भावदुष्टभक्षणे। भावदुष्टत्वं नाम विलक्षणमनोग्लानिजनकत्वं। प
राशरः। वाग्दुष्टं भावदुष्टं च भोजने भावदूषितं। भुक्त्वान्नं ब्राह्मणः पश्चात्त्रिरात्रेण विशुध्यतीति। ए
तच्च कामकारिविषयं। त्रिरात्रोपवासविधानात्। अकामविषये गोतमः आह। प्राक्पंचनखेभ्य
श्छर्दनं घृतप्राशनं चेति॥ ॥अथ जातिभ्रंशकरप्रायश्चित्तं॥ मनुः। जातिभ्रंशकरं कर्म कृत्वान्य
तममिच्छया। चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया। संकरापात्रकृत्यासु मासः शोधनमैंदवः। मलि
नीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहमिति। अन्यतममिति सर्वत्रान्वेतीति विज्ञानेश्वरः। यमोपि। संकरी
करणं कृत्वा मासमश्नीत यावकं। कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं समाचरेत्। अपात्रीकरणं कृत्वा तप्तकृच्छ्रे ६७
णशुध्यति। शीतकृच्छ्रेण वा शुद्धिर्महासांतपनेन वा। मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनमिति। बृहस्पतिरपि।

जातिभ्रंशकरे विशेषमाह। ब्राह्मणस्य रुजः कृत्वा रासभादिप्रमापणं। निंदितेभ्यो धनादानं कृच्छ्रा
र्द्धं व्रतमाचरेत्। एतेषां पक्षाणां जातिशक्त्याद्यपेक्षया विनियोगः॥ ॥अथ प्रकीर्णकप्रायश्चि
त्तान्युच्यंते। योगी। प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः। नग्नः स्नात्वा च भुक्त्वा च गत्वा
चैव दिवा स्त्रियं। इदं च कामकारविषयं। उष्ट्रयानं समारुह्य खरयानं च कामतः। सवासा जलमा
प्लुत्य प्राणायामेन शुध्यतीति मानववाक्यैकवाक्यत्वात्। अकामनः स्नानमात्रं बोध्यं। खरयुक्त
यानं। उष्ट्रयुक्तं यानमिति मध्यमपदलोपी समासः। साक्षात्खरोष्ट्राद्यारोहणे तु यमः। खरया
नमुष्ट्रयानं वाप्यधिरोहेद्द्विजोत्तमः। आपो वा प्रविशेन्नग्नस्त्रिरात्रं क्षपणं स्मृतमिति। नन्वत्रा
समास ५ पि स एवास्तु इति नाशंक नीयं प्रायश्चित्तस्य गुरुत्वात्। दिवामैथुनादौ प्रायश्चित्तांतरमाह शंखः।
दिवा तु मैथुनं कृत्वा नग्नः स्नात्वा तथांभसि। नग्नां परस्त्रियं दृष्ट्वा दिनमेकमभोजनमिति। इद
मभ्यासे ज्ञेयं। तथा। अनडुहं समारुह्य प्राजापत्यं त्रयं चरेत्। अज्ञानात्तु तदर्द्धं स्यात्पुनः सं
स्कार एव चेति। गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः। बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसे
द्दिनं। गुरुं जनकं त्वंकारो नाम त्वमेवं मा वादीस्त्वयेत्थं ना स्थितमित्येकवचनप्रयोगेण निर्भ

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ त्सनं। यत्तु यमस्त्वाह। पादेन ब्राह्मणं जित्वा प्रायश्चित्तविधित्सया। त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेदिति तदभ्यासविषयं। बृहस्पतिः। काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत्। अस्थिभेदेतिकृच्छ्रः स्यात् पराकस्त्वङ्गकर्तन इति। पादाघाते यमः। पादेन ब्राह्मणं स्पृष्ट्वा प्रायश्चित्तविधित्सया। दिवसोपोषितः स्नात्वा प्रणिपत्य प्रसादयेदिति। एकपंक्त्युपविष्टानां स्नेहेन वैषम्येण दाने यमः। न पंक्त्यां विषमं दद्यान्न याचेन न दापयेत्। प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः॥ ॥अथ ऋतावगमनप्रायश्चित्तं॥ तत्रादौ दोषमाह पराशरः। ऋतुस्नाता तु या नारी भर्तारं यो न सर्पति। सा मृता नरकं याति विधवा च पुनः पुनः। ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति। सन्निधावपि स्वास्थ्ये सति दोष इत्यथा नित्याह देवलः। यस्तु दारानृतुस्नातान्स्वस्थः सन्नोपगच्छति। भ्रूणहत्यामवाप्नोति प्रजां प्राप्तां विनाशयन्निति। अत्र प्रायश्चित्तमाह बौधायनः। ऋतौ न गच्छेद्यो भार्यां नियतां धर्मचारिणीं। नियमातिक्रमे तस्य प्राणायामशतं स्मृतमिति। कृच्छ्रार्द्धमित्याप ६८ पः। प्राणायामशतद्वयस्य कृच्छ्रप्रत्याम्नायेन निर्दिष्टत्वात्प्राणायामस्य न दर्द्धत्वं। ह्रस्व ज्ञातं

नित्स्यस्पष्टमाह। ऋतौ न गच्छेद्यो भार्यां सोपि कृच्छ्रार्द्धमाचरेदिति। इदमेव प्रायश्चित्तमृतुमत्या भर्तुरनुसर्पणे ज्ञेयं। आहूताया तु वै भर्त्ता नोपयाति त्वरान्विता। साध्वी सा जायते पुत्रि दग्रावर्षाणि पंच वेति नारदीये तस्या अपि दोषश्रवणात्॥ ॥अथ भर्तुरवमाने॥ ब्रह्मांडे। कामाद्दोषान्मत्सराद्वा भर्त्तारं यावमन्यते। सा सप्तजन्म कंथा वन्नारकी स्यान्न संशय इति। दरिद्रं व्याधितं धूर्त्तं भर्त्तारं यावमन्यते। सा शुनी जायते मृता शूकरी च पुनः पुनरिति। प्रायश्चित्तमाहापस्तंबः। भर्तुर्व्यतिक्रमे कृच्छ्रमिति। अथ भर्त्राज्ञामंतरेण व्रतादिकरणे। मनुः। अपृष्ट्वा चैव भर्त्तारं या नारी कुरुते व्रतं। तत्सर्वं राक्षसान्गच्छेदित्येवं मनुरब्रवीत्। एतादृशा एनसि पतिं प्रसाद्य तदुक्तं प्रायश्चित्तं चरेत्। तदाह योगीश्वरः। प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुध्यतीति। स्मृत्यंतरेपि। अथवा यद्गुरुर्ब्रूयात्तत्कार्यमविशंकया। निग्रहेनुग्रहे वापि गुरुः सर्वत्र कारणमिति॥ ॥अथ गर्भपातने॥ गर्भपातं तु या कुर्यान्न तां संभाषयेत्क्वचित्। यत्पापं ब्रह्महत्यायां द्विगुणं गर्भपातने। प्रायश्चित्तं न तस्याः स्यात्तस्यास्त्यागो विधीयत इति। जारजन्यगर्भपाते च नुर्विप्रानितिमतं। जारगर्भे विशेषः स्याद्यथोक्तमृषिभिः पुरा। ब्रह्मगर्भवधे कृच्छ्रमब्दं सांतपना येत३

प्रा०मु०त्री० धिकं।क्षत्रगर्भवधेचैवचरेच्चांद्रायणद्वयं।वैश्यस्यचैवंद्वंप्रोक्तंपराकःशूद्रघातने।प्रायश्चि
६९ त्तमिदंप्रोक्तंगर्भपातेविशेषतइति।अब्दकृच्छ्रेत्रिंशत्प्राजापत्याभवंति।ब्राह्मणस्यनीली
वस्त्रधारणे।आपस्तंबः।नीलीरक्तंयदावस्त्रंब्राह्मणोंगेषुधारयेत्।अहोरात्रोषितोभूत्वा
पंचगव्येनशुध्यति।स्मृत्यं।स्त्रीधृतासुशयनेनीलीब्राह्मणस्यनदुष्यति।नृपस्यहृद्धोवैश्यस्य
पर्ववर्जंविधारणमिति।वस्त्रविशेषेसर्वेषांप्रतिप्रसवमाह।सएव।कंबलेपट्टसूत्रेचनीली
रागोनदुष्यतीति।शंखः।अध्यास्यशयनंयानमासनंपादुकेतथा।द्विजःपालाशवृक्षस्यत्रिरात्रं
तुव्रतीभवेदिति।मिथ्याब्राह्मणादिवधशपथकरणेमदनरत्नेयमआह।विप्रस्यवधसंयुक्तं
कृत्वातुशपथंमृषा।ब्रह्महायावकान्नेनअर्धंचांद्रायणंचरेत्।क्षत्रियस्यपराकंतुप्राजाप
त्यंचरेद्द्विजः।वृषलस्यत्रिरात्रंतुव्रतंशूद्रहणश्चरेत्।अनापदिगृहस्थस्यसिद्धान्नभिक्षाक
रणेअंगिराः।अनापदिचरेद्यस्तुसिद्धांभिक्षांगृहेवसन्।दशरात्रंपिबेद्गव्यमापत्कालेत्र्यहं
द्विजः।वस्त्रक्षीरादिदानादिसंकल्पोत्तरमकरणेपराशरः।दानंपुण्यमकृत्वावाप्रायश्चित्तंदि ६९
नत्रयं।अभोजनमितिशेषः।उपस्पृशेत्त्रिषवणंमहानद्युपसंगमे।चीर्त्वांतेचैवगांदद्याद्ब्रा

ह्मणान्भोजयेद्दशइति।अकृत्वेत्यस्यपूर्वसंकल्प्येत्यध्याहार्यं।अत्रदानाद्युपलक्षणं।तेनतीर्थया तस्य६१
त्रादिसंग्रहः।गृहीतस्यव्रतस्यत्यागे।वायुपुराणे।लोभान्मोहात्प्रमादाद्वाव्रतभंगोयदाभवेत्।उपवासत्र
यंकुर्यात्कुर्याद्वाकेशमुंडनं।प्रायश्चित्तमिदंकृत्वापुनरेवव्रतीभवेदिति।वाशब्दःसमुच्चयइति
गुरवः।स्तेनपतितादिपंक्तिभोजनआहमार्कंडेयः।अपांक्तेयस्ययःकश्चित्पंक्तौभुंक्तेद्विजोत्तमः।
अहोरात्रोषितोभुक्त्वापंचगव्येनशुध्यतीति।इंद्रचापदर्शनादौऋष्यशृंगः।इंद्रचापंपलाशा
ग्निंयद्यन्यस्यप्रदर्शयेत्।प्रायश्चित्तमहोरात्रंधनुर्दंडश्चदक्षिणा।शंखः।दुःस्वप्नारिष्टदर्श
नादौघृतंहिरण्यंचदद्यादिति।वह्नौपादप्रतापनेशंखः।पादप्रतापनंकृत्वाकृत्वावह्निमधस्त
था।कुशैःप्रमृज्यपादौतुदिनमेकंव्रतीभवेदिति।दंपत्यादिमध्यगमनेअंगिराः।दंपत्योर्विप्रयो
र्मध्येविप्राग्न्योर्गोद्विजातिषु।अंतरंयदिगच्छेत्तुविप्रश्चांद्रायणंचरेदिति।देशविशेषगमने
देवलआह।सिंधुसौवीरसौराष्ट्रांस्तथाप्रत्यंतवासिनः।अंगवंगकलिंगांध्रान्गत्वासंस्कार
मर्हति।एतच्चतीर्थयात्रातिरेकेगमनेद्रष्टव्यं।अंगवंगकलिंगाश्चसौराष्ट्रंमागधानपि।तीर्थ
यात्रांविनागत्वापुनःसंस्कारमर्हतीतितेनैवोक्तत्वात्।सएव।कर्मनाशाजलस्पर्शात्कर

→ धनुषोदंडस्यक्रमेणादानंज्ञातव्यं।इंद्रःपलाशस्य।—

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० तोयाविलंघनात्। गंडकीबाकृतरणात्पुनः संस्कारमर्हति। गौडग्रंथेतु करतोयाजलस्पर्शात्कर्म
७० नाशाविलंघना॰ दिति पाठः। प्रसंगादन्यान्यपि पुनः संस्कारनिमित्तानि प्रदर्श्यंते। पराशरः। अ
ज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च। पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः। विष्णुः। विड्व
राहग्रामकुक्कुटगोमांसभक्षणेषु सर्वेषु प्रायश्चित्तांते पुनः संस्कारं कुर्यात्। शातातपः। लशुनं
गृंजनं ज    ग्ध्वा पलांडुं च तथा पुनः। उष्ट्रमानुषकेभाश्वा रासभी क्षीरभोजनात्। उपायनं ततः कु
र्यात् तप्तकृच्छ्रं चरेन्मुहुरिति। यमः। चंडालान्नं द्विजो भुक्त्वा सम्यक् चांद्रायणं चरेत्। बुद्धिपूर्वं तु
कृच्छ्राब्दं पुनः संस्कारमर्हति। शंखः। अनडुहं समारुह्य प्राजापत्यत्रयं चरेत्। अज्ञानात्तु तदर्द्धं
स्यात्पुनः संस्कार एव च। हेमाद्रौ पाद्मे। अतिदुष्टाप्रेतग्राम्यानद्याघासाद्द्विजोत्तमैः। गृहीतायां तु
तस्यां तु पुनः संस्कार एव च। देवलः। न ब्रह्मचारी कुर्वीत शावदाहादिकाः क्रियाः। यदि कुर्याच्चरे
त्कृच्छ्रं पुनः संस्कार एव चेति। इत्यादिग्रंथांतरतोवगंतव्यानि। पुनः संस्कारः पुनरुपनयनं। के
शवः। चीर्णांते प्राच्यामुदीच्यां वा दिशि गत्वा ग्रामपशूनां यो न श्रूयते यस्मिन् देशे ऽग्निं प्रज्वा
ल्य ब्रह्मासनमास्तीर्य प्राक्प्रणीतेन विधिना पुनः संस्कारमर्हतीति॥ ॥अथ बह्वृचानां पुन ७०

रुपनयनप्रयोगः॥ विष्ट्यादिरहितकाले पूर्वाह्णे प्राच्यामुदीच्यां वा दिशि ग्रामं गत्वा यत्र ग्राम्यपशुशब्दो
न श्रूयते तस्मिन्देशे कर्ता प्राङ्मुखो मम अमुकनिषिद्धदेशगमनसंचितैनोनिबर्हणार्थं पुनरुपनय
नं करिष्य इति संकल्प्य गणेशार्चनमाचार्यवरणांतं विदध्यात्। तत आचार्योऽस्य पुनरुपनयनं कर्तुं
स्थंडिलादि करिष्य इति संकल्प्य ततोऽग्निप्रतिष्ठां ततोऽत्र देवतापरिग्रहार्थं मन्वाधानं करिष्ये।
अस्मिन्नन्वाहितेऽग्नावित्याद्याज्यभागवर्जं मुक्त्वाऽप्रधानं त्रिरग्निं पवमानं प्रजापतिं चाज्येन शेषेणत्या
द्याज्यसंस्कारांतं कुर्यात्। ततः पश्चादग्नेः कुशनिर्मितासने उपविष्टस्य संस्कार्यस्य समंत्रं वासः परिधाप्या
परं प्रावारयेत्। नास्मिन् कर्मण्यजिनं। ततः समंत्रं यज्ञोपवीतं धारयित्वा संस्कार्यं तीर्थप्रवेशे नोत्तर
भागं गमयित्वा तत्र विधिवदाचमय्य पुनः स्वस्थानं नीत्वा बर्हिरास्तरणाद्याज्यभागवर्जं न आयूंषीति
तिसृभिः प्रजापते न त्वदेतान्यन्य इत्यनया च प्रधानहोमं कृत्वोत्तरभागे उपनयनवदक्षारणं कृत्वा
हित्यमीक्षयेत्। कस्य ब्रह्मचार्यसीति तु न भवति मेधाजननं चानिरुक्तं परिदानं कालश्चेत्याश्वलाय
नोक्तेः। युवा सुवासा इत्यर्द्धेन संस्कार्यं प्रदक्षिणमावर्त्योत्तरेण तस्यांसयोः पाणी गमयित्वे दक्षिण
भागं निनयेत्। ततः संस्कार्योऽग्निकार्यमुपनयनवत्कुर्यात्। ततोऽग्नेरुत्तरतः प्रत्यङ्मुखस्त्र्याचार्यपा
दावुपसंगृह्य अधीहि भोः सावित्रीं भो अनुब्रूहीति वदेत्। आचार्यस्तत्सवितुरित्यस्य श्यावाश्वः सविता

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० नुष्टुप्। पुनरुपनयने विनियोगः। प्रथमं स्वयं पादशः उत्तरां वाचयेत्। ततोऽर्द्धर्चशस्ततः सर्वमिनंतरं ममव्रत
७१ इत्यनेन संस्कार्यहृदये ऊर्ध्वांगुलिपाणिं निधाय स्विष्टकृदादि होमशेषसमाप्तिं कुर्यात्। संस्कार्यो आचा
र्याय गां निष्क्रयं दत्वा त्र्यवरान्ब्राह्मणान्भोजयेत्। नात्र मेखलादंडभिक्षाः। अजिनं मेखलादंडो भैक्षच
र्याव्रतानि च। निवर्त्तंते द्विजातीनां पुनः संस्कारकर्मणीति पराशरवाक्यात्। शौनकः। योवेदांतरमध्येतु
तस्सूत्रविधिनाततः। कृतोपनयनोधीत्य तं वेदं सकलं द्विजः। द्वितीयमिमम्ऋग्वेदमध्येतुमभिवांछया।
एतद्ग्रंथोक्तविधिना पुनरप्युपनीयते। केशानां वपनं तस्य न क्रियेत क्रियेत वा। मेधाजननकर्मापि विद्व
यं च कृताकृत। कर्त्तव्यपक्षाश्रयणे मेधाजननकर्मणः। अक्षोदनस्य होमस्य त्रिरात्रादिव्रतं तथा। कस्य
ब्रह्मादिमंत्रेण परिदानं च नेष्यते। तत्रोदगयनादिश्च कालोनापेक्ष्य तेत्र तु। ततस्त्विलुर्हणी मह्येवमिमि
त्येवमादिका। ऋक्सा चित्रीपरिग्राह्या यद्यदन्यत्समीरितं। अन्योपनयने तत्तदलंकारविवर्जितं। इहा
पि सर्वं कुर्वीत उपनीतः पुनर्भवेदिति। अत्र स्वस्तिवाचनादिकं न कार्यं। प्रायश्चित्तार्थेन तस्य विधानात्। ले ७१
हस्यैश्च प्रायश्चित्तांतरे नांदीश्राद्धाद्यभाव इति दिक्॥ ॥इति भारद्वाज दिवाकर विरचितायां प्रायश्चि
त्तमुक्तावल्यां पुनरुपनयनप्रयोगः॥ ॥अथ श्रौतस्मार्त्तकर्मलोप प्रायश्चित्तं। मनुः। वेदोदितानां
नित्यानां कर्मणां समतिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति। प्रजापतिः। दर्शं च पौर्ण

मासं च तु स्यात्पशुभयमेव च। एकस्मिन्कृच्छ्रपादेन द्वयोरर्द्धेन शोधनं। हविर्यज्ञेषु शक्तस्य तु समभ्ये
क्रमादितः। प्राजापत्येन शुध्येत पाकसंस्थासु चैव हि। संध्यावंदनहीनो तु नित्यस्नानं विलोप्य च होमं
मं चैव नैत्यकं शुध्येद्गायत्र्यष्टसहस्रकृत्। समांते सोमयज्ञानां हानौ चाग्रयणं चरेत्। अकृत्वान्यतमयज्ञं
यज्ञानामधिकारतः। उपवासेन शुध्येत पाकसंस्थासु चैव हीति। क्रतुः। एते ॰नाचरणे मेकैकस्यव्य याना४
तिक्रमे। गायत्र्यष्टशतं जप्यं कृत्वा पूतो भवेन्नर इति। स्मृत्यंतरे। विनायज्ञोपवीतेन यस्तूच्छिष्टो भवेद्द्वि
जः। प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं तु वा। मरीचिरपि। ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुतेथवा।
गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति। अकामतस्त्विदं स्मृत्यंतरे। पिबतो मेहतश्चैव भुंजानोनुप
वीतिनः। प्राणायामत्रिकं षट्कं नक्तं च त्रितयं क्रमात्। उपवीतं विना पाने त्रयः। मेहने षट्। भोजने न
क्तमिति भावः। मदरत्ने अंगिराः। कृते मूत्रे पुरीषे वाप्यदाने वोदकं भवेत्। स्नात्वाच्छेद्योदकं पश्चात्स
चैलस्तु विशुध्यति। शातातपोपि। अनुदकमूत्रपुरीषकरणे सचैलस्नानं महाव्याहृतिहोमश्च। तदिदं व ष३
चनद्वयमकामतः। कामतोथ मत्राह। आपद्गतो विनातोयं शारीरं योनिषेचते। एकाहं क्षपणं कृत्वा
सचैलं स्नानमाचरेत्। जलेमूत्रादिकरणे मनुः। विनाद्भिरप्सु वाप्यर्तः शारीरं संनिषेव्य तु। सचैलो

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ बहिरागत्य गामालभ्य विशुध्यतीति। नारी रजस्त्रपुरीषे। जलाग्न्योरशुचिद्रव्यनिक्षेपे स एव। क्षिप्त्वा
७२ ग्नावशुचिद्रव्यं लद्धो भवति मानवः। मासमेकं व्रतं कुर्यादुपकृष्यतथा गुरुः। भोजनोत्तरमंतिमाचमनवि
मनाकरणे स्मृत्यंतरे मितास्नरायां। यद्युच्छिष्टत्यनाचांतो भुक्तवानासनात्ततः। सद्यः स्नानं प्रकुर्वीत सो
न्यथाप्रयतो भवेत्। अस्नात भोजने हारीतः। वहन्कमंडलुं रिक्तमस्नातोऽश्नाति भोजनं। अहोरात्रेण शुद्धिः
स्याद्दिनजप्येन चैव हि। चकारेणोपवासदिनजपयोः समुच्चयः। संध्याकालातिक्रमे जमदग्निः। संध्याका
लेत्वतिक्रांते स्नात्वाचम्य यथाविधि। जपेदष्टशतं देवीं ततः संध्यां समाचरेदिति। इदं च मतिपूर्वाति
६७ क्रमे। अमतिपूर्वे त्वौगोलमः। संध्याकालेत्वतिक्रांते त्रिसंध्यमपि सर्वदा। चतुर्थार्घ्यं प्रकुर्वीत शिखा
व्याहृतिसंपुटमिति। पंचयज्ञाकरणे बृहस्पतिः। अनिवर्त्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही। अनातु
रः सति धने कृच्छ्रार्द्धेन विशुध्यति। आहिताग्निरुपस्थानं न कुर्याद्यस्तु पर्वणि। ऋतौ न गच्छेद्भार्यां
वा सोपि कृच्छ्रार्द्धमाचरेदिति। देवलः। मृतां द्वितीयां यो भार्यां दहेत्‌ वैतानिकाग्निभिः। जीवंत्यां प्र
थमायां तु सुरापानसमं हि तदिति। स्वपत्न्यभिगमने वर्णभेदेनाह यमः। स्वभार्यां तु यदा कामाद्ग ७२
च्छेन्नित्यं नरो वदेत्। प्राजापत्यं चरेद्विप्रः क्षत्रियो दिवसान्नव। षड्रात्रं तु चरेद्वैश्यस्त्रिरात्रं शूद्रस्त्वा

चरेदिति। पराशरमते प्रायश्चित्तांते गोदानं द्विजविप्रभोजनमधिकं प्रोक्तं। मातृदुहितृवदगम्येति कथनो
त्तरं पुनः संगमने छायामिदं प्रायश्चित्तं नान्यथेति बोध्यं। अदुष्टदारत्यागे शातातपश्चाह। कौमारदारत्या
गी मासं पयोभक्षणाच्छुध्यतीति। देवपूजाविच्छेदे तु पद्मार्थादर्शे स्मृत्यंतरे। एकाहपूजाविहितो कुर्याद्विगु
णमर्चनं। द्विरात्रे तु महापूजां संप्रोक्षणमतः परं। मासाद्‌र्ध्वमनेकाहं पूजायादि विहन्यते। प्रति ष्ठे वैष्ण
ते केश्चित्केषांचित्प्रोक्षणं मतं। संप्रोक्षणमुक्तं तत्रैव। संप्रोक्षणं देवस्य देवमुद्वास्य पूर्ववत्। पंचपंचक्रमेणे नु ५
व स्नापयित्वा महांभसा। गवां रसैश्च संस्नाप्य दर्भतोये विशोध्य च। प्रोक्षयेत्प्रोक्षणीतोयैर्मूलेनाष्टोत्त
रं शतं। ततो मूलेन मूर्द्धादिपीठांतं संस्पृशेदपि। तत्वन्यासं लिपिन्यासं मंत्रन्यासं च विन्यसेत्। प्राणप्रति
ष्ठामंत्रेण प्रतिष्ठापनमाचरेत्। पूजां च महतीं कुर्यात्स्वतंत्रोक्तां यथाविधि। पूजाहीनादिषु प्रायः संप्रोक्ष
णविधिः स्मृत इति। स्वपुरीषदर्शनादौ यमपराशरौ। प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्। दृष्ट्वा सू
र्यं निरीक्षेत गामग्निं वालणं तथेति। गोयुक्तयानमारूढस्य मैथुने यमः। यदि गोभिः समायुक्तं यानमारु
ह्य वै द्विजः। मैथुनं सेवते चैव मनुः स्वायंभुवोऽब्रवीत्। त्रिरात्रं क्षपणं कृत्वा सचैलं स्नानमाचरेत्। गोभ्यो य
वाढकं दद्याद्घृतं प्राश्य विशुध्यतीति। गावात्र पुमांसः। जले प्रति बिंबदर्शनादौ योगी। मायेत जरजी छायां

Indira Gandhi National
Centre for the Arts

प्रा०मु०ली० स्वंदृष्ट्वांबुनिवैजपेत्। सावित्रीमशुचौदृष्टेचापलेवान्ृतेपिच। भोजनावसरेमौनाकरणेपराशरः। मौनव्रतं
समाश्रित्यआसीनोनवदेद्विजः। भुंजानोहिवदेद्यस्तुतदन्नंपरिवर्जयेत्इति। प्रतिश्रुत्यमिथ्यावादेहारी
७३ तः। प्रतिश्रुत्यान्ृतंब्रूयान्मिथ्यासत्यमथापिवा। सतस्सकृष्णसहितंचरेद्वांद्रायणव्रतमिति। पशुवन्मुखेन
जलपानेपराशरः। विद्यमानेषुहस्तेषुब्राह्मणोज्ञानदुर्बलः। तोयंपिबतिवक्त्रेणश्वयोनौजायतेध्रुवमिति।
अत्रोपवासःप्रायश्चित्तं। असपिंडैःसहरोदनेपारस्करः। मृतस्यबांधवैःसार्द्धंकृत्वातुपरिदेवनं। वर्जयेत्त
दहोरात्रंदानंश्राद्धादिकर्मचेति। प्रेतानुगमनेमनुः। अनुगम्येच्छयाप्रेतंज्ञातिम ज्ञातिमेवच। स्नात्वासचे
लःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति। एतत्कामतः। अकामतस्तुस्नानमात्रं। यत्तुयोगीश्वरोक्तं। ब्राह्मणे
नानुगंतव्योनशूद्रोनद्विजःक्वचित्। अनुगम्याम्भसिस्नात्वास्पृष्ट्वाग्निंघृतभुक्शुचिरिति। तन्मानवेन
तुल्यविषयं। पराशरः। प्रेतीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलः। अनुगच्छेन्नीयमानंसत्रिरात्रेणशुध्यति।
त्रिरात्रेतुततश्चीर्णेनदींगत्वासमुद्रगां। प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीति। अत्रघृतप्रा
शनस्यशुध्यर्थत्वाभिधानान्नभोजननिवृत्तिरितिश्रीगुरवः। अनयैवदिशाक्षत्रियस्यवैश्यस्यशूद्रानुग ७३
मनेवैश्यस्यशूद्रानुगमनेचप्रकल्प नीयं। श्राद्धोपवासदिनेदंतधावनेविष्णुरहस्ये। श्राद्धोपवासदिवसेख्वा

दित्वादंतधावनं। गायत्र्याशतसंपूतमंबुप्राश्यविशुध्यतीति। स्नुताद्दोहद्धपराशरः। विप्रःक्षुत्कृत्यनिष्ठी
व्यकृत्वाचान्ृतभाषणं। यच्चनंपतितैःकृत्वादक्षिणंश्रवणंस्पृशेत्॥ ॥अथपतितत्यागविधिः॥ यस्तु
पतितःप्रायश्चित्तमकुर्वन्संतिष्ठतेतंप्रतिशंखआह। तस्यगुरोर्बांधवानांराज्ञश्चसमस्तदोषान्विरव्याप्य
पुनःपुनराचारेत्त्वभरेवतिसयद्येवमनवस्थितमतिःस्यात्तस्यपात्रंविपर्यस्येदिति। घटस्फोटमाहयोगी। प
तितस्यबहिःकुर्युःसर्वकार्येषुचैवतं। दासीकुंभंबहिर्ग्रामान्निनयेरन्स्वबांधवाः। निनयनविधिमा
हगौतमः। तस्यविद्यागुरून्योनिसंबंधांश्चसंनिपात्यसर्वाण्युदकादीनिप्रेतकर्माणिकुर्युःपात्रंचास्यविपर्य
स्येयुर्दासःकर्मकरोवा। व करात्पात्रमानीयदासीघटात्पूरयित्वादक्षिणामुखःपदाविपर्यस्येदमनुमनुद
कंरो मीतिनामग्रहांतेसर्वेन्वालभे[illegible]रन्प्राचीनावीतिनोमुक्तशिखा विद्यागुरवोयोनिसंबंद्धांश्चवीक्षेरन्न श्र५
पउपस्पृश्यग्रामंप्रविशेयुः। इति। उदकाद्युक्तेर्दाहनिवृत्तिर्बोध्या। उदककालमाहमनुः। पतितस्योद
ते३ ककार्यंसपिंडैर्बांधवैःसह। निंदितेऽहनिसायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ। सएव। दासीघटमपांपूर्णंपर्यस्ये
त्प्रेतवत्सदा। अहोरात्रमथासीरन्नाशौचंबांधवैःसह। घटस्फोटोत्तरंकर्त्तव्यमाहमनुः। निवर्तेरंस्ततस्त
स्मात्संभाषणसहासने। दायाद्यस्यप्रदानंचयात्रामेवचलौकिकी। यादिस्नेहादिनासंभाषततदाप्रा

यश्चित्तं गमैत मोक्तं द्रष्टव्यं। अत ऊर्ध्वं तेन सह स्नं भाष्यातिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वं ज्ञानपूर्वं चेत्त्रि
रात्रमिति ॥ स्त्रीणां विशेषमाह योगीश्वरः। पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः। वासो गृहांतिके दे
यमन्नं वासः सरक्षणं। वासो वासः स्थानं तस्य गृहसमीपे देयं। अन्नं प्राणधारणमात्रक्षमं। वासो ऽतिमलि
नं। स्त्रीणां पातित्यहेतूनाह स एव। नीचाभिगमनं गर्भपातनं भर्तृहिंसनं। विशेषपतनीयानि स्त्रीणामेता
न्यपि ध्रुवं। शौनकोपि। पुरुषस्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव। ब्राह्मणी हीनवर्णसेवायाम
धिकं पततीति। यत्तु वासिष्ठं। त्रीणि स्त्रियाः पातकानि लोके धर्मविदो विदुः। भर्तुर्वधो भ्रूणहत्या स्वस्य ग
र्भस्य पातनं। तत्पातकांतरेभ्यः पातकानि त्रीण्ययोग्यतार्थं नतु महापातकादीनां पातित्यहेतुत्वनिरासार्थं।
यदपि तेनोक्तं चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या। पतिघ्नी च विशेषेण जुंगितोपगता च येति त
द्गृहसमीपे निवसति निषेधपरं। जुंगितं प्रातिलोम्यः। घटस्फोटोत्तरं यदा पतितः प्रायश्चित्तं कुरुते त
दा संग्रहविधिमाह योगी। चरितव्रत आयाते निनयेरं नवं घटं। जुगुप्सेरं न चाप्येनं संनयेयुश्च सर्वशः
ति। मनुरपि। प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं। तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशय इति।
कृच्छ्रप्रायश्चित्तोत्तरमपि न व्यवहार इत्याह योगी। शरणागतबालस्त्रीघातकान्संवसेन्नतु। चीर्ण ७४

व्रतानपि सतः कृतघ्नसहितानिमानिति। पातित्याभावेपि वाचनिकः प्रतिषेधः। पतितकन्याग्रहणे न दोषः। क
न्यां समुद्वहेदेषां सोपवासामकिंचनामित्यादि याज्ञवल्क्यवचनात्। पातित्यानंतरोत्पन्ना रिक्तां स्वयमेवो
द्वहेन्न पतितहस्तादिति विज्ञानेश्वरः। एषां पतितानां। वसिष्ठः। पतितोत्पन्नः पतितो भवति अन्यत्र स्त्रि
या इति। स्त्र्यपत्येन पातित्यमिति भावः॥ ॥ इति पतितत्यागविधिः॥ ॥ अथोदक्याद्यभिवादने शा
तातपः॥ उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भपातिनीं। मत्तं प्रमत्तमुन्मत्तं धावंतमशुचिं नरं। वमंतं जृंभमा
णं च कुर्वतं दंतधावनं। अभ्यक्तशिरसं स्नानं कुर्वतं नाभिवादयेत्। एतेषामभिवादने तदेव प्रायश्चित्तं।
जमदग्निः। देवलं प्रतिमां दृष्ट्वा यतिं चैव त्रिदंडिनं। नमस्कारं न कुर्याच्चेदुपवासेन शुध्यतीति॥ विवा
हात्पूर्वं कन्यारजोदोषे मदनपारिजाते आचार्यः। कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मवान्। तथा
चकारयित्वा तामुद्वहेत्तां न शंसधीः। पिता ऋतून्स्व पुत्र्याः स्व गणयेद्यादितः सुधीः। दानावधि गृहेय
त्नात्पालयेच्च रजोवतीं। दद्यात्तदनुसंख्या गाः शक्तः कन्यापिता यदि। दातव्यैकापि निःस्वेन दान
तस्या यथाविधि। दद्याद्ब्राह्मणेष्वेव सा तिनिःस्वः सदक्षिणां। तस्या नीतर्तुसंख्येषु वराय प्रतिपादये
त्। उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः। अदृष्टरजसे दद्यात्कन्यायै तत्र भूषणं। तामुद्वहन्वरस्या

Indira Gandhi National
Centre for the Arts

प्र॰ मुक्ती पिकूष्मांडैर्जुहुयाद्घृतमिति॥ इति संक्षेपेण प्रकीर्णप्रायश्चित्तान्यभिहितानि॥ ॥अथ रहस्यकृतकर्मप्रा
यश्चित्तानि। रहस्यकर्त्रभिन्नज्ञाता विषयः। अन्ययोपि द्वमने कर्तृत्वस्य व्यासज्यवृत्तित्वान्न व्यभि
७५ चारः। इदश्चोदाहरेत्प्रायश्चित्तमपि रहस्यमेव कार्यं। रहस्ये रहस्यं प्रकाशे प्रकाशमिति हारीतोक्तेः॥
अत्र पर्षदपि नास्ति। विख्यातदोषः कुर्वीत पर्षदोनुमतव्रतं। अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेदिति यो
गिवाक्यात्। कर्त्रा यद्यनभिज्ञस्तदान्यापदेशेन विद्वांसं पृष्ट्वा कुर्यात्। योगी। त्रिरात्रोपोषितो जप्त्वा ब्रह्महा ब्र॰५
त्वघमर्षणं। अंतर्जले विशुध्येत गां दत्वा च पयस्विनीं॥ एतच्चाकामतः प्राथमिकवधे। द्वितीयादौ तु मनुः।
अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां। मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिरिति। पराकउप
सु॰५ वासः॥ ॥अथास्य सुरापाने योगी॥ त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृतं शुचिः। अत्र चत्वारिंशद्
ताहुतीरिति संख्यान्वयो बोध्यः। एतदज्ञानकृते। कामकृते पैष्टीपाने मनुराह। मंत्रैः शाकलहोमीयैः
रब्दं हुत्वा घृतं द्विजः। सगुर्वप्यपहंत्येनो जप्त्वा वा नम इत्यृचं। शाकलमंत्रा देवकृतस्येनसोवयजनमसि
स्वाहेत्यष्टौ। नम इदुग्रं नम आविवासदित्येकाऋक्॥ ॥अथ रहस्यसुवर्णस्तेये। त्रिरात्रोपोषितइ ७५
त्यधिकारे योगीश्वरः। ब्राह्मणस्वर्णहारी तु रुद्रजापी जले स्थित इति। शुध्येदिति भावः। रुद्रजापश्चै

कादशावृत्तिभिः कार्यः। एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्। महापापैरपि स्पृष्टो मुच्यते नात्र संश
य इत्यत्रिस्मरणात्। एतच्च सर्वपापेष्वपि बोध्यं। स्तेयं कृत्वा गुरुदारांश्च गत्वा मद्यं पीत्वा ब्रह्महत्यां च कृत्वा।
रुद्रजापी भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैरिति शातातपस्मृतेः। अभ्यासे तु गोनुग
मनमधिकं कार्यं। सुवर्णन्यूनापहारे मनुः। सकृज्जप्त्वास्यवामीयं शिवसंकल्पमेव च। सुवर्णमपहृत्या
पि क्षणाद्भवति निर्मल इति॥ ॥अथ रहस्यगुरुतल्पे। योगी। सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पगः॥
गौर्देया कर्मणोस्यांते पृथग्भिः पयस्विनी। अत्रापि त्रिरात्रोपोषित इति संबध्यते। घृतहोमो विज्ञेयः।
त्रिरात्रोपोषितः पुरुषसूक्तजपहोमाभ्यां गुरुतल्पगः शुध्येदिति। जपहोमयोः प्रत्येकं चत्वारिंशत्सं
ख्यासंबध्यते। इदमज्ञाने। कामतस्तु मनूक्तमहर्गोनुगमने कार्यं। कामतोभ्यासे षड्भिरब्दैर्मते। महाव्याहृति
क॰४ भिर्होमस्तिलैः कार्यो द्विजन्मना। उपपातैः शुध्यर्थं सहस्रपरिसंख्यया। महापातकसंयुक्तो लक्षहोमेन
शुध्यतीति। रहस्यसंसर्गे तु यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धय
इति मनूक्तं द्रष्टव्यं। क्रमप्राप्तमुपपातकप्रायश्चित्तमाह योगीश्वरः। प्राणायामशतं कार्यं सर्वपापापनुत्तये।
उपपातकजातानामनादिष्टस्य चैव हीति। अनादिष्टस्य रहस्यजातिभ्रंशकरादेः। अत्र संख्या द्विः

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ कल्पनीया। महापापेषु चतुः शतं प्राणायामाः। अतिपातकेषु त्रिंशतं अनुपातके षु द्विशतमिति। अतएव
७६ यमस्त्राह। दशप्रणवसंयुक्तैः प्राणायामैश्चतुः शतैः। मुच्यते ब्रह्महत्यायाः किं पुनः शेषपातकैरिति योगी
श्वर। ॐकाराभिष्टुतं सोमसलिलं पावनं पिबेत्। कृत्वा तु रेतो विण्मूत्रप्राशनं हि द्विजोत्तमः। मनुः। प्रतिगृ
ह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं। जपंस्तरत्समंदीयं मुच्यते मानवस्त्र्यहात्॥ ॥अथ साधारणप्रा
यश्चित्तानि। मनुः। वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रियाक्षमा। नाशयत्याशु पापानि महापातकजा
न्यपि। यथैधांस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात्। तथा ज्ञानकृतं पापं तथा दहति वेदवित्। सव्याहृति ज्ञाना॰
काः प्रणवाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः। व्यासः। तिलधेनुं तु यो द
द्यात्संयतात्मा द्विजन्मने। ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः। यमः। तिलान्ददाति यः प्रातस्तिला
न्स्पृशति खादति। तिलैः स्नाति तिलाञ्जुह्वन्सर्वं तरति दुष्कृतं। द्वे चाष्टम्यौ तु मासस्य चतुर्दश्यौ तथैव
च। अमावास्या पौर्णमासी सप्तमी द्वादशी द्वयं। संवत्सरमभुंजानो मुच्यते सर्वपातकैः। योगी। निशायां वा
दिवा वापि यदज्ञानकृतं भवेत्। त्रैकाल्यसंध्याकरणात्तत्सर्वं विप्रणश्यति। शंखः। शतजप्ता तु सा देवी ७६
सर्वपापप्रणाशनी। सहस्रजप्ता तु तथा पातकेभ्यः प्रमोचनी। दशसाहस्रजप्येन सर्वकल्मषनाशिनी।

लक्षं जप्ता तु सा देवी महापातकनाशिनी। सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः। सुरापश्च विशुध्यंति लक्षज
प्यान्न संशय इति। मनुः। एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनं। अवेत्यर्चं जपेदब्दं यत्किंचेदमितीति
च। व्यासः। योधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः। चतुरो वार्षिकान्मासान्सर्वपापैः प्रमुच्यत इति। तथा।
तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदं। कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथां। श्रावयिष्यंति
ये विप्राये च श्रोष्यंति मानवाः। सर्वथा वर्तमाना वै न ते शोच्याः कृताकृते इति। नियमा ब्रह्मचर्यहविष्या
शन भूशय्यादयः। एवं संकल्पपूर्वकं श्रुत्वा समाप्तौ सति सामर्थ्ये पर्वपर्वसमाप्तौ वाचकं पायसेन
भोजयेत्तस्मै रत्नकांचनयानगोभूगृहवस्त्राणि दद्यात्। एवं वाचकं संतोष्य द्विजान्भोजयेत्तेभ्यो दक्षि
णां दद्यादेवं सर्वपुराणश्रवणे विधिरिति सर्वं शिवं॥ ॥इति श्रीभारद्वाजमहादेवभट्टात्मजसकल
विद्यानिधानश्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ प्रायश्चित्तमुक्तावलीप्रकाशः समाप्तः॥ ॥
॥ अथ अनुक्रमणिका॥ दिवाकरमनूजेन वैजनाथेन सूरिणा॥ श्रीतपारचितेग्रंथेनुक्रम ईर्यते॥ ना२
॥१॥ मंगलाचरणपूर्वं मातृवंशयानुकीर्तनं॥ प्रायश्चित्तार्थकथनं तल्लक्षणमुदाहृतं॥२॥ नैमित्तिकत्वं
काम्यत्वं प्रायश्चित्तस्य कीर्तितं। तस्य शक्तिद्वयं प्रोक्तमथ तंत्रप्रसंगकौ॥३॥ पर्षभेदानवप्रोक्तास्तेषां ल

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ क्षणमीरितं ॥ कृच्छ्रादिलक्षणं सर्वव्रतं सांतपनं स्मृतं ॥४॥ ओसकृच्चैस्वरूपं चयैति सांतपनं स्मृतं ॥ म
७७ हासांतपनं पश्चाद्देति सांतपनं ततः ॥५॥ पर्णकृच्छ्रस्ततः प्रोक्तः फलकृच्छ्र उदाहृतः ॥ तप्तकृच्छ्रः प्रकथि
तः शीतकृच्छ्रप्रदर्शितः ॥६॥ पादकृच्छ्रस्ततः प्रोक्तः प्राजापत्योथ कीर्तितः ॥ द्वैधालस्य प्रकारश्च प्राति
लोम्यानुलोमतः ॥७॥ अतिकृच्छ्रस्ततः प्रोक्तः पाणिपूरान्नभोजनः ॥ अथ कृच्छ्रातिकृच्छ्रश्च पराका
ख्यं व्रतं ततः ॥८॥ ततो यावककृच्छ्रश्च मासकृच्छ्रस्ततः परः ॥ तुलापुरुषकृच्छ्रश्च सर्वकृच्छ्राधिकारि
णः ॥९॥ मार्कंडेयादिना प्रोक्तास्ततश्चांद्रायणं स्मृतं ॥ द्वैविध्यं तस्य संप्रोक्तं पिपीलायवमध्यतः ॥१०॥
ग्रासादिपरिमाणं च कृच्छ्रे साधारणो विधिः ॥ चांद्रायणस्य च विधिस्तत्प्रयोगः प्रकीर्तितः ॥११॥ अ ११
थ सोमायनं प्रोक्तं प्राजापत्याक्षमस्य हि ॥ प्राजापत्य क्रियाणां तु प्रत्याम्नायाः प्रकीर्तिताः ॥१२॥ गवामभा
वे गोमूल्यं निष्कं निष्कार्द्धमेव वा ॥ निष्कस्वरूपं कथितं कार्षापण विनिर्णयः ॥१३॥ पराकादिक्रियाणां तो
प्रत्याम्नाया गवां तथा ॥ उपवासेन तुल्यानि कथितानीह सर्वशः ॥१४॥ काम्यानां कर्मणामादौ प्राजापत्यं
प्रकीर्तितं ॥ कृच्छ्रादिषु विनिर्दिष्टं तीर्थाटनमनुत्तमं ॥१५॥ प्रत्याम्नायेन सततं पापं ह्येवाद्यभिवर्त्तितं ॥ परि ७७
षत्कथिता पश्चान्निद्विजाः परिकीर्तिताः ॥१६॥ उपस्थानं ततस्तस्यास्तस्यै गोवृषदक्षिणा ॥ अनुग्रहोऽ

समर्थस्य प्रायश्चित्तस्य कीर्तितः ॥१७॥ स्नानं तस्य विनिर्दिष्टं निर्दिष्टं णां जपः स्मृतः ॥ कर्त्तव्यता समुदि
तासंकल्पवपनादिका ॥१८॥ शाखाग्निहोमः कथितो वैश्वदेवश्राद्धमीरितं ॥ दशस्नानविधिः पश्चाद्देतं ब्रा
ह्मणभोजनं ॥१९॥ अर्वाक्कुष्माण्डहत्यायाः षडब्दं व्रतमीरितं ॥ प्रायश्चित्तप्रयोगश्च विशदः परिकीर्तितः ॥
॥२०॥ देशादानानि चोक्तानि परिमाणयुतानि च ॥ तन्मंत्राश्च पृथक्प्रोक्ता दानस्य हि फलाप्तये ॥२१॥ स्त्रीशू
द्राणां होममंत्रोष प्राशनं नेति कीर्तितं ॥ ब्रह्महत्या महापाप प्रायश्चित्तं ततः परं ॥२२॥ अनुग्राहकदोषेपि जाति
न्यून्याद्यपेक्षया ॥ योगस्थक्षत्रविड्गर्भनाशने समुदाहृतं ॥२३॥ सुरापाने तथा प्रोक्तः सुराभेदाः प्रकीर्तिताः ॥
सुराभांडोदकस्याथ प्राशने मद्यभक्षणे ॥२४॥ मद्यभेदाः समुदिताः स्त्रीणां तस्य विवर्जनं ॥ स्वर्णस्तेये समा
ख्यातं गुरुतल्पेथ कीर्तितं ॥२५॥ स्त्रीणामपि समाख्यातं पुत्रेच्छायां मनूदितं ॥ भगिन्यादिव्यवायेषु सपिंडा
स्वंत्यजासु च ॥२६॥ प्रायश्चित्तं समुदितं तत्संसर्गे प्रकीर्तितं ॥ नवधा संकरः प्रोक्तो वर्षान्न्यूनेपि कीर्तितं ॥२७॥
दिनमासादिगणनाद्भिन्नांस्य भिन्नास्तयोः ॥ महापापोपपापादि भेदेनाप्यनुवर्णितं ॥२८॥ ततो गोवधदोषेषु
प्रायश्चित्तमुदाहृतं ॥ स्त्रीणां विशेषः कथितः परदाराभिमर्शने ॥२९॥ विस्तरेण समाख्यातं स्वैरिण्यादिषु
पीरितं ॥ स्वैरिणीबंधकी प्रोक्ता चंडालीगमने ततः ॥३०॥ रजस्वलागमे प्रोक्तं विशेषादिनभेदतः ॥ वेश्यायां

Indira Gandhi National Centre for the Arts

प्रा॰मु॰ल्ली॰ गर्भपर्यंतगमनेकृच्छ्रस्य सूचितं ॥३१॥ स्त्रीणां पुंव्यभिचारस्य प्रायश्चित्तमुदाहृतं ॥ गोमहिष्यादिगमने गोमुत्र
७८ मूत्रकृच्छ्रादिषु ॥३२॥ व्यवाये धर्मपत्न्यां च प्रायश्चित्तमुदाहृतं ॥ स्त्रीवधे क्षत्रियवधे चंडालानां वधे तथा ॥३३॥
मार्जारादिवधे प्रोक्तं मनुपाराशरोदितं ॥ अथ सर्पस्य संस्कारविधिः प्रोक्तः समासतः ॥३४॥ तत्प्रयोगश्च
विस्पष्टः प्रसंगादनुकीर्तितः ॥ आत्मघातविशुध्यर्थं प्रायश्चित्तमुदाहृतं ॥३५॥ आत्महत्या पवादश्च प्रयोगादि
षु कीर्तितः ॥ अनाशकप्रयोगश्च संक्षेपेण निवेदितः ॥३६॥ ऊर्ध्वोच्छिष्टादिमरणे प्रमादमरणे तथा ॥ चिति ८४
स्त्रोसमारव्यातमन्यास्थिनयने तथा ॥३७॥ इंधनार्थं द्रुमच्छेदे योषितो ब्रह्मचारिणः ॥ प्रसंगे स्वप्नविस्रसेवा
नयस्य चतुर्थयोः ॥३८॥ संन्यास्यनाशकादीनां तन्निवृत्तौ प्रदर्शितं ॥ यतीनां धर्मलोपेषु ब्रह्मसत्रस्य नाशने ॥ ८७
॥३९॥ महानाम्न्यादिलोपेषु शौनकोक्तं निवेदितं ॥ परिवेत्तुः पारिवित्ते र्लक्षणं समुदाहृतं ॥ ४०॥ प्रायश्चित्तं त
योः प्रोक्तं वसिष्ठेन प्रचोदितं ॥ विनिर्दिष्टा च दिधिषूः पूर्वाग्रेदिधिषूः स्मृता ॥४१॥ तयोरपि विनिर्दिष्टं प्रा
च४ यश्चित्तं सविस्तरं ॥ नास्तिकस्यैसं प्रोक्तं पुत्राणां विक्रयस्य च ॥४२॥ अनाश्रमे तथैवोक्तं मग्नित्यागे च की
र्तितं ॥ अतीतकालहोम्ये तु विप्राय विनिवेदयेत् ॥४३॥ आत्मत्वचविनिर्दिष्टं भृतकाध्यापनादिषु ॥ ऋणोदाने
च कथितेभ्रूण भेदाः प्रकीर्तिताः ॥४४॥ अनाहिताग्नितायाश्च तथा पण्यस्य विक्रये ॥ कन्याया विक्रय ७८
स्यापि गवां मश्चकरीद्रयोः ॥४५॥ इतिहासपुराणानां विक्रयस्य च कीर्तितं ॥ लवणादुरसादीनां लाक्षाणां

सघृतेषु च ॥४६॥ धान्यान्नधनचौर्याणां मनुष्ये पहृते गृहे ॥ खारीकुंभपलानां च कुडवस्याढकस्य
च२ च ॥४७॥ द्रोणस्यैव विनिर्दिष्टं मानं कात्यायनोदितं ॥ रूप्यस्य हरणे प्रोक्तं गद्याणक उदीरितः ॥४८॥
पित्रादि त्यागे उदितं याज्ञवल्क्येन भाषितं ॥ रजस्वलानामन्योन्यं संस्पर्शे समुदीरितं ॥४९॥
तासामस्पृश्य संस्पर्शे म्लतसूतकयोरपि ॥ नैमित्तिकस्य स्नानस्य प्रकारः समुदीरितः ॥५०॥ ५६
श्वचांडालादिसंस्पर्शे श्वावस्पर्शे च कीर्तितं ॥ जान्वादिषु विशेषश्च स्यातुराणां तथैव च ॥ ५१॥ पा
रंपर्येण संस्पर्शे तद्दस्नानं ऋतुपि च ॥ एकशाखा समारोहे चंडालद्विजयोरपि ॥५२॥ तत्र
पाने च भक्ष्ये च कृते प्रोक्तं हि भाषणे ॥ पराशरोदितं प्रोक्तं तद्वाप्यादि पयः पिबेत् ॥५३॥ यदि
तत्रापि निर्दिष्टं तद्भांडोदकपानके ॥ मानुष्यश्वावसंपृक्तकूपादिजलभक्षणे ॥५४॥ मृतपं
चनखात्कूपात्पानेप्युक्तं द्विजन्मनां ॥ कूपः शुद्धेः प्रकारश्च दर्शिता विष्णुवाक्यतः ॥५५॥ चंडा
लाः ल्लानशने प्रोक्तं श्वादिदंशे प्रकीर्तितं ॥ क्रम्युत्पत्तौ व्रणे प्रोक्तं सर्ववर्णविभेदतः ॥५६॥ गर्भाधा
नादिसंस्कारेषु क्त मन्त्रविभोजने ॥ मासिके च नवश्राद्धे आह्निके पुनराह्निके ॥५७॥ तद्दर्धे

Indira Gandhi National
Centre for the Arts

प्रा॰मु॰ली॰ ७०

मपिसंप्रोक्तं ब्राह्मणस्य भोजने॥ क्षत्रविट्शूद्रजातीनां श्राद्धभोजनमीरितं॥५८॥ ऐकाद
शाहिके श्राद्धे शिशुश्चांद्रायणं मतं॥ आमसांकल्पिकश्राद्धे मासिकादिषु कीर्त्तितं॥५९॥
ब्रह्मचारी यदा भुंक्ते तन्निष्कृतिरुदाहृता॥ सूतके मृतके भुक्तौ चंद्रसूर्यग्रहे तथा॥६०॥
ऊँ भोज्यान्नाः प्रकथिता वृथापाकस्य लक्ष
णा यायां कुंजरस्याथ प्रायश्चित्तमुदाहृतं॥ आपत्काले तु विप्रस्य तदन्नस्य च
णं॥६१॥ नदन्नभोजने प्रोक्तं प्रायश्चित्तं सविस्तरं॥ आपत्काले तु विप्रस्य तदन्नस्य च
भोजने॥६२॥ पायसादौ न दोषस्तु शूद्रादेर्ग्रहणे स्मृतः॥ आशौच्यन्नं यदा भुंक्ते तच्छु
द्धिः समुदाहृता॥६३॥ अनभ्यक्तेन चान्नेन प्राणाहुतिकृते तथा॥ हस्तदत्तस्य संप्रोक्तं फा
णितादेर्घृतस्य च॥६४॥ उच्छिष्टभक्षणे प्रोक्तं कामाकामकृते तथा॥ आपस्तंबेन सं
प्रोक्तं स्त्रीणामुच्छिष्टभोजने॥६५॥ नताभिः सह भोक्तव्यं चांद्रायणमथादिह॥ पीता
वशिष्टपाने तु प्रपादिजलपानके॥६६॥ दीपोच्छिष्टादिषु प्रोक्तं षट्त्रिंशन्मतसंभवं॥
अथ प्रतिग्रहप्रोक्तमसतां विस्तरेण तु॥६७॥ बुलात्कृतस्य म्लेच्छस्य चतुर्वर्षावधी

७९

रितं॥ वर्ज्यानि दुग्धान्युक्तानि तत्पाने च प्रकीर्त्तितं॥६८॥ मांसस्य भक्षणे प्रोक्तं न भक्ष्यं
तत्कदाचन॥ ब्राह्मणेनेति कथितं गोवदुष्ट्रस्य भक्षणे॥६९॥ जातिभ्रंशकरे पापे सं
करी करणे तथा॥ प्रकीर्णकेषु सर्वेषु प्रायश्चित्तमुदाहृतं॥७०॥ खरोष्ट्रयाने गोया
ने दिवा मैथुनसंभवे॥ त्वंकारे तु गुरोः प्रोक्तं विद्यावादविनिर्ज्जये॥७१॥ काष्ठादिता
डने चैव स्वपादेन प्रताडने॥ ब्राह्मणानां प्रकथितमतो भार्याविसर्जने॥७२॥ आरो
ग्ये सति भार्याया अपि भर्त्तृविवर्जने॥ मैत्रीज्ञामंत्रणाय व्रतादिकरणे पुनः॥७३॥
प्रायश्चित्तं प्रकथितं स्त्रीणां गर्भस्य पातने॥ विप्रजातस्य संप्रोक्तं नीलीवस्त्रावि
धारणे॥७४॥ पलांडुवृक्षत्र्याद्यावारोहे त्रिदिनव्रतं॥ मृषाविप्रवधस्याथ शपथे
यमभाषितं॥७५॥ अनापदि गृहस्थस्य सिद्धान्नस्य च भिक्षणे॥ संकल्पितस्य दानं
स्य ब्राह्मणे प्रतिपादने॥७६॥ यज्ञोपादप्रतापे तु दंपत्योर्विप्रयोस्तथा॥ अंतरागमने प्रो

Indira Gandhi National
Centre for the Arts

७१

प्रा॰मु॰ली॰ ङ्गगवां विप्रस्यैव हि ॥७७॥ सिंधुसौवीरगमने पुनः संस्कारकर्मणः ॥ निमित्ता
८० निग्रदिष्टा नितत्प्रयोगः स्फुटीकृतः ॥७८॥ वेदोदितानां सर्वेषां कर्मणां समति
क्रमे ॥ प्रायश्चित्तं प्रकथितं संध्यावंदनहानिषु ॥७९॥ विना जलं जलेवाथ मंत्रा
दिषु समासतः ॥ अग्नौ जले च विः क्षिप्ते निषिद्धद्रव्यसंचये ॥८०॥ संध्याकाले
त्वतिक्रांते पंचयज्ञात्यये पि च ॥ स्वभार्यां क्रोधवशतो ऽगम्येति वदतस्तत ॥८१॥
७३ कौमाराद्यूरमोक्षस्य शातातपसमीरितं ॥ देवपूजाः सुविच्छेदे स्वपुरीषस्य दर्शने ॥
॥८२॥ पानीये प्रतिबिंबस्य दर्शने योगिभाषितं ॥ भुंजो तु मौनाकरणे प्रतिश्रुत्यासम
र्पणे ॥८३॥ गोवद्वक्त्रेण पानीयपाने संप्रकीर्त्तितं ॥ रोदने त्वसपिंडैश्च प्रेतानुगमने तथा ॥८४॥ शूद्रे विशेषः कथितः श्राद्धाहे दंतधावनं ॥ क्षुताद्यश्रवणे स्पर्शः पतितस्यागरे ॥ ८०
ईरितः ॥८५॥ शातातपोदिताः प्रोक्ता अनेमस्कार्य मानुषाः ॥ पूर्वविवाहात्कन्यायारजोदे
१ तत्कन्याग्रहणे नैव दोषहत्यपि कीर्त्तितः ॥ ॥८६॥
कन्यायाः २

७५ ७६

प्रा॰मु॰ली॰ वेप्रकीर्त्तितं ॥ रहस्यकर्मणां प्रोक्तं प्रायश्चित्तं समासतः ॥८७॥ साधारणमध्यग्रंथे च
८१ कथितं मुनिभाषितं ॥ भारतश्रवणं प्रोक्तं श्रवणस्य विधिस्तथा ॥८८॥ इत्थं दिवाकरसुतेन
कनीयसा श्रीरामानुजेन गुरुभक्तिपरायणेन ॥ शातातपादरचिते सुजनप्रियेस्मिन् ग्रंथेक्र
मो विलिखितः सवितुः प्रसादात् ॥८९॥ ॥इति श्रीदिवाकरात्मजवैजनाथविरचितः प्राय
श्चित्तमुक्तावलीप्रकाशानुक्रमः समाप्तिमफाणीत् ॥ ॥शुभम ॥ ॥अधीतशास्त्रार्थविदांति
सकलयः परकृतं सुखं शीतलोकायुवतितरुणानंदकलिलः ॥ प्रपद्यंते चिंतां मनसि कृतिनः श्रा
म्यकरणापरं तेषां स्वच्छं हरिपुरनिवासः फलमदः ॥ ॥दृक्पंचवसुचंद्रे हेममधुमासि सितेत
रे ॥ पंचम्यामिंदुवारे च गंगाधरोमलीलिखत् ॥ ॥सं॰१८५२ चैत्रवद्य पंचम्यामिंदुवारे सायाह्ने
पुस्तकलिखनं समाप्तम् ॥छ॥ ॥श्री॥ ॥छ॥

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts